# मीमांसादर्शनदिशा नञर्थानां निषेधवाक्यानाञ्च स्वरूपपविमर्शः

Mīmānsādarśanadiśā Nañrthānāṁ

NiṣēdhavākyānāñcaSvarūpavimarśaḥ

**जवाहरनेहरूविश्वविद्यालयीय-एम्. फिल्. इत्युपाध्यर्थम्प्रस्तुतो लघुशोधप्रबन्धः**


**शोधनिर्देशकः** — **प्रो०संतोषकुमारशुक्लः**

**शोधार्थी** — **प्रवीणसेमवालः**

**संस्कृतप्राच्यविद्याध्ययसंस्थानम्**

**जवाहरलालनेहरूविश्वविद्यालयः**

**नवदेहली ११००६७**

## RECOMMENDATION FORM FOR EVALUATION BY THE EXAMINER/S

## CERTIFICATE

This is to certify that the dissertation/thesis titled मीमांसादर्शनदिशा नञर्थानां निषेधवाक्यानाञ्च स्वरूपविमर्शः submitted by Mr/Ms प्रवीण सेमवाल in partial fulfillment of the requirements for award of degree of M.Phil/M.Tech/Ph.D of Jawaharlal Nehru University, New Delhi, has not been previously submitted in part or in full for any other degree of this university or any other university/institution.

We recommend this thesis/dissertation be placed before the examiners for evaluation for the award of the degree of M.Phil/M.Tech./Ph.D.

**Signature of Supervisor**

**Date:** 30/7/2021

**Signature of Dean/Chairperson**

30/7/2021

**Date:**

Dean
School of Sanskrit & Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

## ॥ समर्पणम् ॥

लघुशोधप्रबन्धोऽयं

पूजनीयोः मातापित्रोः

चरणयुगलयोः सादरं समर्प्यते

.........

...............

## ॥ सङ्केताक्षरसूची ॥

| | |
|---|---|
| अ. | अष्टाध्यायी |
| अ. सं. | अर्थसंग्रहः |
| त.चि. | तत्त्वचिन्तामणिः |
| त.कौ. | तर्ककौमुदी |
| त.दी. | तर्कदीपिका |
| त.भा. | तर्कभाषा |
| न्या.क. | न्यायकन्दली |
| न्या.कु. | न्यायकुसुमाञ्जलिः |
| न्या.भा. | न्याभाष्यम् |
| न्या.बो. | न्यायबोधनी |
| न्या.मं. | न्यामञ्जरी |
| न्या.वा. | न्यायवार्त्तिकम् |
| न्या.सू. | न्यायसूत्रम् |
| न्या.सि.मु. | न्यायसिद्धान्तमुक्तावली |
| न्या.वा.ता.टी. | न्यायवार्त्तिकतात्पर्यटीका |
| प.त.नि. | पदार्थतत्त्वनिरूपणम् |
| प.शा. | पदार्थशास्त्र |
| प्र.पं. | प्रकरणपंचिका |
| प्र.पा.भा. | प्रशस्तपादभाष्यम् |
| मा.मे. | मानमेयोदयः |
| मी.सू. | मीमांसासूत्रम् |

| | |
|---|---|
| मी.द.वि. | मीमांसादर्शनविमर्शः |
| यो.सू. | योगसूत्रम् |
| ल.मं. | लघुमञ्जूषा |
| वा.प | वाक्यपदीयम् |
| वै.सू. | वैशेषिकसूत्रम् |
| श.क.द्रु. | शब्दकल्पद्रुमः |
| शा.दी. | शास्त्रदीपिका |
| श्लो.वा. | श्लोकवार्तिकम् |
| स.द.सं. | सर्वदर्शनसंग्रहः |
| सि.च. | सिद्धान्तचन्द्रोदयम् |
| म.भा. | महाभाष्यम् |
| वै.भू.सा. | वैयाकरणभूषणसारः |
| सा.वि. | सारविवेचिनी |
| सि.कौ. | सिद्धान्तकौमुदी |
| ब्र.सू. | ब्रह्मसूत्रम् |

## ॥ कृतज्ञताज्ञापनम् ॥

**"मीमांसादर्शनदिशा नञर्थानां निषेधवाक्यानाञ्च स्वरूपविमर्शः"** विषयममुं स्वीकृत्य मया प्राथम्येन सरस्वतीदेवी स्तूयते। **"संस्कृतं संस्कृतेर्मूलम्"** अतोऽहं संस्कृतभाषामधीयानस्सन्नात्मानं धन्यं मन्ये। संस्कृताध्ययनाय मत्प्रेरकाः पूजनीयाः पितृचरणाश्श्री**विजयरामसेमवाल**महाशयास्स्नेहमूर्त्तयो मातरश्श्रीमत्यो **गंगेश्वरी**देव्यश्च स्तूयन्तेऽतो मया शोधकार्यत्वेन विरचिता लघुकृतिरियं मातृपितृचरणकमलयोस्सादरं समर्प्यते।

ततः परं सततस्वाध्यायसारस्वतसाधनारतानां छात्रवत्सलानां शोधस्यास्य कुशलनिर्देशकानाम्, संस्थानस्य च संस्थानाध्यक्षपदमलङ्कृतानां **प्रो० सन्तोषकुमारशुक्ल**महोदयानां पादपद्मेषु सश्रद्धं सविनयं प्रणामाञ्जलिं विभाव्य तेभ्यो भृशं कार्तज्ञ्यमाविष्क्रियते, येषां सततसहयोगेन शोधकर्म इदं समाप्तिमगात्।

तदनु संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य विद्वद्भ्यो गुरुभ्यः **प्रो०गिरीशनाथझा**महाशयेभ्यः, **प्रो०चौडूरि-उपेन्द्रराव**महाभागेभ्यः, **प्रो०रामनाथझा**महोदयेभ्यः, **प्रो०सुधीरकुमारार्य**वर्य्येभ्यः, **प्रो०सत्यमूर्ति**वर्य्येभ्यः, **प्रो०ब्रजेशकुमारपाण्डेय**वर्येभ्यः, **डा०टी०महेन्द्र**वर्य्येभ्यः, **डा०गोपाललालमीणा**महोदयेभ्यश्च कार्तज्ञ्यं विनिवेद्यते।

तथैव जवाहरलालनेहरूविश्वविद्यालयलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठयोः पुस्तका-लयाध्यक्षाभ्यां तत्रत्यानां सदस्यानामपि कृते सविनयं कार्तज्ञ्यं समर्पयामि, संस्थानकर्मचारिणां **विकास-अरुण-सोनाली-मञ्जू-शबनमा**दीनां कृतेऽपि विज्ञाप्यते कृतज्ञता, यतोहि तैस्सर्वदा सहर्षं साहाय्यं समदायि।

शोधप्रबन्धात्मकं कार्यमत्यन्तं गभीरं मन्यते, तच्च समुचितवातावरणेन चित्तवृत्तीनां स्थैर्येणैव सम्भवति, तदर्थं पारिवारिकाणां सदस्यानामपि महती भूमिका भवत्यतस्तेषां समुल्लेखोऽवश्यमेव कर्त्तव्यः, तेषु सर्वप्रथमं अस्माकं गृहस्य श्रेष्ठेभ्यः पूजनीयेभ्यः पितृव्यचरणेभ्यः सर्वदाध्ययनायोत्साहवर्धकेभ्यः **श्रीपूर्णानन्दसेमवाल**महोदयेभ्यः, पितृव्याभ्यः **श्रीमतीकस्तूरीदेवी**भ्यः, आग्रजभ्रातृभ्यो **श्रीजयानन्द-सन्दीप-नवीन**महोदयेभ्यः, भगिनीभ्यः मया धन्यवादास्सादरं समर्प्यन्ते। एतेषां साहाय्येन मम कार्यं सफलीभूतम्।

अस्मिन्नेवोपक्रमे प्रत्यक्षपरोक्षरूपेण मामुपकुर्वतामग्रजानामनुजानां मित्राणाञ्च कृते पौनःपुन्येन कृतज्ञतां वितरामि। तत्राग्रजेषु नारायणमिश्रः, अनिलकुमारार्यः, वशिष्टबहुगुणा, जितेन्द्रधाकडः, नीटूदत्तः, रमेशचन्द्रनैलवालः, योगेन्द्रभारद्वाजः, विवेककुमारः, हरीशबहुगुणा,

ध्रुवकुमारः, राहुलयादव इत्यादयः, अग्रजासु च अन्नूशर्मा-निहारिका-खुशबू-पूजा-निधि-दीपिका-शिप्रा-दीप्ति-स्मिता-पवन-स्नेहाश्च अत्र स्मरणीयाः। तेभ्यः/ताभ्यः भूयो धन्यवादान् कार्तज्ञ्यञ्च बिभर्मि।

सहाध्यायिषु अश्विनी, मोहितः, महेशः, पवनः, शिवपालः, प्रभुकुमारः अभिषेकपाण्डेयः, आलोकझा, राजभूषणः, अभिषेकगुप्ता, हितेशः, स्वपनदेवः, विष्णुकुमारः, कृष्णारावः, रविकान्तः, मीनाक्षी, मानसी च,

अनुजेषु नारायणः, सञ्जयदत्तभट्टः, मनोजः, सुभाषः, तेन्जिनः, सूरजः, आदेशः, नवलकिशोरः नीरजः, अवनीशः, विमलेशः, सञ्जीवश्चेत्येते विशेषरूपेणात्र धन्यवादार्हास्तेभ्योऽपि कृतज्ञतां व्याहरामि। अन्ते च यैः प्रत्यक्षाप्रत्यक्षरूपेणाऽहमुपकृतः, ते सर्वे धन्यवादार्हाः।

**प्रवीणसेमवालः (शोधच्छात्रः)**

संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्,

जवाहरलालनेहरूविश्वविद्यालयः,

नवदेहली-११००६७

# ॥ विषयानुक्रमणिका ॥


**सङ्केताक्षरसूची** **३-४**

**कृतज्ञताज्ञापनम्** **५-६**

**विषयानुक्रमणिका** **७-११**

**विषय-प्रवेशः** **१२-२१**

१. मीमांसायाः परिचयः १२-१४
२. वेदार्थनिर्णये मीमांसायाः महत्त्वम् १४-१५
३. धर्मशास्त्रे मीमांसायाः महत्त्वम् १५-१७
४. मीमांसाशास्त्रपरिचयः १७-२१

**१. प्रथमोऽध्यायः- वैदिकवाक्यभेदविमर्शः** **२२-४८**

१.१ विधिस्वरूपविमर्शः २२-३७

१.१.१ उत्पत्तिविधिस्वरूपविवेचनम् २५-२५

१.१.२ विनियोगविधिस्वरूपविवेचनम् २५-३१

१.१.२.१ श्रुतिप्रमाणेन अङ्गाङ्गिविचारः

१.१.२.२ लिङ्गप्रमाणेन अङ्गाङ्गिविवेचनम्

१.१.२.३ वाक्यप्रमाणेन अङ्गाङ्गिविमर्शः

१.१.२.४ प्रकरणप्रमाणेन अङ्गाङ्गिविवेचनम्

१.१.२.५ स्थानप्रमाणेन अङ्गाङ्गिविवेचनम्

१.१.२.६ समाख्यप्रमाणेन अङ्गाङ्गिविवेचनम्

१.१.३ प्रयोगविधिस्वरूपविमर्शः ३१-३५

१.१.३.१ श्रुतिप्रमाणेन पौर्वापर्यादिविवेचनम्

१.१.३.२ अर्थप्रमाणेन पौर्वापर्यादिविवेचनम्

१.१.३.३ पाठप्रमाणेन पौर्वापर्यविचारः

१.१.३.४ स्थानप्रमाणेन पौर्वापर्यविचारः

१.१.३.५ मुख्यप्रमाणेन पौर्वापर्यविचारः

१.१.३.६ प्रवृत्तिक्रमेण पौर्वापर्यविवेचनम्

१.१.४ अधिकारविधिस्वरूपविमर्शः ३५-३७

१.२ मन्त्रस्वरूपविमर्शः ३७-४०

१.२.१ अपूर्वविधिविवेचनम्

१.२.२ नियमविधिविवेचनम्

१.२.३ परिसंख्याविधिविवेचनम्

१.३ नामधेयस्वरूपविमर्शः ४०-४४

१.३.१ मत्वर्थलक्षणाभयान्नामधेयत्वविचारः

१.३.२ वाक्यभेदभयान्नामधेयत्वविवेचनम्

१.३.३ तत्प्रख्यशास्त्रान्नामधेयत्वविचारः

१.३.४ तद्व्यपदेशेन नामधेयत्वविचारः

१.४ निषेधस्वरूपविमर्शः ४४-४५

१.५ अर्थवादस्वरूपविमर्शः ४५-४८

१.५.१ विधिशेषार्थवादविचारः

१.५.२ निषेधशेषार्थवादविवेचनम्

१.५.३ गुणवादविवेचनम्

१.५.४ अनुवादविवेचनम्

१.५.५ भूतार्थवादविवेचनम्

**२. द्वितीयोऽध्यायः- नञर्थविचारः** **४९-८९**

२.१ मीमांसायां नञर्थविचारः ४९-६२

२.१.१ नञ्स्वभावनिरूपणम् ४९-५१

२.१.२ नञर्थेन प्रत्ययार्थस्यान्वये बाधकविचारः ५१-५८

२.१.२.१ तस्य व्रतम्

२.१.२.२ विकल्पप्रसक्तिः

२.१.३ पर्युदासोपसंहारभेदनिरूपणम् ५८-६२

२.२ व्याकरणे नञर्थविचारः ६२-७२

२.२.१ महाभाष्यकारमतविवेचनम् ६२-६४

२.२.२ वाक्यपदीयकारस्य मतविवेचनम् ६४-६४

२.२.३ भूषणकारस्य मतविचारः ६४-६६

२.२.४ मञ्जूषाकारस्य मतविचारः ६६-६७

२.२.५ नञ्भेदविचारः ६७-७२

२.२.५.१ पर्युदासस्वरूपविवेचनम्

२.२.५.२ पर्युदासार्थभेदनिरूपणम्

२.२.५.३ प्रसज्यप्रतिषेधस्वरूपविवेचनम्

२.२.५.४ प्रसज्यप्रतिषेधस्य विषयविवेचनम्

२.३ न्याये नञर्थविचारः ७२-८९

२.३.१ अभावस्य लक्षणनिरूपणम् ७२-७३

२.३.२ अभावस्य सिद्धिनिरूपणम् ७३-७४

२.३.३ मुक्तेः निषेधात्मिका कल्पनाविमर्शः ७५-७७

२.३.४ अभावस्य विशेषण-विशेष्यभावसन्निकर्षविवेचनम् ७७-७८
२.३.५ घटाभाववद्भूतलस्य प्रत्यक्षविवेचनम् ७८-७९
२.३.६ नञर्थे अभावस्य भेदविचारः ७९-८८
२.३.६.१ नञर्थे प्रागभावविमर्शः
२.३.६.२ नञर्थे प्रध्वंसाभावविवेचनम्
२.३.६.३ नञर्थे अत्यन्ताभावविमर्शः
२.३.६.४ नञर्थे अन्योन्याभावविमर्शः
२.३.७ अत्यन्ताभाव-अन्योन्याभावयोः भेदविचारः ८८-८९
**३. तृतीयोऽध्यायः- निषेधवाक्यार्थविचारः ९०-१०२**
३.१ प्रतिषेधार्थे निषेधवाक्यविचारः ९१-१०१
३.२ पर्युदासार्थे निषेधवाक्यविचारः ९३-९९
३.२.१ धात्वर्थेन नञर्थस्य अन्वयविचारः
३.२.२ नामार्थेन नञर्थस्य अन्वयविचारः
३.२.२.१ अब्राह्मणशब्दस्य नञर्थविचारः
३.२.३ अन्यार्थे नञर्थप्रयोगविवेचनम्
३.२.४ अल्पार्थे नञर्थप्रयोगविचारः
३.२.५ अप्राशस्त्यार्थे (निन्दार्थे) नञर्थप्रयोगविचारः
३.२.६ विरोधार्थे नञर्थप्रयोगविचारः
३.३ अर्थवादवाक्येषु नञर्थविचारः १००-१०१
३.४ धर्मशास्त्रग्रन्थेषु नञर्थप्रयोगविचारः १०१-१०२
**उपसंहारः १०३-१०७**
**सन्दर्भग्रन्थसूची १०८-११३**

| | |
|---|---|
| प्राथमिकस्रोतांस | १०८-११० |
| द्वितीयकस्रोतांसि | ११०-१११ |
| कोशग्रन्थाः | १११-११२ |
| अन्तर्जालस्रोतांसि | ११२-११३ |

# विषय-प्रवेशः

## १. मीमांसायाः परिचयः-

वेदस्य विभाजनं त्रिषु काण्डेषु वर्तते- कर्मकाण्डः, उपासनाकाण्डः, ज्ञानकाण्डश्च। एषु यः वेदभागः कर्मकाण्डः उच्यते, तस्य विचारः मीमांसादर्शने कृतः, अत एव अस्य नाम "पूर्वकाण्डः", पूर्वमीमांसा अथवा कर्ममीमांसा अपि वर्तते। कर्मकाण्डात्मकवेदे यागस्य, दानस्य, होमादीनाञ्च कर्माणाम् उल्लेखः विद्यमानेऽपि यागस्य प्रधानता तथा तेन सम्बन्धस्य विचाराः अस्मिन्नेव मीमांसादर्शने यथोचितरूपेण आलोचिताः, एतदर्थं दर्शनमिदं यज्ञविद्या अथवा अध्वरविद्या अपि कथ्यते।

मीमांसाशब्दस्यार्थो भवति जिज्ञासा अथवा विचारः अर्थात् ज्ञातुमिच्छा इति। पाणिन्यनुसारं मीमांसा शब्दः मान् धातुना जिज्ञासार्थे सन् प्रत्यये सति निष्पन्नो भवति[1]। शास्त्रदीपिकायां मीमांसाशब्दस्यार्थः पूजितार्थे उल्लेखितः[2]। वेदवाक्यनिर्णीतार्थानां विचारस्य नाम मीमांसा वर्तते। मीमांसया विना वेदवाक्यानामर्थनिर्धारणं न कर्तुं शक्यते। षड्दर्शनेषु मीमांसा दर्शनं एकमस्ति। मूलरूपेण मीमांसा खण्डद्वये विभक्तं वर्तते- पूर्वमीमांसा, उत्तरमीमांसा च पूर्वमीमांसा मुख्यतः वेदस्य कर्मकाण्डाश्रितमन्त्राणां स्पष्टव्याख्या वर्तते, पूर्वमीमांसा वेदस्य मूलपाठानां सन्दिग्धांशानां निर्णयं करोति, अथ च उत्तरमीमांसा मुख्यतः ब्रह्मणः अर्थात परमात्मनः स्थितिविषये विचारः करोति। पूर्वमीमांसा मीमांसायाः नाम्ना एवं उत्तरमीमांसा "वेदान्त" इतिनाम्ना ज्ञायते। पूर्वमीमांसा महर्षिजैमिनिना उत्तरमीमांसा च महर्षिबादरायणेन विरचितमस्ति। पूर्वमीमांसायां द्वादशाध्यायाः सन्ति, यस्मात् कारणात् इमां द्वादशलक्षणीति नाम्ना अपि उच्चार्यते। मीमांसायाः मूलग्रन्थः जैमिनिना विरचितः मीमांसासूत्रम् अथवा जैमिनीसूत्रं वर्तते, शबरस्वामिना अस्मिन् ग्रन्थे भाष्यं लिखितमस्ति। आचार्यकुमारिलभट्टेन प्रभाकरमिश्रेण च शाबरभाष्ये टीका लिखिता। मीमांसाशास्त्रं पृथक्-पृथक्नामभिरपि ज्ञायते, यथा- वाक्यशास्त्रम्, विचारशास्त्रम्[3], कर्ममीमांसा, पूर्वमीमांसा, न्यायविस्तारः, धर्ममीमांसेत्यादयः। वैदिकयागादयः अनेन दर्शनेन मीमांसिताः अभवन्, अतोऽस्य नाम मीमांसादर्शनं वर्तते। कोऽपि

---

[1] मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य, पा.सू. ३/१/६.

[2] शास्त्रदीपिका, पृ.३.

[3] "विचारशस्त्रं नारभ्यमारभ्यं वेति संशयः", जै.न्या.मा.श्लोक २९, पृ.११.

पुरुषः प्रयोजनं विना कस्मिन्नपि कार्ये प्रवृत्तो न भवति[4]। अत एव जैमिनिना धर्मनिरूपणस्य उद्देश्येन दर्शनस्यास्य सूत्रपातः कृतः, एतदर्थं दर्शनमिदं धर्ममीमांसा अपि कथ्यते।

वेदस्य मन्त्रभागस्य मीमांसा अस्य दर्शनस्य मुख्योद्देश्यं न वर्तते, किन्तु यत्र कोऽपि विधिः निषेधश्च न प्राप्येते, तस्मिन्नेव स्थले मन्त्रार्थे दर्शनमिदं मीमांसा करोति। विशेषरूपेण "कर्मकाण्डरूपस्य ब्राह्मणभागस्य" मीमांसायै एव अस्य दर्शनस्य रचना कृता।

जैमिनिकृतमीमांसादर्शने प्रायः सर्वत्र धर्मतत्त्वस्य एव विचारोऽस्ति। अनेन स्पष्टोऽयं भवति यत् केवलं धर्मस्य मीमांसा एव अस्य दर्शनस्य उद्देश्यम्, प्रतिपाद्यञ्च वर्तते। कुमारिलभट्टेनोक्तमपि यत्- "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्"[5]। धर्मस्य लक्षणं तथा प्रमाणादेः निरूपणमेव मीमांसादर्शनस्य उद्देश्यमात्रं वर्तते। प्रायः सर्वत्र यस्य विषयस्य प्रतिपादनं क्रियते, तत्र सर्वप्रथमं तस्य एव विषयस्य निरूपणं क्रियते, यथा वेदान्तदर्शने "अथातो ब्रह्मजिज्ञासा"[6] इदमेव प्रथमं सूत्रम्। अनेन ज्ञायते यत् ब्रह्मनिरूपणमेव वेदान्तस्य मुख्योद्देश्यं वर्तते। अतः कस्यापि अन्य विषयस्य प्रारम्भो न कृत्वा सूत्रकारेण "ब्रह्मजिज्ञासा" एव कथिता। सांख्यदर्शने "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः"[7] इदमेव प्रथमं सूत्रं वर्तते। त्रिविधदुःखानाम् अत्यन्तनिवृत्तिं परमपुरुषार्थः कथ्यते। दुःखस्य उत्पत्तेः निवृत्तेश्च एव प्रतिपादनं सांख्यदर्शने कृतम्। दुःखनिवृत्तेः उपायनिरूपणमेव सांख्यदर्शनस्य उद्देश्यं वर्तते। एतदर्थं सांख्यदर्शने पूर्वमेव दुःखनिवृत्तिं निर्देशितम्। तथैव मीमांसादर्शनस्य धर्मनिरूपणमेव मुख्योद्देश्यं वर्तते। अतः "अथातो धर्मजिज्ञासा"[8] अस्य सूत्रस्य प्रारम्भे एव समावेशः कृतः।

वर्तमानसमये उपलब्धं मीमांसादर्शनं द्वादशाध्यायेषु विभक्तं वर्तते। तथापि एतदतिरिक्तं संकर्षणकाण्डस्य अपि चत्वारः अध्यायाः मीमांसायामेव परिगणिताः। अर्थात् जैमिनीकृतं मीमांसादर्शनं षोडशाध्यायेषु पूर्णरूपेण ज्ञायते[9]। किन्तु वर्तमानसमये अन्तिमस्य संकर्षणकाण्डस्य चत्वारः अध्यायाः पठन-पाठने च प्रचलिताः न सन्ति, अतैव मीमांसायाः द्वादशाध्यायाः एव कथ्यन्ते।

---

[4] "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"

[5] मीमांसाश्लोकवार्तिकम्, तर्कपादः, श्लो.सं.11

[6] ब्रह्मसूत्रम्, 1/1/1.

[7] सांख्यसूत्रम्, 1/1

[8] जैमिनीयसूत्रम्,_1/1/1

[9] "अधिकरणसारावलि" श्लो० 15, तथा श्रीरंगरामानुजविरचिता भावप्रकाशिका, पृ.सं.44

## २. वेदार्थनिर्णये मीमांसायाः महत्त्वम्-

यः तत्त्वं ज्ञातुमिच्छति सः वेदानां मूलार्थम् अवबोधनाय सदैव प्रयत्नः करोति, वेदस्य अर्थानां निर्णयः यः व्यक्तिः कव्याकोषादिभिः कर्तुमिच्छति, तस्य इदं साहसमात्रमेव कथ्यते। वेदार्थस्य परिष्कृतस्वरूपं तदैव स्पष्टं भवितुमर्हति, यदा मीमांसायाः पूर्णतया आश्रयः गृह्यते। कुमारिलभट्टसदृशः विद्वांसः वेदार्थज्ञानाय मीमांसायाः महत्त्वं प्रतिपादयन्ति। कुमारिलभट्टः कथयति यत् मीमांसायाः व्याख्याने प्रवृत्तस्य मुख्यकारणं वेदार्थज्ञानस्य वास्तविकस्वरूपस्य परिचयस्य च प्राप्तिः वर्तते। सः कथयति यत् "वेदार्थज्ञानरत्ने मे तृष्णातीव विजृम्भते"[10] अर्थात् वेदार्थज्ञानरत्नस्य प्राप्तये मीमांसादर्शनं प्रधानसाधनं वर्तते। मीमांसा एव वेदस्य शब्दाद् अर्थपर्यन्तं प्रत्येकं विषयं प्रकाशयति। स्मृतिकाराः मुक्तकण्ठेन वदन्ति यत्- "यस्तर्केणानुसन्धत्ते स धर्म वेद नेतरः" "मीमांसासम्मितस्तर्कः सर्ववेदप्रवर्तकः"। मीमांसा वेदस्य तात्पर्यं इतिहासे, भूगोले, आचारस्य अथवा लोकव्यवहारस्य प्रकाशनमात्रे न स्वीकृत्य धर्ममहत्त्वस्य विषयविवेचने स्वीकरोति।

वस्तुतः वेदस्य गरिमा अपि अस्मिन्नेव वर्तते, यत् दुर्लभस्य अज्ञातविषयाणाञ्च निरूपणं स्यादिति। लोकव्यवहारे प्रसिद्धः यत् धर्म वर्तते, तदेव धर्म वेदार्थः वर्तते उत् अस्मात् पृथक्? मीमांसया सम्यक्तया प्रदर्शितं यत्- वेदस्य सरलवाक्येषु अपि कियत् गभीरोऽर्थः वर्तते, इदं मीमांसकाः एव सम्यक्तया अवगन्तुं शक्नुवन्ति। यथा- "अग्निमीले पुरोहितम्"[11] वाक्येऽस्मिन् अग्नेः चर्चा मात्र कृता, किन्तु अग्नेः किं स्वरूपं, कति च तस्याः भेदाः, कस्या अग्नेः आश्रितं किं कर्म वर्तते? इत्येतेषां विषयाणां व्यवस्था श्रृंखला च मीमांसया सज्जीकृता। यथा मूलग्रन्थानां सुव्यवस्थितस्वरूपस्य श्रेयः व्याख्यातृन् प्राप्यते, तथैव निःसंकोचरूपेण वक्तुं शक्यते यत् वैदिकविषयं सरलीकृत्य सुव्यवस्थितञ्च कृत्वा वेदस्य सर्वोपरिमहत्त्वस्य श्रेयः मीमासां प्राप्यते।

वेदाः परस्परम् असम्बद्धाः प्रतीयन्ते, तेषु सम्बन्धः सुश्लिष्टता च मीमांसया एव स्थापिता। अतः वेदार्थस्य पूर्णतया स्पष्टार्थः मीमांसायामेव आश्रितोऽस्ति। "अथातो धर्मजिज्ञासा" सूत्रेऽस्मिन् मीमांसायाः प्रयोजनं धर्मस्य निर्णयः एव जैमिनिना उक्तः। अस्मिन् सूत्रे धर्मशब्दस्य अर्थः वेदार्थः एव वर्तते, एतादृशीं व्याख्यां कृत्वा प्रभाकरमिश्रः इदं स्पष्टं कृतवान् यत् "वेदार्थनिर्णयः" मात्रैव मीमांसायाः एकमात्रोद्देश्यं वर्तते। न्यायदर्शनस्य

---

[10] मीमांसाश्लोकवार्तिकम्, तर्कपादः, श्लो.सं.9

[11] ऋग्वेदः, 1/1/1

प्रमाणनिरूपणे, वैशेषिकस्य पदार्थविश्लेषणे, सांख्ययोगस्य च प्रकृतिपुरुषविवेचने तथा वेदान्तस्य ब्रह्मज्ञानस्य प्रतिपादने यावत् महत्त्वं वर्तते, तस्मादपि अधिकं महत्त्वं मीमांसायाः वेदार्थप्रतिपादने वर्तते। मीमांसासूत्रस्य विशालकलेवरं केवलं वेदार्थनिर्णये एव संलग्नोऽस्ति। वेदान्तदर्शनस्य प्रथमो समन्वयाध्यायः एव ब्रह्मज्ञानयुक्तः वर्तते, किन्तु मीमांसादर्शनस्य सर्वे द्वादशाध्यायाः धर्मसमन्वये अथवा वेदार्थप्रतिपादने समन्वयस्य प्रकाशकाः सन्ति। मीमांसासूत्रकारस्य सम्मुखे वेदार्थस्य वास्तविकस्वरूपस्य प्रतिपादनमेव एकमात्रोद्देश्यम् आसीत्। तस्य सिद्धौ ते सफलाः आसन्। यद्यपि सृष्टि-प्रलयः, आत्मा-परमात्मा च अपि वेदार्थस्य कक्षातः बहिर्नास्ति, तथापि यज्ञयागोपयोगीं वेदार्थमेव सम्भवतः धर्मशब्देन गृहीतः। ब्रह्मज्ञानमनुष्ठेयं नास्ति, अतः तस्य प्रकाशनस्य आवश्यकता मीमांसादर्शने न अभवत्। एतदर्थं वेदार्थप्रकशनादतिरिक्तं मीमांसादर्शनेन स्वक्षेत्रं न विस्तृतम्। वेदभाष्यकारः सायणः ऋगादिवेदानां व्याख्याने मीमांसायाः उपयोगः कृतवान्। “स नः पितेव सूनवेऽग्ने सूपायनो भव। स च स्वा नः स्वस्तये”॥[12] अस्मिन् प्रसङ्गे शास्त्रे देवतास्मरणरूपसंस्कारकर्म अथवा अदृष्टफलकप्रधानकर्म ज्ञेयम्, इति विचारं प्रस्तुत्य मीमांसानियमैः सिद्धः कृतः यत् इदं प्रधानकर्म वर्तते।

अतः अनेन स्पष्टं भवति यत् विना मीमांसया वेदार्थस्य ज्ञानं न भवितुमर्हति, वेदार्थस्य निर्णये मीमांसायाः अत्यावश्यकता वर्तते।

## ३. धर्मशास्त्रे मीमांसायाः महत्त्वम्-

धर्मशास्त्रकारैः वेदविहितस्य मीमांसापरिशोधितस्य च धर्मस्वरूपस्य प्रतिपादनं स्पष्टरूपेण कृतम्। मूलग्रन्थकाराः तु केवलं “मीमांसित्वा”, “मीमांसन्ते” इत्यादीनां शब्दानां प्रयोगः कृतवन्तः। किन्तु टीकाकारैः मीमांसायाः उपयोगः अथवा स्पष्टीकरणं यत्र तत्र कृतम्। यत्र कुत्र मीमांसान्यायस्य स्पष्टप्रतिपादनमपि कृतम्, यथा जीमूतवाहनकृते दयाभागे[13] “द्वयोः प्रणयन्ति” अस्य अधिकरणस्य उल्लेखः प्राप्यते। एवं “सामिधेन्याधिकरणस्य”[14] उपयोगः व्यावहारिकधर्मे अनेन प्रकारेण क्रियते- लोके प्रायः दृश्यते यत् जनाः इच्छापत्रं लिखन्ति। एकः पुरुषः यस्य द्वौ

---

[12] ऋग्वेद, 1/1/9

[13] दायभागः, 11/5/16. पृ.सं.310

[14] मीमांसासूत्रम्, 3/6/2

कुमारौ स्तः सः इच्छापत्रे लिखति यत् मम मरणोपरान्ते मम स्थावरसम्पत्तेः स्वामिनी मम स्त्री भविष्यति, तथा यदा बालकौ युवानौ भविष्यतः तदा एतौ एव सम्पत्तेः स्वामिनौ भविष्यतः।

अस्मिन् लेखे स्त्रीं स्वामिनी निर्देशिता। अनेन सन्देहो भवति यत् किं स्त्री तस्य धनस्य वास्तविकरूपेण स्वामिनी अस्ति? शास्त्रे तु स्त्रीं स्थावरधनस्य विक्रयस्य अधिकारः नास्ति। तर्हि लेखेऽस्मिन् स्वामिन्याः आधारे सा शास्त्रीयनियमस्य उल्लंघनं कर्तुं शक्नोति? अस्मिन् सन्देहे सति अत्र मीमांसानुसारेण इयं व्यवस्था क्रियते यत् "स्त्रीं स्वामिनी" अस्य वचनस्य अभिप्रायः अयं वर्तते यत् यावत् बालकौ युवानौ न भवतः, तावत् तया सम्पत्तेः पूर्णरूपेण रक्षा कुर्यात्। तात्पर्यमिदं वर्तते यत् स्त्रिया सह स्वामिनीशब्दस्य अभिप्रायः प्रबन्धकर्तृणा वर्तते, तथा बालकाभ्यां स्वामिशब्दस्य अर्थः "स्वत्वाधिकारी" अर्थात् स्वामी वर्तते। एकस्मिन् स्थले स्वामिशब्दः स्वस्य पूर्णार्थस्य ज्ञानं कारयति, अन्यस्थले तस्य अर्थः प्रकरणे शास्त्रीयसिद्धान्तानुसारेण च संकुचितः कृतः।

अन्योदाहरणं वर्तते पृथ्वीचन्द्रोदये उद्धृतस्य अग्निपुराणस्य व्रतप्रकरणे वर्तते- "विप्रा भोज्या यथाशक्ति तेभ्यो दद्याच्च दक्षिणांम्"। अत्र "विप्राः" शब्दे यदि एकशेषसमासः स्यात् तर्हि विप्रस्त्रियाः विप्रपुरुषाश्च उभौ ज्ञातुं शक्यते, किन्तु प्रमाणं विना तदपि न कर्तुं शक्यते। एतदर्थं "द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, बहुभ्यो यजमानेभ्यः" अर्थात् द्वौ यजमानौ अथवा बह्वाः यजमानाः प्रतिपत् ऋचां (शास्त्रनामकेषु ऋक्षु प्रथमा ऋचा) कुर्युः। अत्र द्वित्वस्य अथवा बहुत्वस्य सम्पादनं यजमानं तथा तस्य स्त्रीमाधारयित्वा न क्रियते, इति मीमांसाकारस्य तथा महामीमांसकस्य पार्थसारथिनः अपि वचनं वर्तते। इत्थमेव "ब्राह्मणान् भोजयेत्" अस्मिन् वाक्ये ब्राह्मणशब्दे श्रुतवाचनस्य अन्वयः ब्राह्मणेन सह एव भवति, न तु भोजनेन सह। अतः एकैव ब्राह्मणः पुनः-पुनः भोजनाय संकल्पितः भवति, न तु अनेकाः ब्राह्मणाः भोजनस्य सम्पादनं कुर्वन्ति, इति सिद्धान्तः कृतः।

अनेन विवेचनेन स्पष्टं भवति यत् मीमांसारहितस्य धर्मशास्त्रस्य भावानां ज्ञानं तथैव वर्तते, यथा साधनं विना इष्टप्राप्तिः। धर्मशास्त्रग्रन्थेषु परस्परं विरोधः दृश्यते, यस्य उचिता व्यवस्था मीमांसया एव भवितुं शक्यते। अत एव मीमांसां व्याख्यायाः नियमः वक्तुं शक्यते।

## ४. मीमांसाशास्त्रपरिचयः-

मीमांसादर्शनस्य मुख्योद्देश्यं वर्तते सन्दिग्धवेदवाक्यानां तात्पर्यपरिशोधनेन वाक्यार्थस्य निर्णयः। इदं दर्शनं शब्ददृष्ट्या अर्थगरिमया च अत्यन्तविशालं वर्तते। वेदवाक्येषु विचारः, कर्मणः प्रतिपादनञ्च अस्य दर्शनस्य मुख्यप्रतिपाद्यविषयो वर्तते। मीमांसासूत्रस्य **"अथातो धर्मजिज्ञासा"**[15] अनेन सूत्रेण प्रारम्भो भवति। कुमारिलभट्टेनापि उक्तं यत् केवलं धर्मस्य एव मीमांसा इति मीमांसा दर्शनस्य उद्देश्यं प्रतिपाद्यञ्च वर्तते[16]। एवं धर्मेण तात्पर्यमस्ति यत् वेदे विहितः धर्मः तस्य मीमांसा। मीमांसाशास्त्रे वेदवाक्यानि पञ्च-भागेषु- **विधि-मन्त्र-नामधेय-निषेध-अर्थवादेषु** विभज्य विचारः कृतो वर्तते।

निषेधसम्बन्धे प्रश्नोऽयं समायाति यदस्य निषेधस्य पुरुषार्थेन सह को सम्बन्धः? अत्र समाधानमिदं यदनर्थकेभ्यः कर्मभ्यः मनवान् निवार्य तदिष्टप्राप्तौ उपस्थितविघ्नान् अपाकरणाय निषेधवाक्यस्य प्रयोगो भवति। विधिवाक्यैः प्रतिपादितकर्माणि श्रवणादेव यथा बुद्धिः तत्र श्रेयस्करी भवति, ततश्च तस्मिन् मनुष्याणां प्रवृत्तिर्भवति, तथैव निषेधवाक्यश्रवणादेव निषिद्धकर्मणि बुद्धिरनर्थकारिका भवति। एवं तेभ्यः निषिद्धकर्मभ्यः मनुष्याणां निवृत्तिः भवति। अर्थात् निषेधवाक्यं पुरुषमनर्थकारणभूतक्रियाणां सम्पादनात् वारयन्ति[17]। प्रतिषेधैः मनुष्याणां तेषामुद्देश्यानां पूर्तिर्भवति यस्मात् सः अवाञ्छितफलोत्पादकेभ्यः कर्मभ्यः आत्मानं रक्षति। ज्ञातव्यमिदं यत् यथा विधिना स्वर्गपश्वादीनि फलानि उत्पद्यते, तथैव निषेधः किमपि विधानात्मकं फलं नोत्पादयति। उदाहरणार्थे "**न कलञ्जं भक्षयेत् न लशुनं न गृञ्जनम्**" वाक्यमिदं मनुष्यमेतेषां निषिद्धवस्तूनां भक्षणेन निवारयति। यदि एतादृशानि वाक्यानि न अभविष्यन्, तर्हि मनुष्याः एतेषु कर्मष्वपि प्रवृत्तः अभविष्यन् पुनश्च एतस्य परिणामस्वरूपे दुष्परिणामस्य अधिकारी भविष्यन्ति। अतः निषेधवाक्यानामध्ययनमत्यावश्यकम्। येन मनुष्याः दुष्परिणामानां भोगात् संरक्षिताः स्युः। एवञ्च निषेधवाक्ये "नञ्" इत्यस्य अन्वयः कथं, केन सह भवेत् इत्यपि वाक्यानामर्थनिर्धारणाय अत्यावश्यकः। यतोहि यथा विधेः प्रवर्तना अर्थो भवति, तथैव निषेधस्य कथं निवर्तना अर्थो भवति, अध्येतृभ्यः बोधमिदमावश्यकम्।

निषेधवाचकस्य "न" इत्यस्य अन्वयः अव्यवहितधतुना सह युक्तियुक्तमथवा प्रत्ययस्य भावनया सह? प्रश्नोऽयं महत्त्वपूर्णः, यथा- "न भक्षयेत", "न हन्तव्यः" अत्र यदि अव्यवहितधातुना सहैव "न" इत्यस्य अन्वयः स्यात्, तर्हि यथा "यजेत" अस्य अर्थो भवति यागं करोतु इति, तथैव "न यजेत" इत्यस्य यागाभावः करोतु इत्यर्थो भविष्यति। तदा इदं वाक्यं

---

[15] मीमांसासूत्र, १/१/१.

[16] अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम्
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्, श्लोकवार्तिक,प्रतिज्ञासूत्र, श्लो. ११.

[17] निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात्, अर्थसंग्रह,पृ. १५२.

निषेधवाक्यं न भूत्वा विधिवाक्यमेव भविष्यति, किन्तु केनापि दृष्ट्या नोचितमिदम्। अत्र "न" अस्य अन्वयः धात्वर्थेन सह न भवितुमर्हति, यतोहि नियमोऽस्ति यत् कस्यचिदेकस्थलस्य विशेषणं पुनः स्थलान्तरे विशेषणं न भवितुमर्हति[18]। अनेन नियमेन प्रत्ययार्थभावनायां धातोः विशेषणरूपेण सम्बन्धत्वात्, तेन सह अन्यविशेषणभूतपदार्थस्य अन्वयः न भवितुमर्हति। अत एव "न" इत्यस्य अन्वयः भावनावाचकप्रत्ययेन सहैवोचितम्। एवम्प्रकारेण लिङः अर्थः प्रवर्तना वर्तते, तेन सह नस्य अन्वययेन प्रवर्तनाविपरीतनिवर्तनारूपार्थः स्पष्टः।

यतोहि नञः स्वभावो भवति यदयं स्वस्य समीपवर्तिपदार्थस्य विरोध्यर्थस्य बोधको भवति[19]। प्रवर्तना निवर्तना च परस्परमत्यन्तं विरुद्धं विद्यते। अर्थात् विधिनिषेधयोर्मध्ये क्रमशः अश्वमेधस्य ब्रह्महत्यायाश्च सदृशी भिन्नता वर्तते[20]। किन्तु प्रत्ययेन सह नञोऽन्वये सति विघ्नद्वयमुपस्थितं भवति। यथा "तस्य व्रतम्" अस्योपक्रमः, "विकल्प प्रसक्तिश्च" प्रसङ्गेऽस्मिन् नञोऽन्वयः धात्वर्थेन सह भवति तथा च धात्वर्थेन (पूर्वपदेन) सह नञ् पर्युदासाश्रयेण भवति, अथ च प्रत्ययार्थेन (उत्तरपदेन) सह प्रसज्यप्रतिषेधाश्रयेण भवति[21]। नञ्विषययुक्तमस्ति-

**"द्वौ नञौ च समाख्यातौ पर्युदासप्रसज्यकौ।**

**पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥"**

सामान्यतः नञः प्रयोगोऽभावार्थे भवति, किन्त्वयमर्थः समेषां विषयाणामनुकूलो भवितुं नार्हति। नामधात्वर्थयोर्योगे तु नञ् कदापि निषेधार्थको न भवति[22]। यथा- "अब्राह्मणः" इत्यभिधाने ब्राह्मणभिन्नस्य ब्राह्मणसदृशस्य क्षत्रियाद्यर्थस्यैव ग्रहणं भवति। एवम्प्रकारेण स्थलान्तरेष्वपि "नञ्" विभिन्नार्थेषु प्रयुज्यते यथा-

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**

**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥**[23]

---

[18] न ह्यन्योपसर्जनत्वेनोपस्थितमन्यत्रान्वेति, अर्थसंग्रह,पृ. १५३.

[19] नञश्चैष स्वभावो यत्स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्, अर्थसंग्रह,पृ. १५५.

[20] अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः।
दृश्यते तादृगेवेदं विधानप्रतिषेधयोः॥, न्यायसुधा, बृहट्टीका.

[21] पर्युदासः स विज्ञेयो यत्र पूर्वपदेन नञ्।
प्रतिषेधः स विज्ञेयो यत्रोत्तरपदेन नञ्॥, अभियुक्तोक्तिः.

[22]"नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः।
वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ॥", श्लो० वा० अपोहवाद श्लो० ३३.

[23] मीमांसा न्यायप्रकाश, भट्टालंकार टीका, पृ० ४३०.

सादृश्यार्थे नञः प्रयोगोऽनेन प्रकारेण भवति उदाहरणाय यथा- "अब्राह्मणमानय" वाक्येऽस्मिन् अभावार्थे नञः प्रयोगो नास्ति, यतोहि यद्यत्र अभावार्थैव नञः प्रयोगो भवति स्म चेत् अभावन्तं ब्राह्मणस्यानयनं कथञ्चित् न शक्यते येन वाक्यमिदमनर्थकं भवति। अतोऽत्र नञः प्रयोगः सादृश्यार्थे कृतोऽस्ति।

अन्यार्थेऽपि नञः प्रयोगो भवति, यथा- "अमनुष्यं प्राणिनमानय" वाक्येऽस्मिन् अमनुष्यस्य अर्थो मनुष्याभावः नास्ति अपितु मनुष्येतरोऽर्थो वर्तते। अतः मनुष्येतराः ये प्राणिनः सन्ति तानानय इति अस्य वाक्यस्यार्थो भवति।

क्रमेऽस्मिन् न्यूनताऽर्थेऽपि नञः प्रयोगो दृश्यते, उदाहरणार्थे- "अनुदरा कन्या" अस्मिन् वाक्ये अल्पार्थे नञः प्रयोगोऽस्ति। यतोहि यदि अत्र नञः अभावार्थः गृह्यते तर्हि वाक्यमिदमनर्थकं भविष्यति। अतोऽत्र अल्पार्थे नञ् विद्यते येन वाक्यर्थः वर्तते यत् न्यूनोदरमस्ति यस्याः सा कन्या।

अप्राशस्त्यार्थे नञः प्रयोगोऽनेन प्रकारेण दृश्यते, यथा- "ब्राह्मणेऽब्राह्मणोऽयम्" अस्मिन् वाक्ये कस्यचित् ब्राह्मणस्य अयमब्राह्मणोऽस्ति इति सम्बोधने सति तस्य ब्राह्मणस्य निन्दा क्रियते।

विरोधार्थे यथा- "असुरः" शब्देऽस्मिन् नञः प्रयोगो विरोधार्थे कृतः, येन अर्थबोधो भवति यत् ये सुराणां विरोधिनः तेऽसुराः सन्ति, यद्यत्र विरोधार्थे नञ् न भवति तर्हि असुरशब्दस्य अर्थो भवति यः सुरः नास्ति सः असुरः वर्तते, तदा मनुष्येभ्योऽपि असुरशब्दस्य प्रयोगो भवति, कारणमस्ति यत् सुरः (देवः) तु मनुष्याः अपि न सन्ति। अतः अत्र विरोधार्थे नञ् वर्तते। एवम्प्रकारेण अस्माभिर्ज्ञायते यत् नञः प्रयोगः विभिन्नार्थेषु दरीदृश्यते। अतः वाक्यार्थनिर्णये नञः महती भूमिका वर्तते।

प्रस्तुतशोधकार्यस्य विविधान्युद्देश्यानि सन्ति, निषेधवाक्येषु नञर्थस्यान्वयः धात्वर्थेन तथा प्रत्ययार्थेन सह कथं भवति, अस्य सम्यक्तया प्रतिपादनम्, येनार्थनिर्धारणे अध्येतृभ्यः सुगमता भविष्यति, अथ च यथा विधिवाक्यानि प्रवर्तना इत्यर्थं बोधयन्ति, तथैव निषेधवाक्यानि कथं निवर्तना इत्यर्थं बोधयन्ति, अस्य प्रतिपादनमस्य शोधकार्यस्योद्देश्यं वर्तते, एवं यतोहि नञः प्रयोगः विभिन्नवाक्येषु विभिन्नार्थेषु च भवति तर्हि कस्मिन् वाक्ये "नञ्" कस्मिन्नर्थे वर्तते अस्य प्रतिपादनमपि प्रस्तुतशोधकार्यस्य मुख्योद्देश्यं विद्यते, प्रस्तुतशोधकार्येण इदमपि अस्माभिर्ज्ञायते यत् मीमांसेतरशास्त्रेषु निषेधस्य किं स्वरूपमस्तीति।

विद्यमानशोधकार्यस्य सर्वेक्षणानन्तरं ज्ञायते यत् मीमांसायां प्रतिपादितनिषेधमादाय एतावत् पर्यन्तं किमपि कार्यं न दृश्यते। यतोहि “मीमांसकमते शाब्दबोधप्रक्रिया” अस्मिन् शोधकार्ये शाब्दबोधस्य प्रक्रियायां मीमांसकानां मतं किमस्ति, अस्योपर्येव कार्यं कृतमस्ति। अन्ये च पूर्ववर्तिशोधकार्येषु अधिकारविधेरुपरि, अतिदेशस्योपरि च शोधकार्यं कृतं वर्तते। अतः निषेधमादाय कुत्रापि शोधकार्यं न अभवत्। यद्यपि “न्यायमीमांसाशास्त्रानुसारेण विधिनिषेधार्थ विमर्शः” अनेन शोधकार्येण निषेधविषये किञ्चित् शोधकार्यं जातमस्ति, तथापि स्वतन्त्ररूपेण निषेधमादाय एतावत् कोऽपि शोधकार्यं न कृतमस्ति अतः इदमेकं नूतनशोधकार्यं वर्तते।

प्रस्तावितशोधकार्येऽस्मिन् तिसृणां शोधप्रविधीनामश्रयो स्वीक्रियते, यतोहि सर्वप्रथमं मया सर्वेक्षणं कृतम्, यत् मीमांसाशास्त्रेषु कुत्र-कुत्र निषेधस्य अथवा नञर्थस्य चर्चा कृता, एवमन्यशास्त्रेषु कुत्र निषेधस्य विषययुक्तमस्ति, अस्य सर्वेक्षणस्य कृते **सर्वेक्षणात्मकप्रविधेः** आश्रयो गृहीतः, पुनः मीमांसायां प्रयुक्तनिषेधवाक्यानां विश्लेषणमपि कृतः, अतः कार्यमिदं **विश्लेषणात्मकप्रविधया** सुसम्पन्नं भवति, अथ च निषेधवाक्यानां समीक्षणाय **समीक्षणात्मिकायाः** प्रविधेरनुसरणं क्रियते।

शोधकार्यमिदं त्रिष्वध्यायेषु विभक्तम्। प्रथमोऽध्याये वैदिकवाक्यभेदानां विषये विवेचनं कृतम्। तत्र सर्वप्रथमं विधिस्वरूपस्य विमर्शं कृत्वा कथं विधिवाक्येन पुरुषः कस्मिन्नपि कार्ये प्रवृत्तः भवति एवं तस्य किं प्रयोजनं भवति एतस्मिन् विषये सम्यकतया विवेचितम्। पुनः विधेः भेदानां विवेचनं कृतं, एवं कथं विधिना वाक्यार्थस्य बोधो भवति अस्मिन् विषये विश्लेषितम्।

द्वितीयेऽध्याये नञः स्वरूपस्य विषये विवेचनं वर्तते। तत्र विवेचनेऽपि सर्वप्रथमं मीमांसायां प्रतिपादितस्य नञः स्वरूपस्य विषये विवेचितम्। मीमांसायां नञस्वरूपं विवेच्य नञर्थस्य कथं निवर्तना अर्थः भवति, एवं विधिनिषेधयोः भेदाः अपि प्रदर्शिताः।

एवं नञर्थस्य अन्वयः कदा प्रत्ययार्थेन सह भवति, कदा च धात्वर्थेन भवति अस्मिन् विषयेऽपि सम्यकतया प्रतिपादितम्। अस्मिन्नध्याये व्याकरणे नञर्थस्य किं स्वरूपं वर्तते, कथं समस्तपदस्य सर्वनाम संज्ञा भवति एतेषां विषये विवेचनं कृतम्। पुनः न्यायदर्शने प्रयुक्तस्य नञर्थस्य किं स्वरुपं, कथं च नञर्थेन वाक्यार्थबोधो भवति, एतेषां विषयाणां सम्यक्तया प्रतिपादनं अस्य लघुशोधस्य द्वितीयेऽध्याये कृतं वर्तते।

तृतीयेऽध्याये निषेधवाक्यानां विवेचनं कृतम्। अस्मिन्नध्याये नञर्थस्य विभिन्नर्थेषु विचारः कृतः। नञ् केवलं निषधार्थे न प्रयुज्यते अपितु पर्युदासार्थेऽपि प्रयुज्यते अस्य विचारोऽपि अस्मिन्

अध्याये विहितः। पुनः नञर्थस्य षड्प्रकाराणां (सादृश्यम्, अभावः, अन्यत्वम्, अल्पता, अप्राशस्त्यम्, विरोधश्च ) एतेषां विवेचनं विश्लेषणञ्च सम्यक्तया प्रतिपाद्य “अब्राह्मणः” अनेन शब्देन कथं क्षत्रियाद्यर्थः अवबोध्यते, अस्य विवेचनं सम्यक्तया कृतम्। एवं नञर्थस्य प्रत्ययार्थेन अन्वये सति कथं प्रवर्तना अर्थः भवति, तथा च धात्वर्थेन नामार्थेन च अन्वये सति कथं पर्युदासार्थः भवति अस्मिन् विषये प्रमाणैः विवेचनं, विश्लेषणञ्च कृतम्। अनेन प्रकारेण अस्मिन् अध्याये निषेधवाक्यानां प्रभेदानां विवेचनं प्रदर्शितमिति।

# ॥ प्रथमोऽध्यायः ॥

## १. ॥ वैदिकवाक्यभेदविमर्शः ॥

वेदे धर्मस्योपदेशः कृतः, अर्थात् किं कर्तव्यं किमकर्तव्यमस्मिन् विषये वेदः एव निर्दिशति। वेदवाक्यार्थनिर्णये भावनासिद्धान्तः मीमांसादर्शनस्य प्रमुखः सिद्धान्तो वर्तते। वेदवाक्यविहितयागानुष्ठानेन स्वर्गस्य प्राप्तिः भावनाश्रितः भवति, अथवा सम्पूर्णयागविधानस्याश्रयः भावनासिद्धान्तोऽस्ति। विधिवाक्येन यागस्य विधानं कथं भवति? तर्हि भावनायाः स्वरूपं प्रदर्शयति यत् कथं भावनया यागस्य विधानं विधत्ते यथा- "यजेत स्वर्गकामः" विधिवाक्यस्यास्य "यजेत" पदे अंशद्वयमस्ति- "यज्" धातुः एवं "त" प्रत्ययः तस्मिन् द्वितीयांशेऽपि अंशद्वयमस्ति- "आख्यातत्वम्" "लिङ्गम्" च। आख्यातत्वं दशलकारेषु विद्यते, परञ्च लिङ्गं केवलं लिङ्लकारे एव विद्यते। "त" प्रत्यये अंशद्वये सत्यपि तस्मिन् त प्रत्यये विद्यमानेन आख्यातत्वेन लिङ्गेन च भावनायाः अभिधानं भवति। भावनायाः लक्षणं वर्तते यत्- **"भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेष"**[24]**।** अर्थादुत्पत्तिशीलस्य उत्पत्तौ कारणभूतं यत् उत्पादयितायाः मानसिकव्यापरः भवति, सः व्यापारः भावना नाम्ना ज्ञायते। पुनः भावनायाः भेदद्वयं भवति- शाब्दीभावना, अर्थीभावना च। "पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना"[25] अर्थात् प्रयोज्यपुरुषस्य प्रवृत्तेः उत्पत्तौ कारणभूतस्य प्रयोजकपुरुषस्य व्यापारविशेषः एव शाब्दी भावना वर्तते। अस्याः शाब्दीभावनायाः बोधः "लिङ्" अंशेन भवति। यतोहि प्रयोजकपुरुषेण उच्चरितः लिङ्गस्य श्रवणेन अयं मां कर्मणि प्रवर्तयति इति ज्ञानं भवति। अतः अयं मत्प्रवृत्तेः कारणभूतव्यापारवान् अस्ति, इदं नियमतः प्रतीयते। लोके व्यापारोऽयं पुरुषनिष्ठो भवति, किन्तु वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठः एव भवति। वेदस्य विभिन्नाः भागाः सन्ति, येषु भागेषु विभिन्नवाक्यानि सन्ति। यथा- विधि-मन्त्र-नामधेय-अर्थवाद-निषेधात्मकानि। अत्र क्रमशः तेषां वाक्यानां विवेचनं क्रियते-

### १.१ विधिस्वरूपविमर्शः-

वैदिकवचनेषु विधीनां संचयनं वेदस्य साररूपो वर्तते, एवं स अनेकविशिष्टकृत्यान् प्रति निर्देशः करोति। विधेः स्वरूपं कथं ज्ञायते? अस्मिन् विषये शाबरभाष्ये लिखितं वर्तते-

**कुर्यात् क्रियते कर्तव्यं भवेत्स्यादिति पञ्चमम्।**

---

[24] अर्थसंग्रहः, पृ.सं.19

[25] अर्थसंग्रहः, पृ.सं.23

**एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम् ॥**[26]

अर्थात् वेदेषु विधिस्वरूपस्य कानिचन् चिह्नानि सन्ति, यथा- "इदं कार्यमवश्यमेव करिष्यति", "इदं कर्तव्यम्", "इदमवश्यमेव करणीयम्" "एतादृशं भवेत्", एतादृशैः वाक्यैः निष्कर्षोऽयं प्राप्यते यत् विधिः सामान्यरूपेण विधिलिङेन भवति। वर्तमानकाले कापि क्रिया साधारणतया विधिं न प्रदर्शयति। किञ्च यदा-कदा केनचित् वचनेन वर्तमानकालेऽपि विधेः स्वरूपं प्राप्यते। उदाहरणार्थे महापितृपक्षे एकं वैदिकवचनमायाति- "दिष्टगताग्निहोत्रे महापितृयज्ञे वा श्रूयते। अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्योधारयति।"[27] वाक्यमिदमर्थवादस्य वर्तते, किन्त्वत्र विधिरपि ग्रहीतः।

वेदानामनुसरणं कृत्वा स्मृतौ अपि विधीनां व्यवस्था कृताऽस्ति, एवं तद्विधिरूपस्य प्रदर्शनं विधिलिङे अथवा "यत्", "तव्यत्" इत्यादीनि प्रत्ययानि योजयित्वा कृतमस्ति। यथा- "अग्निहोत्रं च जुहुयात्"[28], एवं "चरितव्यमतोः"[29] उभयोः वाक्ययोः विधेः स्वरूपं स्पष्टतया परिलक्ष्यते।

अर्थसङ्ग्रहे विधेः लक्षणं कृतमस्ति यत्- **"अज्ञातार्थज्ञापको वेदभागो विधिः"**[30] तात्पर्यमिदमस्ति यत् वेदस्य यद्भागः अज्ञातर्थस्य ज्ञानं कारयति, सः विधिनाम्ना उच्यते। विधेः सार्थकता इदमेवास्ति यत्- यः प्रयोजनार्थः प्रमाणान्तरैः अज्ञातो भवति, तस्य विधानं विधिरेव करोति। मीमांसान्यायप्रकाशे विधेः विषययुक्तमस्ति यत् विधेः सार्थकताऽस्मिन्नैवास्ति यत् तेन कस्यापि प्रयोजनयुक्तार्थस्यैव विधानं क्रियते, एवं एतादृशार्थस्य विधानं विधत्ते यस्य विधानं प्रमाणान्तरेण न भवितुमर्हति[31]। यथा- **"अग्निहोत्रं जुहुयात् स्वर्गकामः"** अस्यार्थोऽस्ति यत् यः पुरुषः स्वर्गं प्राप्तुं वाञ्छति सः अग्निहोत्रनाम्नः यागस्यानुष्ठानं कुर्वीत। अयं विधिः सप्रयोजनस्य (स्वर्गरूपप्रयोजनफलयुक्तस्य) होमस्य विधानं करोति, यः अन्यप्रमाणैः न प्राप्तुं शक्यते। अग्निहोत्रं जुहुयात् स्वर्गकामः विधिरयं होमक्रियायाः विधानं करोति, अतः अत्रोत्पत्तिविधिरस्ति। केचन् एतादृशाः विधयः भवन्ति, येषु होमादीनां क्रियाणां विधानं न भवति, परञ्च क्रियायाः अङ्गभूतपदार्थानां विधानं भवति। तत्र क्रियायाः ग्रहणं अन्यविधिना भवति। तादृशः विधिः गुणविधिरुच्यते। तस्य लक्षणं क्रियते यत् यत्र कर्मणः विधानं प्रमाणान्तरेण विधत्ते, तत्र विधिः

---

[26] शाबरभाष्य पूर्वमीमांसा सूत्र 4/3/3

[27] पूर्वमीमांसा सूत्रम् 3/4/6

[28] मनुस्मृतिः 4/25

[29] मनुस्मृतिः 11/53

[30] अर्थसङ्ग्रहः पृ.सं.45

[31] "प्रयोजनवदर्थविधानेनार्थवान्", मी.न्या.प्र.,पृ.सं.41

कर्मोद्देश्यं कृत्वा गुणमात्रस्य विधानं करोति[32]। उदाहरणार्थे **दध्ना जुहोति** अत्र जुहोति पदेन बोध्यकर्मणः (यागस्य) प्राप्तिः “अग्निहोत्रं जुहुयात् स्वर्गकामः” अनेन प्रमाणान्तरेण भवति। स्पष्टमिदं यत् अन्यप्रमाणेन प्राप्तं कर्म (होमं) उद्देश्यं कृत्वा गुणस्य (दधि) मात्रस्य विधानं गुणविधिः “दध्ना जुहोति” करोति। अत्र साध्यस्य कर्महोमस्य प्राप्तिः वाक्यान्तरेण भवति, एवं विधानं केवलं साधनस्य दधेः भवति। कश्चिदेतादृशः विधिः भवति, येन गुणस्य कर्मणश्च सहैव विधानं भवति। अनेन विधिना गुणस्य एवं कर्मणः विधानं पृथक्-पृथक् न भूत्वा विशेषण-विशेष्यरुपे च भवति, सः विधिः विशिष्टविधिः कथ्यते। अभिप्रायोऽस्ति यत् यस्मिन् विधिस्थले कर्म-गुणञ्चोभयमप्राप्तं, तत्र विधिः विशिष्टस्य विधानं करोति- **“यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते”**[33]**।** जैमिनिना अप्युक्तं यत् यदि प्रमाणान्तरेण कर्मणः गुणस्य च विधानं नास्ति तर्हि तत्र कर्मणः गुणस्य च विशिष्टविधानं कुर्वीत[34]। यथा- **“सोमेन यजेत”** अत्र सोमगुणस्य एवं यागकर्मणः प्राप्तिः अन्यप्रमाणैः न भवति। अतः अत्र विशिष्टविधानं भविष्यति, विशिष्टविधानेऽपि कर्म (यागं) विशेष्यरुपे एवं गुणं (सोमं) विशेषणरूपे गृह्यते। अत्र यागः कर्म अस्ति यत् प्रधानं वर्तते, यतोहि तस्यैव अनुष्ठानेन इष्टस्य प्राप्तिः भविष्यति, एवं सोमोऽस्ति यागस्यानुष्ठाने साधनभूतगुणः। अतोऽत्र सोमविशिष्टयागस्य विधानं विधत्ते। अस्य शाब्धबोधवाक्यं भविष्यति- **“सोमवता यागेन इष्टं भावयेत्”** इति।

विधेः चत्वारः भेदाः सन्ति- उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति। उत्पत्तिविधेः सर्वप्रथममुपन्यासः एतदर्थं कृतमस्ति, यतोहि अयं विधिः कर्मणः विधानं करोति, यतोहि कर्मणः स्वरूपस्य कर्मविशेषस्य बोधे सत्येव तस्य कर्मणः अनुष्ठानं स्म्भवोऽस्ति, अतः सर्वप्रथमः कर्मस्वरूपबोधकविधेः उत्पत्तिविधेः विवेचनं कृतमस्ति। अनन्तरं तं कर्मानुष्ठानं साधनानामपेक्षा भवति, यत् कैः साधनैः (अङ्गैः) कर्मणः निष्पादनं स्यात्। अनेन प्रकारेण प्रधानाङ्गसम्बन्धबोधकस्य विनियोगविधेः स्थानमुत्पत्तिविधेरनन्तरं भवति। पश्चात् विनियुक्तपदार्थानाम् अनुष्ठानस्यापेक्षा भवति। अतः अनुष्ठानक्रमबोधको प्रयोगविधिः विनियोगविधेरनन्तरं स्थानं प्राप्नोति। कर्मानुष्ठानस्य योग्यः कोऽस्ति? इदं ज्ञानं विना कर्मानुष्ठानं सम्भवः नास्ति, अथवा फलप्रदः न भवति, अतः अधिकारविधेः निरूपणमन्ते क्रियते। तर्ह्यत्र सर्वप्रथमं उत्पत्तिविधेः स्वरूपस्य विवेचनं क्रियते-

---

[32] “यत्र कर्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते”,अ.सं.,पृ.सं.46

[33] मीमांसान्यायप्रकाशः, पृ.सं. 45

[34] “तद्गुणास्तु विधीयेरन्नविभागाद्विधाने न चेदन्येन शिष्टाः” जै.सू. 1/4/9

### १.१.१ उत्पत्तिविधिस्वरूपविवेचनम्-

यः कर्मणः स्वरूपमात्रस्य ज्ञानं कारयति सः उत्पत्तिविधिरस्ति[35]। उत्पत्तिविधेः विशेषता इदमस्ति यत् अयं विधिः सर्वदा प्रधानक्रियायाः विधानं करोति। अतः इमं प्रधानविधिः एवं अपूर्वविधिः अपि कथ्यते, यथा- "अग्निहोत्रं जुहोति" अयं विधिरुत्पत्तिविधिरस्ति, यतोहि अत्र "अग्निहोत्र" नाम्नः मुख्यक्रियायाः विधानं कृतमस्ति, अन्याः क्रियाः अस्य मुख्ययागस्य अङ्गरुपे भवन्ति, यस्य विधायकवाक्यानि उत्पत्तिविधेः पृथक् भवन्ति। अत्र शङ्का भवति यत् यागस्य लक्षणं वर्तते **"उद्दिश्य देवतां द्रव्यत्यागो यागोऽभिधीयते"**[36] अतः यागस्य रुपद्वयं वर्तते- द्रव्यं देवता च किञ्च "अग्निहोत्रं जुहोति" वाक्येऽस्मिन् द्रव्यस्य अथवा देवतायाः उभयोरेव रूपयोः एकस्यापि ग्रहणं नास्ति, तर्हि कथं अयमुत्पत्तिविधिः स्वीक्रियते? "अग्निहोत्र" शब्दः यागस्य नाममत्रमस्ति। उत्तर पक्षेणास्याः शङ्कायाः समाधनं क्रियते यत् यद्यपि "अग्निहोत्रं जुहोति" वाक्येऽस्मिन् साक्षाद्रूपेणैकस्यापि रूपस्य प्राप्तिर्न भवति, तथापि अर्थापत्तिप्रमाणेन द्रव्यदेवतायाश्च प्राप्तिर्भवत्येव। यतोहि द्रव्यदेवतायाश्च उपस्थितिं विना यागः सम्पन्न एव न भवितुमार्हति, अतः उभयोः रूपयोरनुमितिः करणीयः[37]। एवं इदमप्यावश्यकं नास्ति यत् यस्मिन् विधौ रूपस्य श्रवणं स्यात्, सः विधिः उत्पत्तिविधिः भविष्यत्येव। अन्यथा "दध्ना जुहोति" अयमपि उत्पत्तिविधिः भविष्यति, यतोहि अत्र "दधि" नाम्नः द्रव्यात्मकरूपस्य श्रवणं भवति, किन्तु वस्तुतः अत्र उत्पत्तिविधिः न भवति।

### १.१.२ विनियोगविधिस्वरूपविवेचनम्-

येन विधिना अङ्गस्य (गुणस्य), अङ्ग्याः (प्रधानस्य) च सम्बन्धस्य ज्ञानं भवति, तं विधिं विनियोगविधिः कथ्यते[38]। विनियोगविधिः अङ्गाङ्गिभावस्य ज्ञानं कारयति। अनेनैव विधिना अस्माभिर्ज्ञायिते यत् कस्मिन् स्थलविशेषे कः कस्याङ्गः(गुणः) अस्ति, एवं कः कस्याङ्गी (प्रधानः) अस्ति। अङ्गस्यार्थो भवति यत् यः अन्यकृते भवति अर्थात् साधनरुपः[39]। अथाङ्ग्याः अर्थो भवति यत् यस्य साधनो स्यादर्थात् साध्यरूपः अथवा मुख्यरुपः। साध्यरूपः मुख्यः भवति एवं तत्साधनभूताङ्गः तदपेक्षया गौणो भवति। एतदर्थं अङ्गं गुणशब्देनोच्यते। अस्य विनियोगविधेरुदाहरणं वर्तते- "दध्ना जुहोति" वाक्येऽस्मिन् दध्ना पदे तृतीया विभक्तिरस्ति, अनया

---

[35] "कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः" मी.न्या.प्र. पृ.सं. 113

[36] "ऐतरेय ब्राह्मण" सायणभाष्य, 1.1

[37] "यद्यप्यत्र कर्मणो रूपं न श्रूयते, तथापि विध्यन्यथानुपपत्त्या तत्कल्प्यते।" कौमुदी, पृ.सं.130

[38] "अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः", अर्थसंग्रह पृ.सं.63

[39] "अङ्गत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते" मी.न्या.प्र. पृ.सं.120

विभक्त्या करणत्वस्य बोधो भूयते। अर्थात् "दध्ना" अत्र तृतीयाविभक्त्या ज्ञातं भवति यत् दधि कारणं, साधनं, अङ्गरुपम् अस्ति। अतः "दध्ना जुहोति" अनेन विधिना स्पष्टं भवति यत् अयमङ्गः सन्निधिप्राप्तः "जुहोति" अस्य धात्वर्थस्य (होमस्य) एव अस्ति। अनेन प्रकारेण "दध्ना जुहोति" अनेन विधिना दधेः होमस्य च अङ्गाङ्गिभावसम्बन्धः ज्ञायते। एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि सन्ति, एतैरेव षट् प्रमाणैः विनियोगविधिना अङ्गाङ्ग्याः ज्ञानं भवति। एतेषां षद्रमाणानां विवेचनं क्रमशः क्रियते-

## १.१.२.१ श्रुतिप्रमाणेन अङ्गाङ्गिविचारः-

अस्यलक्षणमस्ति यत्- **"निरपेक्षो रवः श्रुतिः"**[40] अर्थात् यया प्रामाणान्तरस्यापेक्षा न क्रियते सा श्रुतिरस्ति। श्रुति-लिङ्गादिषु षट् प्रमाणेषु लिङ्गादिपञ्चप्रमाणानि सम्बन्धबोधनाय स्वपूर्वप्रमाणस्यापेक्षा भवति। उदाहरणार्थे "लिङ्ग" प्रमाणेन साक्षादङ्गाङ्गिभावसम्बन्धस्य बोधः न भवितुं शक्यते। तं श्रुतेरपेक्षा भवति। लिङ्गेन श्रुतेः कल्पना क्रियते, एवं तत्कल्पितश्रुत्या अङ्गाङ्गिसम्बन्धस्य बोधो भवति[41]। अत्र सर्वप्रथमं वाक्यं लिङ्गस्यापेक्षा भवति, लिङ्गेन श्रुतिः कल्प्यतेऽनन्तरं कल्पितश्रुत्या अङ्गत्वं बोध्यते[42]। श्रुति-लिङ्गादिषु षद्रमाणेषु प्रत्येकं प्रमाणं परवर्तिप्रमाणेभ्योऽपेक्षाकृतमधिकः बलवान् भवति। अत्र श्रुतिः प्रथमं प्रमाणं वर्तते। अतः श्रुतिप्रमाणम् उत्तरवर्तीलिङ्गप्रमाणात् बलवानमस्ति। लिङ्गप्रमाणं वाक्यात् तु बलवानं वर्तते, किन्तु श्रुतेः दुर्बलमस्ति। अनेनैव प्रकारेण अन्यप्रमाणानां विषये ज्ञातव्यम्। अन्तिमं समाख्याप्रमाणं सर्वापेक्षया दुर्बलमस्ति। अनेनेदमपि ज्ञायते यत् श्रुतिप्रमाणं लिङ्गादिप्रमाणेभ्यः बलवान् अस्ति[43]।

## १.१.२.२ लिङ्गप्रमाणेन अङ्गाङ्गिविवेचनम्-

**"शब्दसामर्थ्यं लिङ्गम्"**[44] अर्थात् शब्दस्य अभिधाशक्तिं लिङ्गमुच्यते। कुमारिलभट्टेनापि उक्तं यत्- "सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते"[45] तात्पर्यमस्ति यत् सर्वेषु शब्देषु विद्यमानं सामर्थ्यम् अथवा अभिधाशक्तिं लिङ्गं कथ्यते। अत्राभिधायाः अर्थः रूढिः इति ज्ञातव्यः, न तु यौगिकः। या शब्दस्यावयवानां शक्तिः न अपितु सम्पूर्णशब्दसमुदायस्य शक्तिरस्ति सा

---

[40] अर्थसंग्रहः, पृ.सं.71

[41] "लिङ्गादिषु हि न प्रत्यक्षो विनियोजकश्सब्दोऽस्ति, किं तु कल्प्यः" मी.न्या.प्र. वि. 37,पृ.सं.168

[42] "तदिदं लिङ्गं वाक्यादिभ्यो बलवत्। तेषां हि न साक्षाद्विनियोजकत्वम्, किं तु लिङ्गं श्रुतिं च कल्पयित्वा" मी.न्या.प्र. वि.43,पृ.सं.189

[43] श्रुतिर्लिङ्गादिभ्य प्रबला, अर्थसंग्रहः, पृ.सं.86.

[44] मीमांसान्यायप्रकाशः, पृ.सं.170.

[45] तन्त्रवार्तिकम्,

रूढ़िशक्तिः[46]। एवं यत्र शब्दस्य अवयवशक्तिना अर्थबोधो भवति तत्र यौगशक्तिः विद्यते[47]। यथा "कुशलः" शब्दस्यास्य रूढ़ार्थः "दक्षः" अस्ति, तथा च यौगिकार्थः कुशान् लातीति वर्तते।

तात्पर्यमिदमस्ति यदत्र लिङ्गशब्दस्य रूढ़ार्थबोधनसामर्थ्यमस्ति। यद्यपि कस्यापि शब्दस्य रूढ़ार्थः एवं यौगिकार्थः उभावेव भवितुमर्हति, किन्तु रूढ़्यर्थः मुख्यो भवति, एवं यौगिकार्थः गौणः। रूढ़्यर्थस्य बुद्धौ प्रथमतया प्रतीतिर्भवति, अनन्तरं यौगिकार्थस्य। अतः रूढ़्यर्थलिङ्गेन विनियोगः शीघ्रः भूयते। यदि कस्मिन्नपि स्थलविशेषे विभिन्नविषयाणामवबोधनाय प्रमाणद्वयस्यैकस्मिन्नेव काले उपस्थितिर्भवति, तर्हि लिङ्गेनैव विनियोगः भूयते न तु समाख्यया, यतोहि लिङ्गप्रमाणं विनियोगस्य ज्ञानं शीघ्रं कारयति। लिङ्गेन मन्त्रस्य विनियोगबोधे सर्वप्रथमं मन्त्रस्य स्वाभिधेयार्थस्य प्रतिपादनं भवति, तत्पश्चात् वस्तुप्रकाशनसामर्थ्यस्य निरूपणं भवति, अनन्तरमङ्गाङ्गिभावबोधकश्रुतिकल्पना भूत्वा अन्ते विनियोगविधिः भवति। **"वर्हिर्देवसदनं दामि"**[48] मन्त्रोऽयमस्योदाहरणे प्रयुक्तमस्ति।

## १.१.२.३ वाक्यप्रमाणेन अङ्गाङ्गिविमर्शः-

वाक्यप्रमाणेन कथम् अङ्गाङ्गिभावस्य बोधो भवति तस्य निरूपणे सर्वप्रथमं वाक्यस्य लक्षणं क्रियते यत्- **"समभिव्याहारो वाक्यम्"**[49] अर्थात् सम्बद्धोच्चारणं वाक्यमवधीयते। समभिव्याहारपदेन तात्पर्यं वर्तते यत्- **"साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोस्सहोच्चारणम्"**[50] अर्थात् साध्यादेः वाचकानां द्वितीयादिपदानामभावे अङ्गाङ्ग्याः वाचकपदानां सहोच्चारणं वाक्यमुच्यते। अत्र शङ्का जायते यत् कस्य सहोच्चारणं भवति? समाधानं क्रियते यत्- **"शेषशेषिणोः अङ्गाङ्गिनोः। तद्वाचकपदयोरिति यावत्"**[51] अर्थादत्र शेषशेषिभ्यामनयोः वाचकपदानि बोधव्यानि, यतोहि उच्चारणं पदानामेव भवितुमर्हति न तु पदार्थानां। अस्योदाहरणं वर्तते- **"यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं श्रृणोति"** मन्त्रेऽस्मिन् "पर्णमयी" एवं "जुहू" अनयोः पदयोः सहोच्चार्यमाणम् अर्थात् अव्यवधानेनोच्चारणं वर्तते, एवमुभे एव पदे अङ्गाङ्ग्योश्च बोधके स्तः। पूर्वं पदं पर्णमयतारुपाङ्गस्य बोधकोऽस्ति, एवं परवर्ती जुहूपदं अङ्गीभूतस्य खण्डितघृतपात्रस्य बोधकः वर्तते। अस्मिन् मन्त्रे पर्णमयी एवं जुहूः अनयोः उच्चारणमव्यवहितत्वेन वर्तते, एतदर्थम् अनयोः अर्थयोर्मध्ये

---

[46] "यत्रावयवशक्तिनैरपेक्षेण समुदायशक्तिमात्रेण बुध्यते तद्रूढ़म्" न्या.सि.मु.81

[47] "यत्रावयवार्थ एव बुध्यते तद्यौगिकम्" न्या.सि.मु.81

[48] मीमांसान्यायप्रकाशः, पृ.सं.180.

[49] अर्थसंग्रहः, पृ.सं.97.

[50] मीमांसान्यायप्रकाशः, पृ.सं.192.

[51] सारविवेचनी, पृ.सं.44

परस्परमङ्गाङ्गिभावरूपसम्बन्धः अनुमीयते। "पर्णता" अर्थात् पलाशनिर्मितत्वम् "जुहू" इत्यस्याङ्गं वर्तते। जुहोः निर्माणं यदि पर्णेन भविष्यति, तर्हि तस्मिन् पर्णमयता समवेतः भवितुमर्हति।

## १.१.२.४ प्रकरणप्रमाणेन अङ्गाङ्गिविवेचनम्-

द्वयोः वाक्ययोः परस्पराकाङ्क्षा प्रकरणमुच्यते[52]। अत्र एकं वाक्यं फलसाधनभूतक्रियायाः सम्पादनस्य प्रकारं विदधाति न साध्यफलस्य, एतदर्थं तं पदं क्रियाजन्यफल्स्य आकङ्क्षा भवति। अन्यद्वाक्यं फलस्य निर्देशः करोति, न तु तत्फलस्य साधनभूतक्रियायाः विधानं करोति, अतैव इदं कथंभावः अस्य प्रकारस्य क्रियायाः आकाङ्क्षा भवति। अनेन प्रकारेण उभे वाक्ये परस्परं साकाङ्क्षं भवतः। इयमेवाकाङ्क्षा प्रकरण नाम्ना उच्यते। यथा- प्रयाजयागानां प्रसङ्गे **"समिधो यजति"** "तनूनपातं यजति" इत्यादयः क्रियाविधायकवाक्यानि सन्ति। उक्तवाक्येषु केवलं क्रियाणां विधानं वर्तते। अत्र समिद्यागस्य विधानं तु अस्ति किन्तु तस्य फलस्य निर्देशः न कृतः, अतैव "समिधो यजति" अस्य अर्थबोधवाक्यं "समिद्यागेन भावयेत्" इति सत्वात् किं भावयेत्? अस्य प्रकारस्योपकार्यस्य अर्थात् फलस्य आकाङ्क्षा भवति। अस्मिन् प्रकरणवाक्ये तु फलस्या-काङ्क्षा वर्तते, अन्यत्र साधनभूतक्रियायाः अपि आकाङ्क्षा भवति। यथा- **"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"** अस्य विधिवाक्यस्य दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति वाक्यार्थबोधे सति, कथं भावयेत्? अनेन प्राकारेण उपकारकस्य (साधनस्य) आकाङ्क्षा भवति। अनेन प्रकारेण स्पष्टं भवति यत् यत्र वाक्यद्वयस्य परस्परमाकाङ्क्षा भवति तदेव प्रकरणमुच्यते। तच्च प्रकरणं द्विविधम्- महाप्रकरणमवान्तरप्रकरणं चेति[53]। **"तत्र फलभावनायाः प्रकरणं महाप्रकरणम्"**[54] अर्थात् यत्र प्रकरणं फलभावनया सह सम्बद्धो भवति, तत् प्रकरणं महाप्रकरणं बोधव्यम्। अभिप्रायोऽयं यत्- तत् प्रकरणं यस्य सम्बन्धः मुख्यभावनया (यस्य साध्यं मुख्यफलं) स्यात् तदेव महाप्रकरणं भवति **"मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणं"**[55]। अस्योदाहरणं यथा- "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" स्थलेऽस्मिन् फलभावना एव मुख्यभावना वर्तते, अतोऽत्र महाप्रकरणमस्ति। एवमेते प्रकरणे प्रकृतियागे एव भवति, न तु विकृतियागे। यतोहि विकृतियागे उभयाकाङ्क्षा न भवति। अवान्तरप्रकरणस्य लक्षणं क्रियते यत्- **"अङ्गभावनासम्बन्धिप्रकरण-मवान्तरप्रकरणम्"**[56] अर्थात् अङ्गभावनया सम्बन्धितं प्रकरणम् अवान्तरप्रकरणमुच्यते।

---

[52] उभयाकाङ्क्षा प्रकरणम्. मीमांसान्यायप्रकाशः, पृ.सं. 205.

[53] अर्थसंग्रहः, पृ.सं.108.

[54] मीमांसान्यायप्रकाशः, पृ.सं.222.

[55] अर्थसंग्रहः, पृ.सं.108.

[56] अर्थसंग्रहः, पृ.सं.111.

अनेनैवावान्तरप्रकरणेनाभिक्रमणादयः क्रियाः प्रयाजादियागानामङ्गत्वरूपेण ज्ञायन्ते। उक्तमपि- **“फलभावनाया अन्तराले यदङ्गभावनायाः प्रकरणं तदवान्तरप्रकरणम्”**[57]**।** उदाहरणार्थे दर्शपूर्णमासस्याङ्गरूपे प्रयाजादिक्रियाणां “प्रयाजाः कर्तव्याः” अनेन प्रकारेण विधानमस्ति। प्रसङ्गेऽस्मिन् “अभिक्रमण” परिभ्रमणमित्यादिक्रियाणां विधानं वर्तते। अतैव प्रयाजैः कथं भावयेत्? इति कथंभावाकाङ्क्षा एवम् अभिक्रमणादिभिः किं भावयेत्? इति उपकार्याकाङ्क्षा भवति। अतः अत्र परस्परमुभयाकाङ्क्षा स्पष्टरूपेण वर्तते।

## १.१.२.५ स्थानप्रमाणेन अङ्गाङ्गिविवेचनम्-

**“देशसामान्यं स्थानम्”**[58] अर्थात् द्वयोः पदार्थयोः एकैव देशः स्थानप्रमाणं भवति। तत् स्थानं द्विविधं भवति- पाठसादेश्यमनुष्ठानसादेश्यं च। कुमारिलभट्टेनापि उक्तं यत्-

**तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः।**

**पाठानुष्ठानसादेश्याद्विनियोगस्य कारणम्॥**[59]

स्थानशब्दः क्रमशब्दश्च एतौ पर्यायौ वर्तेते। अस्यां कारिकायां स्थानशब्दस्य स्थले क्रमशब्दस्य प्रयोगः कृतः, पुनः पाठसादेश्यमपि द्विविधम्- यथासंख्यपाठः, सन्निधिपाठश्च। यथासंख्यपाठेन विहितं विनियोगोदाहरणम्  अनेन प्रकारेण ज्ञातव्यम्- ऐन्द्राग्नमेकादशकपालं निर्वपेत् एवं वैश्वानरं द्वादशकपालं निर्वपेत् अनयोः पाठः क्रमशः प्राप्यते। उक्तविधिवाक्ययोरनन्तरम् “इन्द्राग्नी रोचना दिवः” इत्यादीनां याज्यानुवाक्यमन्त्राणां पाठः प्राप्यते। अथ यथासंख्यपाठेन बोधोऽयं भवति यत् प्रथममन्त्रः प्रथमविधिबोध्यक्रियायाः अङ्गम् अस्ति एवं द्वितीयमन्त्रः द्वितीयविधिबोध्यक्रियायाः अङ्गमस्ति। अतः अत्र यथासंख्यपाठेन स्पष्टं भवति यत् यथा मन्त्रः प्रथमस्थाने वर्तते तथैव क्रिया अपि प्रथमस्थानीया भवति। सन्निधिपाठात्तु यानि वैकृतान्यङ्गानि प्राकृताङ्गानुवादेन विहितानि तेषां विकृतौ विनियोगः भवति। यथा- अमनसे स्वाहा, रेतस्विने स्वाहा इत्यादयः आमनहोमाः। पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् अर्थात् अनुष्ठानसादेश्यसंज्ञकस्थानप्राणेन इदं ज्ञायते यत् उपाकरणनियोजनादयः याः क्रियाः यागसम्पादनकाले पशुषु प्रयुक्ताः भवन्ति, ताः क्रियाः अग्नीषोमीयस्य पशोः अङ्गानि भवन्ति।

---

[57] मीमांसान्यायप्रकाशः, पृ.सं.248.

[58] अर्थसंग्रहः, पृ.सं.120

[59] तन्त्रवार्तिक,3/3/5.

### १.१.२.६ समाख्यप्रमाणेन अङ्गाङ्गिविवेचनम्-

यौगिकशब्दः “समाख्या” उच्यते[60]। सा द्विविधा वैदिकी लौकिकी च। द्वे समाख्ये विनियोगविधौ विधेः सहायं कुरुतः। **होतृचमस** अनया वैदिकीसमाख्यया होता नाम ऋत्विक् चमसभक्षणरूपक्रियायाः अङ्गं ज्ञायते[61]। **आध्वर्यवमनया** लौकिकीसमाख्यया अध्वर्यु नामऋत्विक् तत्तत्क्रियाणां अङ्गं ज्ञायते। लौकिकसमाख्या वेदे साक्षाद्रूपेण न पठिता, अपितु याज्ञिकैः निष्पन्ना भवति[62]।

अनेन प्रकारेण विनियोगविधिना अङ्गाङ्गिभावबोधे साहायभूतानां श्रुत्यादीनां षद्रमाणानां सूक्ष्मतया विवेचनं कृतम्। अथ विनियोगविधिना विनियुक्ताङ्गानां विभाजनं क्रियते। विनियोगविधिना यानि अङ्गानि विनियोज्यन्ते तानि द्विविधानि- सिद्धरुपाङ्गं, क्रियारूपाङ्गञ्च। एतेषु जातिद्रव्यसंख्यादीनि सिद्धरूपाङ्गानि सन्ति, एतेषां प्रयोजनं प्रत्यक्षमेव भवति। क्रियारुपाङ्गस्य भेदद्वयं वर्तते- गुणकर्माणि प्रधानकर्माणि च। एतेषु गुणकर्म “सन्निपत्योपकारकं कर्म” एवं प्रधानकर्म “आरादुपकारकं कर्म” कथ्यते।

**कर्माङ्गद्रव्याद्युद्देश्येन विधीयमानं कर्म सन्निपत्योपकारकम्[63]।** अर्थात् कर्मणः अङ्गभूतद्रव्यादीनि उद्देश्यं कृत्वा यस्य विधानं क्रियते तत् सन्निपत्योपकारकं कर्म भवति। यथा- अवघातप्रोक्षणादि सन्निपत्योपकारककर्म सन्ति। सन्निपत्योपकारककर्मणः भेदत्रयं भवति- दृष्टार्थम्, अदृष्टार्थम्, दृष्टादृष्टार्थञ्च। एषु दृष्टार्थककर्मणः उदाहरणमवघातादि, अदृष्टार्थककर्मणः प्रोक्षणादि, एवं दृष्टादृष्टार्थककर्मणः उदाहरणं पशुपुरोडाशः सन्ति। पशुं पुरोडाशं च दृष्टादृष्टार्थकमेतदर्थं कथ्यते यतोहि एतयोः दृष्टमदृष्टञ्च उभयोः प्रकारयोः प्रयोजनं भवति। द्रव्यत्यागांशे तु पशुप्रोडाशयोः प्रयोजनमदृष्टं वर्तते एवम् आभ्यां “देवतायाः स्मरणं” रूपदृष्टप्रयोजनमपि सिद्धं भवति, अतैव अंशेऽस्मिन् एते दृष्टार्थकमपि सन्ति, अनेन प्रकारेण पशुपुरोडाशादियागः दृष्टादृष्टार्थकस्य उदाहरणं वर्तते।

**द्रव्याद्यनुदिश्य केवलं विधीयमानं कर्म आरादुपकारकम्[64]।** तत् कर्म यस्य विधानं कस्यापि द्रव्यादेः अङ्गरूपे न भवति अपितु कर्मणः रूपे एव भवति, तदारादुपकारकं कथ्यते[65]।

---

[60] समाख्या यौगिकः शब्दः। मीमांसान्यायप्रकाशः, पृ.सं.280.

[61] भक्षणस्य क्रियात्मकत्वेन प्राधान्यात्तत्कर्तुर्भवति। तदङ्गत्वमित्यर्थः। (कौमुदी) पृ.सं.123

[62] याज्ञिकैः परिकल्पितयेत्यर्थः। (कौमुदी), पृ.सं.125

[63] मीमांसान्यायप्रकाशः पृ.सं.281

[64] अर्थसंग्रहः, पृ.सं.135.

[65] “आरात् साक्षात् द्रव्यादिसम्बन्धमन्तरा उपकुर्वन्तीत्यारादुपकारकाणि”, सारविवेचनी, पृ.सं. 82

प्रयाजनाम्नः यागस्य विधानं "प्रयाजाः कर्तव्याः" अनेन विधिना भवति। अत्र केवलं प्रयाजसंज्ञककर्माणामेव विधानं वर्तते। प्रयाजः द्रव्यादेः अङ्गं नास्ति, अपितु द्रव्यादि एव प्रयाजस्य अङ्गं भवति। प्रयाजः केवलं प्रधानयागदर्शपूर्णमासस्य एव अङ्गं वर्तते। दर्शपूर्णमासस्यानुष्ठानेन फलापूर्वमर्थात् परमापूर्वमुत्पद्यते। अनेनैव परमापूर्वेण स्वर्गस्य प्राप्तिः भवति। अभिप्रायोऽयं वर्तते यत् आरादुपकारकं कर्म प्रधानयागस्य एव अङ्गं भवति। आरादुपकारकं कर्म मुख्यापूर्वस्य उत्पत्तौ सहायकं भवति, किन्तु सन्निपत्योपकारककर्म द्रव्यदेवतायाश्च संस्कारैः यागस्य स्वरूपेऽपि कार्यं करोति। एतदेव उभयोः भिन्नता वर्तते।

## १.१.३ प्रयोगविधिस्वरूपविमर्शः-

येन विधिना अनुष्ठानस्य शीघ्रतायाः बोधो भवति, सः प्रयोगविधिरुच्यते[66]। सः विधिः येन प्रयोगस्य अर्थात् कर्मानुष्ठानस्य ज्ञानं भवति। कर्मानुष्ठानमपि तदैव भवितुमर्हति यदा सम्पूर्णसामग्रीणां सत्यपि अङ्गक्रियाणां क्रमस्य ज्ञानं स्यात्, यतोहि विना क्रमबोधेन कस्याः क्रियायाः कदा सम्पादनं करणीयम्, पूर्वं कस्याः क्रियायाः सम्पादनं कर्तव्यमिति अनेन प्रकारेण अत्र कर्माणां क्रमनिर्णये सन्देहः भवति। अतः अस्यैव अङ्गकर्माणां क्रमनिर्णये प्रयोगविधेः उपयोगः भवति। कर्माणां क्रमस्य ज्ञाने सति कर्माणां सम्पादने शीघ्रता (प्राशुभावः) भवति। यदा अङ्गकर्माणां सम्पादने शीघ्रता भवति, तदा प्रधानकर्म अपि तैः अङ्गकर्मभिः सहभावत्वेन सम्पादितं भवति। प्रधानकर्मणः सम्पादनम् अङ्गकर्माणां सम्पादने सत्येव भवति। उदाहरणं यथा- **"वेदं कृत्वा वेदिं करोति", "अश्विनो दशमो गृह्यते"** इत्यादिषु प्रधानकर्मणः श्रवणं नास्ति, अत्र अङ्गकर्माणामेव उदाहरणं दत्तम्। अयं विधिः न अन्यविधिरस्ति अपितु अङ्गवाक्यैः मिलित्वा एकवाक्यरूपे स्थितः उत्पत्तिविधिरेव अस्ति। अङ्गैः सह प्रधानक्रियायाः अनुष्ठानं क्रियमाणः प्रयोगविधिः अविलम्बेन अर्थात् क्रियायाः शीघ्रतायाः विधानं करोति। यतोहि यदि क्रियाः विलम्बेन अनुष्ठीयन्ते, तर्हि तया एकवाक्यतया ज्ञेयमानः "अङ्गस्य एवं प्रधानस्य सहभावः" सम्पन्नः न भविष्यति। अतः उक्तमपि- **"अङ्गानां क्रमबोधको विधिः प्रयोगविधिः"**[67]। अत्र लक्षणे क्रमो नाम विततिविशेषः, पौर्वापर्यरूपो वा। क्रमस्य निर्णये षट् प्रमाणानि सन्ति- श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि।

[66] "प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः", मीमांसान्यायप्रकाशः, पृ.सं.300.

[67] अर्थसंग्रहः, पृ.सं.137.

## १.१.३.१ श्रुतिप्रमाणेन पौर्वापर्यादिविवेचनम्-

**तत्र क्रमपरवचनं श्रुतिः**[68] अर्थात् शब्दैः क्रमस्य कथनं श्रुतिप्रमाणेन भवति। तत् द्विविधं- केवलक्रमपरं, क्रमविशिष्टपदार्थपरञ्च। केवलक्रमपरकश्रुतेः उदाहरणं वर्तते- **"वेदं कृत्वा वेदिं करोति"** अत्र वेद (कुशमुष्टि) एवं वेदी अनयोः रचनायाः विधानम् अन्यैः विधिवाक्यैः प्राप्यते, अत्र केवलक्रमस्य- अर्थात् कस्याः अनन्तरं काः क्रियाः अनुष्ठीयते अस्यैव विधानं "क्त्वा" प्रत्ययेन भवति। क्रमविशिष्टपदार्थपरकश्रुतेः उदाहरणं वर्तते- **"वषट्कर्तुः प्रथमभक्षः"** इयं श्रुतिः विशिष्टा एतदर्थमस्ति यतोह्यत्र प्राथम्यरूपक्रमस्य ख्यापनं "भक्षः" श्रुतिः विशेषणरूपे करोति। वस्तुतः अत्र विधानं तु भक्षणस्यैवास्ति यतोहि भक्षणस्य प्राप्तिः अन्यविधिनासम्भवा, एवं प्राथम्यं भक्षणस्य विशेषणं वर्तते। अनेन प्रकारेण प्राथम्यविशिष्टभक्षणस्य विधानं इयं श्रुतिः करोति, इयं श्रुतिरितरप्रमाणापेक्षया बलवती भवति, **"क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च"**[69]।

## १.१.३.२ अर्थप्रमाणेन पौर्वापर्यविवेचनम्-

**यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः**[70]**।** अत्र अर्थशब्दस्य अभिप्रेतार्थः प्रयोजनं वर्तते। अतः यः क्रमः प्रयोजनस्य आधारे भवति, सोऽर्थक्रमः कथ्यते। यथा- **"अग्निहोत्रं जुहोति यवागूं पचति"** अनयोः विधिवाक्यस्थलयोः पाठक्रमस्य दृष्ट्या "अग्निहोत्रं होम" इति पूर्वं विहितमस्ति एवं "यवागूपाकः" अन्ते विहितः। अत्र क्रमस्य निर्धारणम् अर्थपाठेन भवति। यतोहि यवागूपाकः अस्य प्रयोजनं अग्निहोत्रहोमस्य कार्यसम्पादने भवति, अनेनोद्देश्येन यवागूपाकः अग्निहोत्रहोमस्य पूर्वं क्रियते। "यवाग्वाग्निहोत्रं जुहोतीतिवाक्येन अग्निहोत्रहोमोद्देश्येन यवाग्वा विधानादिति भावः"[71]। तथा पाठं क्रमं कल्पयन् वस्तुसामर्थ्यमनुसृत्यैव कल्पयति। एवं यवाग्वाः अग्निहोत्रमनुष्ठातुं पूर्वम् असमर्थं वर्तते। द्रव्यमन्तरेण होमासम्भवात्। तस्मात् पाठेन वस्तुसामर्थ्यलक्षणोऽर्थः उपजीव्यत इत्यर्थस्य पाठात्प्राबल्यम्[72]। एवमर्थक्रमः पाठक्रमाद् बलवान् भवति।

---

[68] मीमांसान्यायप्रकाशः, पृ.सं.303

[69] मीमांसासूत्र, 5/4/1

[70] अर्थसंग्रहः, पृ.सं.145

[71] सारविवेचनी, पृ.सं.92

[72] जैमिनीयन्यायमालाविस्तर-5/4/9,पृ.सं.333.

### १.१.३.३ पाठप्रमाणेन पौर्वापर्यविचारः-

**पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः**[73] । अर्थादनुष्ठेयपदार्थानाम् अङ्गानां बोधकवाक्यानां यः क्रमः भवति सः पाठक्रमः उच्यते। पाठक्रमः क्रियाणामनुष्ठानकर्माणामाधारः भवति। यतोहि येन क्रमेण मन्त्रब्राह्मणगतविधिवाक्यानां पाठः क्रियते, तेनैव क्रमेण अध्ययने कृते तेषां वाक्यानामर्थज्ञानं भवति, एवं ज्ञानक्रमानुसारेण क्रियाणामनुष्ठानं क्रियते। अस्यापि द्वौ प्रभेदौ भवतः- मन्त्रपाठः, ब्राह्मणपाठश्च। वेदस्य संहितासु पठितमन्त्राणां पाठे यः पूर्वापरभावः भवति, सः मन्त्रपाठक्रमः कथ्यते। अनेन प्रकारेण ब्राह्मणवाक्येषु पठितविधिवाक्यानां पाठे भूयमानः पूर्वापरभावः ब्राह्मणपाठक्रमः उच्यते। **“दर्शपूर्णमासयोराग्नेयस्य पूर्वं मन्त्रपाठः उत्तरो ब्राह्मणस्य। तत्र सन्देहः। कतमः पाठो बलीयानिति.... मन्त्रपाठो बलीयान्। कुतः। प्रयोगरूपसामर्थ्यात्। प्रयोगाय मन्त्रस्य रूपसामर्थ्यम्। तदस्य सामर्थ्यं येन मन्त्रः प्रयुज्यते। तस्य च प्रयुज्यमानस्य क्रमो दष्टाय भवति”**[74] । अतः अयं मन्त्रपाठः ब्राह्मणपाठाद् बलवान् भवति।

### १.१.३.४ स्थानप्रमाणेन पौर्वापर्यविचारः-

**स्थानं नामोपस्थितिः**[75] । अत्र उपस्थितेः अर्थः भवति यत्- प्रकृतियागे अनुष्ठितक्रमस्यानुसारेण कस्यचित् पदार्थस्य विकृतियागे उपस्थितिः। प्रकृतौ विभिन्नदेशानां पदार्थानां विकृतौ वचनादेकस्मिन् देशेऽनुष्ठाने कर्तव्ये यस्मिन् देशेऽनुष्ठीयन्ते, तस्य प्रथममनुष्ठानं पश्चादिमिति, एतादृशः यः क्रमः भवति सः स्थानक्रमः[76]। अस्योदारणं यथा- ज्योतिष्टोमः (साद्यस्क्र) सोमयागस्य प्रकृतियागः वर्तते। अस्मिन् त्रयपशूनां क्रमशः पृथक्-पृथक्दिनेषु आलभनं क्रियते। पशूनां नामानि सन्ति- अग्नीषोमीयः, सवनीयः, अनुबन्ध्यश्च। येषु दिनेषु एतेषां पशूनां क्रमशः आलभनं भवति, तेषु प्रथमदिवसस्य नाम “औपवसथ्य दिवसः”, द्वितीयस्य “सुत्याकाल” एवं तृतीयस्य “अवभृथ” वर्तते। अनेन प्रकारेण ज्योतिष्टोमे आग्नीषोमीयपशोः आलभनम् “औपवसथ्य” नाम्नः प्रथमदिने, सवनीयपशोः सुत्यकालसंज्ञकद्वितीयदिवसे एवं अनुबन्ध्यपशोः अवभृत्यसंज्ञके अन्तिमदिवसे क्रियते। इयं परिस्थितिः ज्योतिष्टोमसंज्ञकप्रकृतियागस्य भवति। अत्र साद्यस्क्रनाम्नः सोमयागः वर्तते। अयं रूपरहितः (अव्यक्तः[77]) वर्तते, यतोहि यागेऽस्मिन् रूपस्य (देवतायाः) श्रवणं न भवति। अनेन प्रकारेण सर्वाङ्गपाठस्य प्राप्त्यभावादयं विकृतियागः

---

[73] मीमांसान्यायप्रकाशः, पृ.सं.305

[74] शाबरभाष्य- 5/1/16.

[75] अर्थसंग्रहः, पृ.सं.152

[76] मीमांसान्यायप्रकाशः, पृ.सं.313.

[77] “अव्यक्तं च स्वार्थचोदितदेवताराहित्यमिति”। न्यायप्रकाशः,

उच्यते[78]। मीमांसानुसारं साद्यस्क्रः ज्योतिष्टोमस्य विकृतियागः वर्तते। यागस्यास्यानुष्ठानम् एकस्मिन्नेव दिवसे क्रियते[79]। यतोहि साद्यस्क्रः ज्योतिष्टोमस्य विकृतियागः वर्तते, अतः **"प्रकृतिवद् विकृतिः कर्तव्या"** अनेन अतिदेशवाक्येन ज्योतिष्टोमसदृशे साद्यस्क्रेऽपि अग्नीषोमीय-सवनीय-अनुबन्धसंज्ञकानाञ्च त्रयाणां पशूनाम् आलभनं करिष्यते। "यथा प्रकृतिभूते ज्योतिष्टोमे सुत्याकालिकः सवनीयः प्रधानप्रत्यासन्नस्तथैव तद्विकृतिसाद्यस्क्रेऽपि तात्कालिकः स प्रत्यासन्न एवेतिभावः"। ज्योतिष्टोमे एते पशवः पृथक्-पृथक्दिनेषु अनुष्ठीयन्ते, किन्तु साद्यस्क्रे त्रयाणां पशूनाम् आलभम् एकस्मिन्नेव दिने भवति, यतोहि "सह पशूनालभेत" विधिरयं विधानं करोति यत् साद्यस्क्रयागे त्रयाणां पशूनां आलभनं सहैव एकस्मिन्नेव दिने स्यादिति।

### १.१.३.५ मुख्यप्रमाणेन पौर्वापर्यविचारः-

**प्रधानक्रमेण योऽङ्गानां क्रमः स मुख्यक्रमः[80]।** अर्थात् प्रधानक्रियाणां क्रमस्यानुसारेण यः अङ्गक्रियाणां क्रमः भवति, सः मुख्यक्रमः उच्यते। यः क्रमः मुख्यक्रियासु भवति, स एव क्रमः मुख्यक्रियाणाम् अङ्गेषु अपि भवति। तदा सर्वेषामङ्गानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति। व्युत्क्रमेणानुष्ठाने केषाञ्चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषाञ्चिदत्यन्तं व्यवधानं स्यात्। तच्चायुक्तम्, यतोहि प्रयोगविधिः यस्य सहभावस्य बोधं कारयति, तस्मिन् सहभावे बाधा भवति। अतः प्रधानक्रमः अपि अङ्गक्रमे कारणं भवति। उदाहरणे यथा- दर्शपूर्णमासे आग्नेययागस्य अनुष्ठानं पूर्वं क्रियते, अनन्तरं ऐन्द्रयागस्य अनुष्ठानम्, अयमेव क्रमोऽस्ति। अस्य क्रमस्य- आग्नेययागस्य, ऐन्द्रयागस्य च आधारः आग्नेययागस्य एवं ऐन्द्रयागस्य याज्यानुवाक्यमन्त्राणां पाठे पूर्वापरभावः। आग्नेययागस्य याज्यानुवाक्यस्य पाठं पूर्वमस्ति, एवं ऐन्द्रयागस्य याज्यानुवाक्यस्य पाठमनन्तरं। अतः पाठक्रमेण पूर्वम् आग्नेययागस्य अनुष्ठाम् एवं पश्चात् ऐन्द्रयागस्य अनुष्ठानं क्रमोऽयं वर्तते।

दर्शपूर्णमासप्रकरणे प्रयाजहोमस्यानन्तरं "प्रयाजशेषेण हवींष्यभिघारयति" अस्य विधेः श्रवणं वर्तते। यस्यानुसारेण प्रयाजानामनुष्ठानेन शेषाज्यैः हविषु अभिघारणं क्रियते। दर्शयागे त्रीणि हवींषि सन्ति- आग्नेयपुरोडाशः, ऐन्द्रदधि, ऐन्द्रपयश्च। अत्र समास्या भवति यत् कस्य हविषः अभिघारणं पूर्वं करणीयं कस्य च अन्ते। अस्याः समस्यायाः समाधानं प्रधानक्रमेण भवति। आग्नेय एवं ऐन्द्र एतेषां प्रधानयागानां क्रमानुसारं एतेषां हविषामभिघारणं भविष्यति।

---

78 "यत्र न समग्राङ्गोपदेशः सा विकृतिः", अर्थसंग्रहः, पृ.सं.102

79 साद्यस्क्रः एकदिनानुष्ठेयः सद्यः सोमक्रयविशिष्टः सोमयागविशेषः। सारविवेचिनी

80 अर्थसंग्रहः, पृ.सं.159

प्रधानक्रमानुसारेण पूर्वम् आग्नेयहवेः अभिघारणं एवं पश्चात् ऐन्द्रदधे अभिघारणम् भवति[81]। एतदर्थम् असौ मुख्यक्रमः पाठक्रमात् दुर्बलः।

### १.१.३.६ प्रवृत्तिप्रमाणेन पौर्वापर्यविवेचनम्-

**सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद् यः क्रमः स प्रवृत्तिक्रमः**[82]। अर्थात् यदि प्रधानक्रियाणामनुष्ठानं सहैव स्यात् एवं सन्निपत्योपकारकसंज्ञकाङ्गभूतक्रियाणामावृत्या अनुष्ठानं स्यात्, तर्हि प्रथमानुष्ठितक्रियायाः क्रमेण द्वितीयादिक्रियाणां यः क्रमः गृह्यते, सः प्रवृत्तिक्रमः कथ्यते। यथा- प्राजापत्ययागानां पशूनाम् अङ्गक्रियासु प्रवृत्तिक्रमः भवति। प्राजापत्ययागानां विधानं **"वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति"** अनेन विधिवाक्येन क्रियते। अत्र प्राजापत्यैः अनया तृतीयाविभक्त्या ज्ञायते यत् प्राजापत्ययागः इतिकर्तव्यतारूपे अन्वितक्रियाभिः सह एकस्मिन्काले अव्यवधानेन अनुष्ठीयते। अतः तेषां प्राजापत्ययागानां सन्निपत्योपकारकाङ्गानाञ्च (उपकरण-नियोजन) इत्यादीनां सहानुष्ठानमेव कर्तव्यम्[83]। अनेन प्रकारेण अत्र षड्विधक्रमनिरूपणेन प्रयोगविधिव्यापारः निरूपितः।

### १.१.४ अधिकारविधिस्वरूपविमर्शः-

अयं विधिः अधिकारस्य विधानं करोति। अधिकारस्य अर्थोऽस्ति स्वाम्य (स्वामिता)। **"फलस्वाम्यबोधको विधिरधिकारविधिः"**[84]। अर्थात् येन विधिना ज्ञायते यत् यगादिकर्मफलस्य स्वामी कोऽस्ति? कः कर्मफलं प्राप्नोति? अत्र लक्षणे "फलस्वामी" अस्य अर्थो वर्तते यत् कर्मणा उत्पन्नफलस्य भोक्ता इति। तात्पर्यमिदं वर्तते यत् फलस्वामी सः भवति यः कर्मणा उत्पन्नफलस्य भोगं करोति। उदाहरणार्थे सः अधिकारविधिः "यजेत स्वर्गकामः" रूपेऽस्मिन् वर्तते। अयं विधिः स्वर्गमुद्दिश्य यागस्य विधानं करोति अनेनेदं प्रतिपाद्यते यत् स्वर्गस्य काम्यमानः पुरुषः यागजन्यफलस्य (स्वर्गस्य) भोक्ता भवति। अनेनैव प्रकारेण **"यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेत्"** अयमपि अधिकारविधिः वर्तते, अस्यार्थो वर्तते यत् येन पुरुषेण अग्न्याधानं कृतमस्ति यदि तस्य पुरुषस्य गृहम् अग्निना दग्धं, तर्हि सः पुरुषः शान्ताग्नये अष्ठकपालेषु निर्मितपुरोडाशस्य निर्वापनं कुर्यात्। अनेन विधिवाक्येन बोधोऽयं भवति यत् उक्तप्रकारेण पुरोडाशनिर्वापेण भूयमानं पापक्षयरूपफलं तेनैव पुरुषेण प्राप्यते, येन अग्न्याधानं

---

[81] आदावाग्नेयहविषोऽभिघारणं, पश्चादैन्द्रस्य दध्नः।

[82] अर्थसंग्रहः,पृ.सं.167

[83] "पदार्थैः सह प्रधानं कर्तव्यमिति", शाबरभाष्य-5/1/8.

[84] मीमांसान्यायप्रकाशः, पृ.सं.328

कृतमस्ति, एवं यस्य गृहमपि दग्धमस्ति। प्रत्येकयागस्य अनुष्ठाने यत्र प्रत्येकविषयस्य विधानं भवति, तत्र अस्य विषयस्य अपि विधानं भवति यत् अमुकयागस्य अनुष्ठानम् अमुकविशेषणेन युक्तः पुरुषः एव कर्तुं शक्नोति, यतोहि प्रत्येकयागस्य अनुष्ठातुः विशेषताः निर्धारिताः भवन्ति। यदि ताः विशेषताः तस्मिन् पुरुषे न भवन्ति तर्हि सः यागसम्पादनस्य अधिकारी न भवति। एवं यदि सः हठात् यागानुष्ठानं करोति तर्हि तेन यागात् उत्पन्नफलं न प्राप्यते। अर्थात् सः यागजन्यफलस्य भोक्ता न भवितुमर्हति।

यः व्यक्तिः अधिकारविशिष्टः भवति, सैव कर्मानुष्ठानं कृते सति तत्कर्मणः फलस्य भोक्ता भवति[85]। अभिप्रायोऽयं वर्तते यत् यः अधिकारी व्यक्तिः भवति स एव कर्मफलभोक्ता भवति। अधिकारिपुरुषस्य विशेषणमेव अधिकारः कथ्यते। **"यजेत स्वर्गकामः"** स्थलेऽस्मिन् प्रासङ्गिको यागः काम्यकर्म वर्तते, अतः स्वर्गकामना अर्थात् फलकामना "अधिकारः" अस्ति। यस्मिन् पुरुषे फलकामना वर्तते, सः अधिकारी अस्ति, "**स्वर्गकामः**" अधिकारी व्यक्तिः वर्तते एवं स्वर्गकामना अधिकारः पुरुषस्य विशेषणं वर्तते। अधिकारविधौ व्यक्तेः यानि विशेषणानि सन्ति, तानि सर्वाणि सम्मिलितरूपेण अधिकारिपुरुषे भवेयुः, एकस्यापि विशेषणस्याभावे व्यक्तिः कर्मजन्यफलस्य भोक्ता न भवितुं शक्नोति। उदाहरणार्थे "राजा राजसूयेन स्वाराज्यकामो यजेत" अत्र पुरुषस्य द्वे विशेषणे स्तः- १ राजा (क्षत्रिय[86]), २ स्वाराज्यकामः। अतः राजसूययागस्य अनुष्ठीयमानः व्यक्तिः क्षत्रियः स्वाराज्यकामश्च अपि भवेत्। केवलं स्वाराज्यकामः व्यक्तिः राजसूयकर्मफलस्य भोक्ता न भवितुमर्हति, सः क्षत्रियः अपि स्यादिति।

क्वचित्तु पुरुषस्य विशेषणरूपे न श्रुतं पदार्थमपि पुरुषस्य विशेषणं भवति, यथा- **"स्वाध्यायोऽध्येतव्यः"** अनेन विधिना प्राप्तविद्या अपि पुरुषस्य विशेषणरूपे भवति, यद्यपि विधिवाक्येषु "विद्या" साक्षात्पुरुषस्य विशेषणरूपे श्रुता नास्ति। पुनः अपि अधिकारीपुरुषस्य विशेषणरूपे तास्याः (विद्यायाः) आक्षेपः भवति, अर्थात् अधिकारी भूयमानाय तस्याः अपेक्षा स्वीक्रियते। उदाहरणार्थे यथा- यागविधायकविधिषु अध्ययनविधिना सिद्धविद्या अधिकारीपुरुषस्य विशेषणं स्वीक्रियते। यद्यपि तत्र अस्याः साक्षात् श्रवणं नास्ति। तात्पर्यमिदं वर्तते यत् यागानुष्ठानस्य अधिकारः तमेव व्यक्तिं वर्तते यः स्वाध्यायोऽध्येतव्यः अनेन अध्ययनविधिना वेदस्य अध्ययनं कृत्वा वेदार्थस्य ज्ञानं प्राप्तवान्, यतोहि यागविधायकविधिभिः कर्मानुष्ठाने वेदार्थज्ञानस्य अपेक्षा भवति। अतः अध्ययनविधिना यः वेदार्थं जनाति, तमेव पुरुषं

---

[85] "फलस्वाम्यं तस्यैव योऽधिकारविशिष्टः" अर्थसंग्रहः, पृ.सं.172

[86] अत्र हि राजशब्देन क्षत्रिय एवोच्यते न तु राजसम्बन्धमात्रेण तेन क्षत्रियस्यैव राजसूयेऽधिकारो न तु तदन्यस्य ब्राह्मणादेरित्यन्यत्र विस्तर इति भावः। (कौमुदी) पृ.सं.138

प्रति क्रतुविधीनां प्रवृत्तिः भवति[87]। अर्थात् क्रतुविधयः एतादृशेभ्यः पुरुषेभ्यः यागस्य विधानं करोति, यैः अध्ययनविधना वेदार्थज्ञानं प्राप्तम्। अनेनैव प्रकारेण यस्य कर्मणः अनुष्ठानं अग्निसापेक्षः भवति, तस्य अनुष्ठानस्य अधिकारः तमेव पुरुषमस्ति, येन नियमपूर्वकमग्न्याधानं कृतं। तात्पर्यं वर्तते यत् अग्निसाध्यकर्मसु **"आधानसिद्ध अग्निमत्ता"** पुरुषस्य विशेषणं भवति।

## १.२ मन्त्रस्वरूपविमर्शः-

वेदः प्रयोजनवदर्थपर्यवसायी वर्तते। वेदस्य प्रथमप्रभेदस्य (विधेः) प्रयोजनवदर्थपर्यवसायित्वस्य निरूपणं कृतमस्ति। अधुना द्वितीयस्य वेदप्रभेदस्य मन्त्रस्य अर्थवत्तां प्रदर्श्यते। यागानुष्ठानमनेकपदार्थैः निष्पद्यते। एते पदार्थाः द्रव्यदेवताक्रियादिरूपैः अनेकप्रकारकाः भवन्ति। यागस्यानुष्ठानकाले (प्रयोगकाले) मन्त्राणामपि पाठः क्रियते। मन्त्रैः एव द्रव्यदेवतादीनां स्मरणं कृत्वा अनुष्ठानं क्रियते। **"प्रयोगसमवेतार्थस्मारका मन्त्राः"[88]।** अर्थात् मन्त्राः अनुष्ठाने प्रयुक्तानां द्रव्यदेवताक्रियादीनां पदार्थानां स्मरणं कारयन्ति। अनेन प्रकारेण पदार्थानां स्मरणे एव मन्त्राणां सर्थकता वर्तते।

मन्त्राणां सार्थकतायां पूर्वपक्षेण शंका क्रियते यत् मन्त्राणां प्रयोजनं दृष्टप्रयोजनं न भवति। मन्त्रगतशब्दाः अर्थस्य ज्ञानं न कारयन्ति, अतः मन्त्राः उच्चारणमात्रेण यागस्य उपकारकाः भवन्ति[89]। सिद्धान्तपक्षेण समाधानं क्रियते यत् मन्त्राः निरर्थकाः न भवन्ति। मन्त्राणाम् अर्थः विवक्षितः भवति। तेषामुच्चारणमदृष्टार्थकं नास्ति अपितु यागे पुरोडाशादेः द्रव्यस्य देवतादेश्च स्मारकाः सत्वात् मन्त्राः दृष्टार्थकाः भवन्ति[90]। अतः यदि मन्त्राणां दृष्टप्रयोजनं सम्भवोऽस्ति तर्हि तेषाम् अदृष्टप्रयोजनं नोचितम्। मन्त्राणां दृष्टप्रयोजनमेव प्रयोगसमवेतार्थस्मारकत्वं वर्तते। अत्र पुनः प्रश्नः भवति यत् प्रयोगसमवेतार्थस्य स्मरणं तु केनचित् अन्यसाधनेनापि भवितुमर्हति। यथा- स्वयं प्रयोगसमवेतार्थस्य स्मरणं कृत्वा अथवा कमपि व्यक्तिं नियोजितुं शक्यते यः प्रयोगसमवेतार्थानां स्मरणं कारयेत्। अतः मन्त्राणां दृष्टप्रयोजनस्य स्वीकार्यता उचिता नास्ति। अस्य समाधानं क्रियते यत् प्रयोगसमवेतार्थस्य स्मरणं मन्त्रैः एव कर्तव्यं नान्यकेनापि साधनेन, विषयेऽस्मिन् "मन्त्रैः स्मर्तव्यम्" अस्य नियमविधेः

---

[87] "अध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव ऋतुविधीनां प्रवृत्तेः" अर्थसंग्रहः, पृ.सं.174.

[88] अर्थसंग्रहः,पृ.सं.179.

[89] "उच्चारणमात्रैणैवोपकुर्वन्तीति", शाबरभाष्य-1/2/31.

[90] "मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः। यागेषूत पुरोडाशप्रथनादेश्च भासकाः॥
ब्राह्मणेनापि तद्भानान्मन्त्राः पुण्यैकहेतवः। न, तद्भानस्य दृष्टत्वाद् दृष्टे वरमदृष्टतः॥", जैमिनीन्यायमालाविस्त-1/2/4.

आश्रयं स्वीक्रियते यतोहि उक्तनियमविधिः एव अत्र प्रमाणं वर्तते। अनेन प्रकारेण सिद्धोऽयं भवति यत् मन्त्रः प्रयोजनवदर्थपर्यवसायी भवति।

अत्र प्रसङ्गशात् विधेः विभाजनम् अन्यप्रकारेण क्रियते यतोहि मन्त्राणां स्मरणं नियमविधिना एव क्रियते। अत एव अस्मिन् विभाजने विधेः त्रयः भेदाः भवन्ति तत्र सर्वप्रथमं नियमविधेः स्वरूपस्य विवेचनं क्रियते- **"नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्याप-रसाधनस्य प्रापको विधिर्नियमविधिः"**[91]। अर्थात् यदि कस्मिन्नपि कार्ये विकल्पेन साधनद्वयस्य प्राप्तिः स्यात् तर्हि यस्य साधनस्य यदा प्राप्तिः न स्यात्, तदा तस्य अप्राप्तसाधनस्य प्राप्तिः नियमविधिना एव भवति। यथाहुः-

**"विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।**

**तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥"**[92]

उपर्युक्तश्लोके त्रायाणां विधीनां विषये उक्तं वर्तते- अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्च। एतेषां त्रयाणां विधीनां विवेचनं क्रमशः क्रियते-

## १.२.१ अपूर्वविधिविवेचनम्-

अत्र सर्वप्रथमं अपूर्वविधेः विषये कथ्यते यत् **"प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः"**[93]**।** अर्थात् यस्य अर्थत्वं प्रमाणान्तरेण अप्राप्तं भवति तस्य तदर्थत्वेन यो विधिः सः अपूर्वविधिः भवति। यथा- **"यजेत स्वर्गकामः"** अत्र यागस्य स्वर्गार्थत्वं न प्रमाणान्तरेण प्राप्तम्, किन्त्वनेनैव विधिना भवति अतः अयमपूर्वविधिः।

## १.२.२ नियमविधिविवेचनम्-

नियमविधेः लक्षणं क्रियते यत्- **"पक्षेऽप्राप्तस्य तु यो विधिः स नियमविधिः"**[94]**।** अर्थात् पक्षे अप्राप्तपदार्थस्य प्रापको विधिः नियमविधिः कथ्यते, यथा- **"व्रीहीनवहन्ति"** अयं विधिः अवघातस्य विधानं एतदर्थं न करोति यतोहि तत्तु लोकतः अन्वयव्यतिरेकसिद्धत्वात्, किन्तु अयं विधिः नियमस्य प्रतिपादनं करोति। अप्राप्तांशस्य प्राप्तिः एव नियमः उच्यते। तुषविमोकः अनेकैः उपायैः सिद्धः भवितुमर्हति, अतैव यदा अवघातं त्यक्त्वा अन्यः कोऽपि उपायः स्वीक्रियते, तदा

---

[91] अर्थसंग्रहः, पृ.सं.180.

[92] तन्त्रवार्तिक,1.2.34.

[93] अर्थसंग्रहः, पृ.सं.180.

[94] मीमांसान्यायप्रकाशः, पृ.सं.342.

तस्मिन् स्थितौ अयं विधिः अप्राप्तस्य अवघातस्य विधानं कृत्वा अप्राप्तांशस्य पूर्तिः कारयति। निष्कर्षतया वक्तुं शक्यते यत् नियमविधिना अप्राप्तांशस्य पूर्तिरूपनियमस्य एव बोधः कारयते। अत्र पक्षे अप्राप्तावघातस्य प्रापणमेव नियमः वर्तते।

## १.२.३ परिसंख्याविधिविवेचनम्-

परिसंख्याविधिः अपूर्वविधिना नियमविधिना च भिन्नः वर्तते, यतोहि अयं विधिः निवृत्तिपरकोऽस्ति। परि उपसर्गस्य अर्थो वर्जनः एवं संख्याशब्दस्य अर्थः बुद्धिः भवति, अतः परिसंख्याशब्दस्य अर्थः वर्जनबुद्धिः भवति। वर्जनबुद्धिं यः विधिः उत्पादयति सः परिसंख्याविधिरुच्यते[95]। यथा- **"पञ्च पञ्चनखा भक्ष्या"** वाक्यमिदं परिसङ्ख्याविधेः वर्तते, यतोहि अनेन विधिना शशकादयः पञ्च पञ्चनखानां भक्षणस्य विधानं नास्ति, अपितु विधिरयमुक्तानां पञ्चशशकादीनां पञ्चनखानामतिरिक्तजीवानां भक्षणात् पुरुषं निवर्तयति। अस्य विधेः भेदद्वयं भवति- श्रौती लाक्षणिकी च। श्रौतिपरिसङ्ख्यायां निषेधवचकशब्दः नञ् अथवा एव इति श्रुतः भवति अतः इयं श्रौती कथ्यते[96]। यथा- "अत्र ह्येवावपन्ति" अत्र एव शब्दः श्रुतः वर्तते, अत्र अवापशब्दस्य अर्थोऽस्ति- सामानां प्रक्षेपः[97]। पवमानक्रियायाः प्रसङ्गे उक्तं वर्तते यत्- **"त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्, अत्र ह्येवावपन्ति, अत एवोद्वपन्ति"**[98] उद्वापशब्दस्य अर्थः उद्धारः अर्थात् निष्कासनं भवति[99]। उक्त विवेचनेन स्पष्टं भवति यत् सामानामवापः एवमुद्वापः केवलं पवमानस्य एव गायत्री, बृहती, एवं अनुष्टुप् त्रिषु छन्देषु भवति। अतः "अत्र ह्येवावपन्ति" अस्य परिसङ्ख्याबोधितः अर्थः भवति- "गायत्रीबृहत्यनुष्टुप् एतत्त्रितियातिरिक्तेषु छन्देषु पवमानातिरिक्तस्तोत्रेषु वा न समावापः कार्य"। तात्पर्यमिदमस्ति यत् आवापः पवमानस्य त्रयाणां छन्दानाम् अतिरिक्तेषु अन्यस्थलेषु न करणीयः इति।

यस्मिन् परिसङ्ख्याविधौ "एव" इत्यादयः इतरव्यावर्तकः शब्दः साक्षातरूपेण न श्रूयते, अपितु लक्षणया इतरव्यावर्तकशब्दस्य कल्पना क्रियते, सा लाक्षणिकी परिसङ्ख्या उच्यते[100]। यथा- "पञ्च पञ्चनखा भक्ष्या" वाक्येऽस्मिन् इतरव्यावर्तकशब्दस्य प्रयोगः नास्ति, अपितु लक्षणया तस्य कल्पना क्रियते। अतः इदं वाक्यं लाक्षणिकी परिसङ्ख्या स्वीक्रियते। यतोहि

---

[95] परिसङ्ख्या वर्जनबुद्धिः, तज्जनको विधिः परिसङ्ख्याविधिरित्यर्थः। सारविवेचिनी, पृ.सं.114.

[96] "यत्र वाचकः शब्दः श्रूयते नञ् एवकारो व सा श्रौतीपरिसंख्येत्यर्थः" सारविवेचनी, पृ.सं.115.

[97] तत्र सङ्ख्यासम्पत्त्यर्थं स्थानान्तरादानीतानां साम्नां पवमानस्तोत्रेषु तदितरस्तोत्रेषु च समुच्चयेनावापः प्राप्तः। तथा आवापः प्रक्षेपः। (सारविवेचनी) पृ.सं.140

[98] सारविवेचनी, पृ.सं.142

[99] उद्वाप उद्धारः निष्कासनमिति यावत्। (सारविवेचनी), पृ.सं.143

[100] यत्र शक्तशब्दो नास्ति, निवृत्तिबोधनं तु लक्षणया सा लाक्षणिकीत्यर्थः। (सारविवेचनी)

लाक्षणिकीपरिसङ्ख्यायां इतरव्यावर्तकशब्दस्य प्रयोगः न भवति अतः अस्याः परिसङ्ख्यायाः दोषत्रयं भवति- श्रुतहानिः, अश्रुतकल्पना, प्राप्तबाधश्च इति। यथा पूर्वोक्तोदाहरणे "पञ्च पञ्चनखा भक्ष्याः" वाक्यस्य अर्थो अपञ्चनखभक्षणनिवृत्तिः ज्ञायते, किन्तु वाक्ये "पञ्चपञ्चनखभक्षण" साक्षातरूपेण श्रुतमस्ति। अनेन प्रकारेण अत्र श्रुतार्थस्य परित्यागे सति "श्रुतार्थपरित्यागनाम्नः" दोषो भवति। एवं वाक्ये अपञ्चनखभक्षणनिवृत्तिः शब्दशः श्रुतं नास्ति, पुनरपि वाक्यार्थे अस्य कल्पनत्वात् अत्र "श्रुतार्थकल्पना" इति नाम्नः दोषो भवति। पञ्चनखभक्षणः एवं अपञ्चनखभक्षणः पुरुषं रागतः प्राप्तः भवति, किन्तु प्राप्तभक्षणैकदेशनिवृत्तिः इतरभक्षणनिवृत्तिः सत्वात् अत्र "प्राप्तबाधः" इति नाम्नः दोषः अपि भवति।

अनेन प्रकारेण मन्त्रविषये स्पष्टं भवति यत् नियमविधिना मन्त्रैरेव स्मर्तव्यमिति। अनुष्ठाने समवेतार्थानां स्मरणमेव मन्त्राणां प्रयोजनं भवति। प्राप्तमन्त्राक्षरैः स एव अर्थोऽभिहितः भवति, यस्य सम्बन्धः अनुष्ठानेन भवति[101]। किन्तु केचन् मन्त्राः एतादृशाः अपि भवन्ति, ये प्रयोगसमवेतार्थस्य स्मरणे समर्थाः न भवन्ति, यथा- "कवचाय हुम्", "अस्त्राय फट्" इत्यादयः। येषां मन्त्राणाम् अर्थस्मरणरुपं दृष्टप्रयोजनं न प्राप्यते, तेषां मन्त्राणामुच्चारणेन अदृष्टप्रयोजनं भवतीति मन्तव्यम्। अतः कस्यापि मन्त्रस्य उच्चारणं कस्मिन्नपि स्थितौ व्यर्थः न भवति।

## १.३ नामधेयस्वरूपविमर्शः-

वेदस्य पञ्चप्रभेदेषु विधिमन्त्रयोः विवेचनं कृतमधुना नामधेयस्य विवेचनं क्रियते- **"नामधेयानां च विधेयार्थपरिच्छेदकतयार्थवत्त्वम्"**[102]**।** अर्थात् नामधेयानां सार्थकता इदमेवास्ति यत् ते विधेयस्य क्रियायाः व्यावर्तकाः भवन्ति, नामधेयेन विधेयस्य क्रियामात्रस्य बोधो भवति। यथा- **"उद्भिदा यजेत पशुकामः"** अस्मिन् विधिवाक्ये उद्भिदा शब्दः यागस्य नामधेयोऽस्ति। अनेनैव उद्भिदानामधेयेन विधेयक्रियायाः व्यावर्तनं क्रियते। "उद्भिदा यजेत पशुकामः" अस्मिन् विधिवाक्ये प्रयुक्तः "उद्भिद्" शब्दस्य अर्थः उद्भिद्नाम्नः यागविशेषः स्वीक्रियते, यद्यपि उद्भिद् शब्दस्य **"खनित्रम्**[103]**"** इत्याद्यपि अर्थः भवति, किन्तु अत्र सोऽर्थः अभिप्रेतो नास्ति। अनेन प्रकारेण उद्भिद् शब्दः नामधेयोऽस्ति। अत्र नामधेयस्य प्रयोजनं एतदर्थं भवति यतोहि अस्मिन् विधौ यजेत पदेन यागरूपार्थस्य विधानं क्रियते। यागस्य विधेयार्थे सति यागस्य अर्थात्

---

[101] एतद् वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाणमृगभिवदति। ऐतरेयब्राह्मण-1.5.

[102] अर्थसंग्रहः, पृ.सं.193.

[103] उद्भिद्यते ऊर्ध्वं विदीर्यते भीमिरनेनेति व्युत्पत्त्या भूमेरूर्ध्वविदारणसाधनं खनित्रादिः पूर्वपक्षेऽर्थो वेदितव्यः। (सारविवेचनी), पृ.सं.145

यागसामान्यस्य सर्वेषां यागानां विधानं तु न भवितुमर्हति। अत्र कारणमस्ति यत् यागानुष्ठानस्य विशेषं फलं पशुः वर्तते, अतैव साधनभूतयागः अपि विशेषः एव भवेतिति[104]। यतोहि सामान्ययागस्य अविधेये सति "यजि" इत्यनेन गृहीतयागविशेषस्य समर्पकत्वात् उद्भिद्नामधेयस्य यजियागेन सह सामानाधिकरण्यम् (उद्भिदा यजेत) इति सिद्धं भवति। कुमारिलभट्टेनाप्युक्तं यत्- **"तदधीनत्वाद्यागविशेषसिद्धेः"**[105] अर्थात् नामधेयस्य विधानं क्रियते यतोहि यागविशेषस्य सिद्धिः नामधेयस्य अधीनः भवति।

अधुना तेषां निमित्तकारणानामुल्लेखः क्रियते येनाधारेण शब्दाः यागस्य नामधेयाः स्वीक्रियन्ते। कमपि शब्दं नामधेयस्य अर्थात् यागस्य नाम स्वीकृते चत्वारि निमित्तकारणानि भवन्ति- मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशात् चेति। अत्र क्रमशः एतेषां विवेचनं क्रियते-

## १.३.१ मत्वर्थलक्षणाभयान्नामधेयत्वविचारः-

यदा कदापि मत्वर्थलक्षणाभयात् शब्दः यागविशेषस्य वाचकः स्वीक्रियते। यदि स्थलेऽस्मिन् शब्दः यागनामधेयः न स्वीक्रियते तर्हि तत्र मत्वर्थलक्षणया अर्थबोधो भवति। यथा- "उद्भिदा यजेत पशुकामः" अस्मिन विधिवाक्ये उद्भिद् शब्दः यागविशेषस्य नाम वर्तते। यागविशेषस्य नाम एव "नामधेयः" अथवा यागनामधेयः कथ्यते। यदि प्रकृतस्थले उद्भिद् शब्दः नामधेयो न मन्यते तर्हि तत्र मत्वर्थलक्षणया अर्थबोधो भविष्यति। यतोहि मत्वर्थलक्षणा दोषरूपोऽस्ति, अतः अस्य दोषस्य निवारणाय उद्भिद् शब्दः यागस्य नामधेयः स्वीक्रियते।

उद्भिदा यजेत पशुकामः इदं वाक्यं गुणविधिरपि न भवितुं शक्यते। यतोहि गुणविधिः तत्रैव मन्यते यत्र कर्मयागस्य विधानमन्यवाक्यस्य पूर्वमेव प्राप्यते, यथा- "दध्ना जुहोति" अस्मिन् गुणविधौ यागस्य प्राप्तिः "अग्निहोत्रं जुहुयात् स्वर्गकामः" अनेन वाक्येन पूर्वमेव प्राप्यते। किन्तु "उद्भिदा यजेत पशुकामः" अस्य विधेः पूर्वं कोऽपि एतादृशः विधिः न प्राप्यते, यस्मिन् यागस्य विधानं कृतमासीत् एवं तं यागमुद्दिश्य "उद्भिदा यजेत पशुकामः" अनेन वाक्येन उद्भिद्रूपगुणस्य विधानं स्यात्। यदि "उद्भिदा यजेत पशुकामः" अनेन वाक्येनैव यागस्य गुणस्य च उभयोः विधानं स्वीक्रियते तर्हि वाक्यभेदनाम्नः दोषः भविष्यति। यतोहि अनेनैव वाक्येन फलं पशुं च उद्दिश्य यागस्य विधानं "यागेन पशुं भावयेत्" अस्मिन् रूपे मन्तव्यम् एवं यागमुद्दिश्य गुणस्य विधानं "उद्भिदा (खनित्रेण) यागं भवयेत्" रूपेऽस्मिन् भविष्यति। अनेन प्रकारेण स्पष्टरूपेण

---

[104] साधनवैलक्षण्यमन्तरेण फलवैलक्षण्यानुपपत्तेर्नात्र यागसामान्यं विधीयते, ततश्च यागविशेष एव विधीयते। (कौमुदी)

[105] तन्त्रवार्तिक-1/4/2.

वाक्यद्वयस्य सत्वात् वाक्यभेदनाम्नः दोषस्य प्राप्तिः भविष्यति, किन्तु वाक्यभेदः सर्वथा परित्याज्यः भवति[106]। अत्र गुणविशिष्टकर्मविधिरपि न भवितुमर्हति यतोहि यथा "सोमेन यजेत" अस्मिन् वाक्ये मत्वर्थलक्षणया वाक्यार्थबोधो भवति। तथैव अत्रापि करणीयं, यतोहि मत्वर्थलक्षणा पददोषः वर्तते। अस्य दोषस्य निवारणाय उद्भिद् शब्दः नामधेयः स्वीक्रियते। तदा "उद्भिदा यजेत पशुकामः" अस्य मीमांसासम्मतवाक्यार्थबोधोऽनेन प्रकारेण भविष्यति- "उद्भिदा यागेन पशुं भावयेत्" इति। अत्र मत्वर्थलक्षणाभयात् अनेन निमित्तेन उद्भिद् शब्दः नामधेयः मन्यते।

## १.३.२ वाक्यभेदभयात् नामधेयत्वविवेचनम्-

यत्र शब्दं यागविशेषस्य नाम न मन्यते, तत्र वाक्यभेदः आपन्नो भवति। वाक्यभेदस्य भयात् अर्थात् वक्यभेदस्य आपत्तिः न स्यात् अस्मात् भयात् तत्र सः शब्दः यागविशेषस्य नाम भवति। अतः वाक्यभेदस्य भयादपि शब्दः यागस्य नामधेयः मन्यते। यथा- "चित्रया यजेत पशुकामः" अस्य विधिवाक्यस्य अर्थोऽस्ति यत् यः पशुं प्राप्तुमिच्छति सः चित्रया यागानुष्ठानं कुर्वीत। अत्र चित्रा शब्दः यागस्य नामधेयः मन्यते, अन्यथा वाक्यभेददोषः भविष्यति, यतोहि वाक्यभेदः वाक्यदोषः वर्तते। अत्र वाक्यभेदं त्यक्त्वा विशिष्टविधिरपि न भवितुमर्हति। यतोहि विशिष्टविधौ गुणविधिरपि भवेत् किन्त्वत्र "चित्रया यजेत पशुकामः" अस्मिन् विधौ गुणविधिः न भवितुं शक्नोति[107]। यतोहि गुणविशिष्टविधिः तत्रैव भवति यत्र गुणः कर्मयागश्च उभावेव अप्राप्तौ भवतः, किन्तु अत्र गुणस्य प्राप्तिः **"दधि मधु पयो धृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्"**[108] अनेन वाक्येन भवति। अतैव गुणस्य प्राप्तिः सत्वात् "चित्रया यजेत पशुकामः" इदं वाक्यं गुणविशिष्टकर्मविधिः न मन्यते[109]।

एवं यदि बलात् "चित्रया यजेत पशुकामः" अनेन वाक्येन यागस्य गुणस्य च विधानं क्रियते तर्हि वाक्यभेदो भवति, यतोहि "यागेन पशुं भावयेत्" एवं "चित्रया (गुणेन) यागं भावयेत्" अनेन प्राकारेण एकस्मिन् वाक्ये एव स्पष्टतया द्वयोः विधायकवाक्ययोः सत्वात् वाक्यदोषः भवति। वाक्यभेदः न स्यात् एतदर्थं चित्रा शब्दं यागस्य नाम मन्तव्यम्। तदा "चित्रया यजेत पशुकामः" अस्य मीमांसासम्मतार्थबोधवाक्यं भविष्यति- "चित्रायागेन पशुं

---

[106] तथा च यागेन पशुं भावयेद्यागं च तादृशगुणेन भावयेदिति यागस्य गुणफलोभयसम्बन्धे विधीयमाने सत्यावृत्तिलक्षणो वाक्यभेदो दुर्वार इति भावः। (कौमुदी)

[107] न तावदत्र गुणविशिष्टयागविधानं सम्भवति। अर्थसंग्रहः पृ.सं.198

[108] शाबरभाष्य-1/4/3.

[109] गुणस्य विहितत्वात् तद्विशिष्टयागविध्यनुपपत्तेः, अर्थसंग्रहः,पृ.सं.198.

भावयेदिति"। अत्र चित्रायागेन पदे चित्राशब्दस्य यागस्य नामधेये सति द्वे विधाने न अभवताम्। अतः अत्र वाक्यभेदः न भवति।

## १.३.३ तत्प्रख्यशास्त्रान्नामधेयत्वविचारः-

अधुना तत्प्रख्यशास्त्रेण भूयमानस्य नामधेयस्य निरुपणं क्रियते- यदा गुणस्य विधानं केनापि अन्यवाक्येन भवति तदा विचार्यमाणे विधिवाक्ये आपाततः गुणबोधकप्रतीयमानः शब्दः यागनामधेयः भवति। "तत्प्रख्यशास्त्रात्" अस्य हेतुवाचकपदस्य व्याख्या अनेन प्रकारेण क्रियते- **"तस्य गुणस्य प्रख्यापकस्य शास्त्रस्य विद्यमानत्वात्"**[110] अर्थात् गुणबोधकस्य विधिवाक्यस्य विद्यमानत्वादिति। यथा- "अग्निहोत्रं जुहोति" अस्मिन् विधिवाक्ये अग्निहोत्रपदेन अग्निरूपगुणस्य अभिप्रायो भवितुमर्हति, अतैव उक्तविधिवाक्यमग्निरूपगुणस्य विधायकत्वात् गुणविधिः वर्तते, अत्र गुणरूपाग्नेः रूपद्वयस्य सम्भावना भवति- "अग्नौ होत्रम् अस्मिन्" व्याख्येऽस्मिन् होमस्य आधाररूपे अग्निः गुणः भवति, एवं "अग्नये होत्रम्" अस्मिन् व्याख्ये देवतारूपे अग्निः गुणः भविष्यति। मीमांसकाः "अग्निहोत्रं जुहोति" इमं विधिं गुणविधिः न स्वीकुर्वन्ति[111], यतोहि अग्निरूपगुणस्य विधानमन्यवेदवाक्यैः अनेन प्रकारेण भवति- आधाररूपे अग्निगुणस्य विधायकवाक्यं – "यदाहवनीये जुहोति" इति वर्तते। एवं देवतारूपे अग्निगुणस्य विधायकवाक्यम् "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा" इति वर्तते। यदा अनयोः वाक्ययोः अग्निरूपगुणस्य विधानं कृतमस्ति, पुनरपि "अग्निहोत्रं जुहोति" अनेन वाक्येन अग्निरूपगुणस्य विधानं मन्तव्ये सति "पुनरुक्तिः" नाम्नः दोषो भवति, यः सर्वथा त्याज्यः वर्तते। अतैव तत्प्राख्यशास्त्रनिमित्तत्वात् "अग्निहोत्र" शब्दः यागनामधेयः मन्तव्यः इति।

## १.३.४ तद्व्यपदेशेन नामधेयत्वविचारः-

तद्व्यपदेशशब्दस्य व्याख्या "तेन व्यपदेशात्" कृता वर्तते। व्यपदेशात् पदस्य अर्थो "उपमानात्" कृतः। अत्र 'तेन' पदस्य अर्थः गुणेन वर्तते। अनेन प्रकारेण **"तेन श्येनादिना प्रसिद्धेन यस्य व्यवदेशः तच्च कर्मनामधेयम्"**[112] अस्य अर्थो भवति- क्रियायाः गुणेन उपमायाः (साम्यस्य) श्रवणत्वात् शब्दविशेषः नामधेयः भवति। यथा- "श्येनेनाभिचरन् यजेत" अस्य विधिवाक्यस्य अर्थः भवति यत्- अभिचारं कुर्वन् श्येनस्य अनुष्ठानं कुर्यादिति। एतादृशी क्रिया, यस्याः

---

[110] अर्थसंग्रहः, पृ.सं.201.

[111] अविदितवेदनं च विधिरित्युच्यते। विदितं चान्यतो गुणविधानम्। तस्मान्न गुणविधी, कर्मनामधेये तु सम्भवतः। शाबरभाष्य-1/4/4.

[112] शाबरभाष्य-1/2/5.

अनुष्ठानेन शत्रूणां मृत्युः भवति अभिचारः उच्यते[113]। श्येन शब्दस्य एकः अर्थः "बाज" पक्षीरूपेऽपि भवति, किन्तु प्रकृतस्थले अयं यागविशेषस्य नामधेयः वर्तते। श्येन शब्दः यागस्य नामधेयः इति मन्तव्ये कारणमस्ति यत् प्रकृतस्थले "श्येन" शब्दस्य अर्थः गुणः बाज न भवितुमर्हति, यतोहि एकस्मिन् अर्थवादवाक्ये श्येनस्य (बाज) उपमया (साम्यप्रदर्शनेन) "श्येनेनाभिचरन् यजेत" अस्मिन् वाक्ये विहितस्य श्येनस्य प्रशंसा कृतास्ति। अर्थात् यदि अर्थवादवाक्यगतश्येन (बाज) शब्देन विधिवाक्यगत श्येन शब्दोऽपि गुणवाचकः मन्यते, तर्हि "श्येनेन श्येनस्य स्तुतिः" अस्य अर्थः अत्मना अत्मनः स्तुतिः भविष्यति, किन्तु इत्थं न भवति, यतोहि यस्य स्तुतिः क्रियते सः उपमेयः एवं येन स्तुतिः क्रियते तदुपमानं पृथक्-पृथक् पदार्थौ भवतः। उपमानोपमेयधर्मस्य भिन्ननिष्ठत्वात्[114]। अनेन सिद्धं भवति यत् अर्थवादवाक्यगतः श्येनशब्दः गुणवाचकोऽस्ति एवं विधिवाक्यगतः श्येनशब्दः गुणवाचकः न भवितुमर्हति। गुणवाचकाभावे सः अगत्यायागस्य नामधेयो मन्तव्यः इति। अतः "श्येनेनाभिचरन् यजेत" विधिवाक्ये श्येनसंज्ञकयागस्य विधानं स्यात्, न तु गुणस्य। तदैव अर्थवादवाक्यगतश्येनस्य उपमानेन उक्तयागस्य प्रशंसा भवितुं शक्यते। एवमनेन प्रकारेण "तद्व्यपदेशनिमित्तेन" श्येन इत्येकयागस्य नामधेयत्वं सिद्धं भवति।

## १.४ निषेधस्वरूपविमर्शः-

वैदिकवचनानां चतुर्थो भागः निषेधः वर्तते। अनेन निषेधवाक्येन मनुष्याः अवाञ्छितफलोत्पन्नेभ्यो कर्मभ्यः आत्मानं रक्षितुं शक्नुवन्ति। यथा विधयः मनुष्यान् प्रेरयन्ति। उदाहरणाय यागः कस्यचित् वाञ्छितफलस्य प्राप्तेः साधनः वर्तते, अतः विधिवाक्यं पुरुषं तस्य (यागस्य) सम्पादनाय प्रेरयति। तथैव निषेधवाक्यं प्रतिकारं संकेतयति, एवं निर्दिशति यत् अनेन कर्मणा अवाञ्छितफलस्य प्राप्तिः भविष्यति, अतः मनुष्याः एतेभ्यः निषिद्धकर्मभ्यः दूरं स्युः, इदं निषेधवाक्यस्य कार्यं भवति। लौगाक्षिभास्करेण निषेधस्य लक्षणं- **"पुरुषस्य निवर्तकं वाक्यं निषेधः"**[115] इति कृतम्। अस्यार्थोऽस्ति यत्- यत्वाक्यं मनुष्यान् कस्याः अपि क्रियायाः निवर्तयति तदेव निषेधवाक्यम्। निषेधवाक्यानामेकमेव प्रयोजनमस्ति यत् तत् पुरुषेषु निवर्तनामुत्पादयति। येन मनुष्यः अनिष्टस्य साधनभूतक्रियाणामनुष्ठानेन सुरक्षितः स्यात्। विधिवाक्यं पुरुषमिष्टफलस्य साधनभूतक्रियाणामनुष्ठाने प्रवर्तयति, एवं निषेधवाक्यमनिष्टफलस्य साधनभूतक्रियाभ्यः पुरुषं

---

113 अभिपूर्वकचरधातोः वैरिमरणानुकूलो व्यापारोऽर्थः। (सारविवेचिनी)

114 अर्थसंग्रहः, पृ.सं.207.

115 अर्थसंग्रहः, पृ.सं.213.

निवर्तयति। यथा **“न कलञ्जं भक्षयेत्”** वाक्यमिदं मनुष्यं कलञ्जभक्षणरूपक्रियाभ्यः निवर्तयति, यतोहि कलञ्जभक्षणक्रिया अत्यन्तानिष्टस्य नरकादेरुत्पादयिता वर्तते।

उक्तविवेचनेन स्पष्टं भवति यत् विधिवाक्यं प्रवर्तनायाः बोधं कारयति, निषेधवाक्यं निवर्तनायाश्च। अत्रैका शङ्का भवति यत् “न भक्षयेत्”, “न हन्तव्यः” अनयोः निषेधवाक्ययोः अर्थः प्रवर्तना एव प्रतीयते, न निवर्तना। कारणमस्ति यत् विधिस्थले उक्तं वर्तते लिङः अर्थः प्रवर्तना भवति[116], एवं निषेधस्थलेऽपि लिङ्गस्य अथवा पर्याशब्दस्य प्रयोगः क्रियते, यथा- “न भक्षयेत्” इत्यादिवाक्येषु। विधिस्थले धातोः लिङ्गस्य च प्रयोगः तथा निषेधस्थले नञ्-धातु-लिङ्गनां प्रयोगः भवति। नञः अर्थः अभावः वर्तते, नञर्थेन धात्वर्थस्य अन्वये सति “भक्षणाभावः” इत्यर्थस्य बोधो भविष्यति एवं “त” प्रत्ययः प्रवर्तना बोधकोऽस्ति अतः “न भक्षयेत्” अनेन भक्षणाभावः कर्तव्यः इत्यर्थस्य बोधो भवितुमर्हति। अस्य समाधाने वदति यत् एतत् समीचीनं नास्ति, यतोहि अत्र नञ् नाभावार्थे, पुनश्च नञर्थेन धात्वर्थस्य अन्वयः न भवितुं शक्यते। अस्य कारणं यत् भक्षधातोः अर्थः “त” प्रत्ययस्य आख्यातत्वांशः आर्थीभावनायाः साधनत्वात् आर्थीभावनां प्रति उपसर्जनभूतः। कमपि प्रति उपसर्जनभूतपदार्थः अन्येन सह न अन्वितः इति न्यायः[117]। यथा- “राजपुरुषमानय” अत्र आनयपदस्य अन्वयः राजपदेन न भवति, यतोहि राजा पुरुषं प्रति उपसर्जनभूतः। अतैव राजपुरुषमानय अनेन वाक्येन पुरुषस्य आनयनं भवति, न तु राज्ञः। अतः नञर्थस्य अन्वयः न धात्वर्थेन इति स्पष्टम्। पुनश्च नञर्थस्य अन्वयः तप्रत्ययस्य आख्यातत्वांशवाच्यार्थीभावनया अपि न। यतोहि आर्थी भावना लिङ्वाच्यस्य शाब्दीभावनायाः साधनत्वात् तं प्रति उपसर्जनरूपे स्थितोऽस्ति।

अनेन विवेचनेन स्पष्टं भवति, यत् शाब्दीभावना एव धात्वर्थार्थीभावनाभ्यां प्रधाना। अतः नञर्थस्य अन्वयः शाब्दीभावनया सह भवतीति।

## १.५ अर्थवादस्वरूपविमर्शः-

विधिवाक्यं यस्य पदार्थस्य विधानं करोति, सः विधेयः कथ्यते एवं निषेधवाक्यं यस्य पदार्थस्य निषेधः करोति, तं निषेध्यमुच्यते। अर्थवादवाक्यं विधेयस्य प्रशंसा करोति, एवं निषेधपदार्थस्य निन्दा[118]। अर्थवादवाक्यस्य वाच्यार्थः विधेयस्य प्रशंसा अथवा निषेधस्य निन्दा लक्षणया ज्ञायते।

---

[116] “लिङ्गश्रवणे “अयं मां प्रवर्तयति”.....इति नियमेन प्रतीयमानत्वात्”, मीमांसान्यायप्रकाशः, पृ.सं.31.

[117] “न ह्यन्योपसर्जनत्वेनोपस्थितमन्यत्रान्वेति।”, अर्थसंग्रहः,पृ.सं.214.

[118] प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः। अर्थसंग्रहः, पृ.सं.245.

अर्थवादवाक्यस्य स्ववाच्यार्थे प्रयोजनं न भवति। उदाहरणार्थे "वायुर्वै क्षेपिष्ठा देवता" अस्य अर्थवादवाक्यस्य अभिप्रायः वायुः सर्वाधिकः शीघ्रगामी देवता अस्ति, अस्मिन्नर्थे न भवति, यतोहि अर्थवादवाक्यं वेदस्य एकः भागोऽस्ति,[119] सम्पूर्णवेदभागाः धर्मे एव निवसन्ति। एते सर्वे धर्मस्य यागादिक्रियायाः प्रतिपादनं कुर्वन्ति[120] (आम्नायस्य क्रियार्थत्वात्)। स्वाध्यायोऽध्येतव्यः अयमध्ययनविधिरपि विधानं करोति यत् वेदस्य अध्ययनं करणीयम्, अर्थात् वेदस्य अध्ययनं प्रयोजनं वर्तते। वेदः धर्मस्य प्रतिपादनं करोति, एवं धर्मानुष्ठानेन इष्टस्य प्राप्तिः भवति। इयमेव वेदस्य प्रयोजनता। अर्थवादोऽपि वेदस्य अन्तर्गतोऽस्ति, अनेन प्रकरेण अर्थवादोऽपि धर्मस्य यागादिक्रियायाः प्रतिपादकः भवेदिति, अतैव अर्थवादवाक्यमभिधया न तु स्वार्थपरकं भवति न हि क्रियापरकम्। परं तत्र लक्षणया इदं ज्ञायते यत् अर्थवादवाक्येन विधिविहितस्य पदार्थस्य प्रशंसा, निषेधवाक्येन निषिद्धपदार्थस्य निन्दा च क्रियते। विहिताः निषिद्धाश्च क्रियाः भवन्ति, एवं क्रियाणामङ्गभूताः अन्ये पदार्थाः। अतः अर्थवादवक्यं परम्परया क्रियापरकमेव भवति अर्थात् धर्मपरकम्।

विवेचनस्यास्य अभिप्रायोऽस्ति यत् अर्थवादवाक्यं विधिविहितस्य पदार्थस्य एवं निषेधेन निषिद्धपदार्थस्य क्रमशः प्रशंसा निन्दा च करोति। येन श्रोता विहितस्य सम्पादनेन इष्टस्य प्राप्तिः प्राप्तुं शक्नोति, एवं निषिद्धेन निवृत्वा अनिष्टात् रक्षितुं शक्यते। इदमेव कारणं यत् अर्थवादवाक्यं निरर्थकं न मन्यते। अर्थवादस्य द्वौ प्रभेदौ स्तः- विधिशेषः, निषेधशेषश्च।

### १.५.१ विधिशेषार्थवादविचारः-

अर्थवादोऽयं कस्यचन् विधिवाक्यस्य शेषांशरूपः भवति। अयं विधिशेषः एतदर्थं कथ्यते, यतोहि अयं विधेयस्य प्रशंसया विधिवाक्यस्य पूरकः भवति। विधौ अर्थवादे च एकवाक्यता भवति अर्थात् उभौ मिलित्वा पूर्णवाक्यं भवति[121]। विधिना विधेयस्य विधानं भवति, अतैव विधिः मुख्यः। अतः सिद्धोऽयं यत् अर्थवादवाक्यं विधिरूपमुख्यवाक्यस्य एकोऽवशिष्टः भागो वर्तते। एतदर्थमर्थवादं विधेः अवशिष्टभागः अर्थात् विधिशेषः कथ्यते। यथा- "वायुर्वै क्षेपिष्ठा देवता" इदमर्थवादवाक्यं **"वायव्यं श्वेतमालभेत भूतिकामः"** अस्य विधेः पूरकवाक्यं मन्यते। यतोहि वायव्यं श्वेतमालभेत भीतिकामः अस्य वाक्यस्य वाच्यार्थोऽस्ति यत् ऐश्वर्यमिष्यमाणः पुरुषः वायुदेवतायै श्वेतपशोः आलभनं कुर्यात्। अर्थात् अनेन विधिना वायुदेवतायै श्वेतपशोः आलभनस्य विधानं क्रियते। अत्र सम्भावना वर्तते यत् विधिमिमं श्रूयमणः व्यक्तिः

---

119 अपौरुषेयं वाक्यं वेदः। स च विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चविधः। अर्थसंग्रहः, पृ.सं.43.

120 वेदस्य सर्वस्य धर्मतापर्यवत्त्वेन धर्मप्रतिपादकत्वात्। अर्थसंग्रहः, पृ.सं.14.

121 विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः। जैमिनीसूत्र,-1/2/7.

प्रमादवशादुक्तविधेयस्य अनुष्ठाने प्रवृत्तः न स्यात्, अत एव विधेये प्रवृत्ताय "वायुर्वै क्षेपिष्ठा देवता" अनेन अर्थवादवाक्येन विधेयस्य प्रशंसा क्रियते। वायुदेवता शीघ्रगामी वर्तते, अत एव सः विधेयस्य अनुष्ठाताव्यक्तिमेश्वर्यमपि शीघ्रतया प्रददाति। अनेन प्रकारेण विधिशेषार्थवादेन विधेयस्य प्रशंसा विधीयते। विधेयस्य प्रशंसया व्यक्तेः प्रवृत्तिः विधेयानुष्ठाने स्यात् इदमेव विधिशेषस्य प्रयोजनम्[122]। विधेयस्य प्रशंसां श्रुत्वा आलस्ययुक्तः व्यक्तिरपि विधेयभूतस्य यागादेः अनुष्ठाने प्रवृत्तः भवति। अत एव विधेयस्य प्राशस्त्यस्य ज्ञानं, ज्ञापनञ्च व्यर्थः न वर्तते।

## १.५.२ निषेधशेषार्थवादविवेचनम्-

निषेधवाक्ये यः निषेध्यपदर्थः भवति तस्य निन्दा निषेधशेषार्थवादः करोति[123]। यथा विधिवाक्यस्य पूर्णतायै विधिशेषार्थवादस्य आवश्यकता वर्तते तथैव निषेधवाक्यस्य पूर्णतायै अपि अर्थवादस्य अपेक्षा भवति। अतः निषेधवाक्येन निषिद्धपदार्थस्य निन्दा क्रियामाणोऽर्थवादः "निषेधशेषः" कथ्यते। निषेधशेषस्य उदाहरणं वर्तते यथा- **"बर्हिषि रजतं न देयम्"** अस्यार्थो वर्तते यत् यागे[124] रजतस्य दक्षिणा न दातव्या इति। अत्र रजतदानस्य निन्दा अनेन निषेधशेषार्थवादेन क्रियते- **"सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्"** अनेनार्थवादवाक्येन ज्ञायते यत् रोदनेन यदश्रुः पतितः, तदेव रजतम्, अतः यदि रजतदानं भविष्यति तर्हि गृहे रोदनस्य प्रसङ्गः भविष्यति। अतः इदमर्थवादवाक्यं निषेधवाक्येन सह निषिद्धरजतदानस्य निन्दा करोति, येन निषेधार्थवादवाक्ययोः एकवाक्यता स्थापिता भवति[125]। इदमेवकारणं यत् प्रकृतार्थवादः निषेधशेषः कथ्यते। निषेधशेषार्थवादेन निषेधवाक्येन निषिध्यमानस्य रजतादिपदार्थानां निन्दायाः ज्ञानं भवति। इदं ज्ञानमपि आवाश्यकम्। यतोहि अस्याः निन्दायाः बोधे सति व्यक्तिः निषिध्यमानरजतदानादेः निवृत्तं भूत्वा रजतदानजन्यात् रोदनादिरूपानिष्टप्रसङ्गात् स्वं रक्षयति।

पूर्वमर्थवादस्य यत् विभाजनं आसीत्, तस्य आधारः अर्थवादस्य विधिना निषेधेन च सम्बन्धख्यापनमासीत्। अत्र अर्थवादस्य अन्यविभाजनमपि क्रियते, परमस्मिन् विभाजने अस्य आधारोऽयं वर्तते यत् अर्थवादस्य प्रतिपाद्यविषयस्य सिद्धिः अन्यप्रमाणैः भवति न वा। अनया दृष्ट्या अर्थवादस्य भेदत्रयं भवति- गुणवादः, अनुवादः, भूतार्थवादश्च।

---

[122] विधिशेषस्य विधेयार्थप्राशस्त्यबोधकतयार्थवत्त्वम्। अर्थसंग्रहः, पृ.सं.249.

[123] निषेधशेषस्य निषेध्यस्य निन्दितत्वबोधकतयार्थवत्त्वम्। अर्थसंग्रहः, पृ.सं.249.

[124] बर्हिश्शब्देन तद्विशिष्टो यागो लक्ष्यते। बर्हिषि यागे रजतं दक्षिणात्वेन न देयमित्यर्थः। (सारविवेचिनी)

[125] सोऽरोदीत् इत्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहेऽपि रोदनप्रसङ्गाद् "बर्हिषि रजतं न देयम्" इति तन्निषेधेन विधियेन अर्थवादस्य एकवाक्यत्वम्। (ऋग्वेदभाष्यभूमिका)

## १.५.३ गुणवादविवेचनम्-

यस्य अर्थवादस्य अभिधेयार्थस्य अन्यकेनापि प्रमाणेन विरोधः उत्पद्यते एवमनेन प्रकारेण अर्थवादस्य मुख्यार्थबाधात् गुणरूपलाक्षणिकः अर्थः प्राप्यते, सोऽर्थवादः गुणवादः कथ्यते[126]। अस्योदाहरणं यथा- **"आदित्यो यूपः"** अस्य वाच्यार्थः वर्तते यत् यूपः अर्थात् यज्ञस्तम्भः आदित्योऽस्ति, परमत्र सर्वे जानन्ति यत् यूपः आदित्यः न भवितुं शक्यते। अनेन प्रकारेण मुख्यार्थस्य बाधे सति "आदित्यो यूपः" अस्य अर्थः लक्षणया यूपः आदित्यवत् उज्ज्वलः भवतीति। अनेन प्रकारेण लक्षणया अत्र उज्ज्वलत्वरूपगुणः विवक्ष्यते। रूपेऽस्मिन् गुणस्य कथनत्वात् उक्तार्थवादं गुणवादः उच्यते।

## १.५.४ अनुवादविवेचनम्-

यस्य प्रतिपाद्यविषयः अन्यप्रमाणेन अपि अवधारितः अर्थात् निश्चितः भवति। अतः अस्य लक्षणं क्रियते यत्- **"प्रमाणान्तरावगतार्थबोधकोऽर्थवादोऽनुवादः"**[127] अर्थात् अन्यप्रमाणेन अवगतार्थस्य ज्ञानं कार्यमाणोऽर्थवादः अनुवादः कथ्यते। अस्योदाहरणं यथा- **"अग्निर्हिमस्य भेषजम्"** अर्थादग्निः शैत्यस्य औषधिः वर्तते। तात्पर्यमिदमस्ति यत् शैत्यस्य विनाशत्वात् अग्निः शैत्यस्य विरोधिः वर्तते। इदं प्रत्यक्षप्रमाणेन पूर्वमेव ज्ञातम्, तस्यैव ज्ञातविषयस्य ज्ञापनात् "अग्निर्हिमस्य भैषजम्" वाक्यमिदमनुवादः कथ्यते।

## १.५.५ भूतार्थवादविवेचनम्-

भूतार्थवादशब्दस्य अर्थः वर्तते यत्- यथार्थस्य अभिधानं वाक्यमिति। यस्मिन्नर्थवादस्थले न तु गुणवादस्थलवत् प्रमाणान्तरेण विरोधः भवति, अर्थात् यत्र प्रमाणान्तरविरोधस्य, प्रमाणान्तरावधारणस्य च उभयोरेवाभावः भवति, तत्र भूतार्थवादसंज्ञकः अर्थवादः मन्यते[128]। अस्योदाहरणं वर्तते यत्- "इन्द्रो वृत्राय वज्रमुदयच्छत्" अस्यार्थोऽस्ति यत् इन्द्रः वृत्रस्य वधाय वज्रमुत्थापितवान्। स्थलेऽस्मिन् न तु एतादृशं किमपि प्रमाणं प्राप्यते, येन वृत्रस्य वधाय इन्द्रस्य वज्रमुत्थापितस्य विरोधः स्यात्, एवमेतादृशमपि किमपि प्रमाणं न प्राप्यते, येन ज्ञातुमिदं शक्यते यत् "इन्द्रः वृत्रवधायवज्रमुत्थापितवान्"। अनेन प्रकारेण अत्र प्रमाणान्तरविरोधस्य प्रमाणान्तरावधारणस्य च उभयोरभावात् "इन्द्रो वृत्राय वज्रमुदयच्छत्" वाक्यमिदं भूतार्थार्थवादस्य उदाहरणं मन्यते।

---

[126] प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः। अर्थसंग्रहः, पृ.सं.250.

[127] अर्थसंग्रहः, पृ.सं.250.

[128] प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादो भूतार्थवादः। अर्थसंग्रहः, पृ.सं.250.

# ॥ द्वितीयोऽध्यायः ॥

## २. ॥ नञर्थविचारः ॥

वैदिकवचनानामेकः भागः निषेधोऽस्ति। निषेधैः मनुष्यानां तेषामुद्देश्यानां पूर्तिः भवति, यैः पुरुषः अवाञ्छितफलस्य उत्पादयेभ्यः कर्मभ्यः स्वीयं रक्षितुं शक्नोति। यथा विधिवाक्यं पुरुषं प्रेरयति, यथा यागः कस्यचित् वाञ्छितफलस्य प्राप्तेः साधनं वर्तते, अतः तत्विधिवाक्यं व्यक्तिं तस्य यागस्य सम्पादनाय प्रेरयति। तथैव प्रतिषेधवाक्यानि व्यक्तिमनिष्टकर्मभ्यः रक्षयन्ति। यथा- "न कलञ्जं भक्षयेत्" इदं वाक्यमनर्थसाधनकलञ्जभक्षणात् तत्प्रवृत्तपुरुषस्य निवर्तकम् भवति। नञर्थस्य चर्चा विभिन्नदर्शनेषु कृता वर्तते अस्मिन् लघुशोधे मीमांसादर्शने, व्याकरणे, न्यायदर्शने च नञः किं स्वरूपमस्ति, एवं तस्य कोऽर्थः, कति तस्य भेदाः इत्येतस्मिन् विषये चर्चा क्रियते। तर्हि अत्र सर्वप्रथमं मीमांसायां नञर्थस्य किं स्वरूपं वर्तते कथं नञर्थेन अर्थबोधो भवति इति विचारः क्रियते। यतोहि नञः अर्थः विरोधः अपि भवति, सर्वत्र तस्य अर्थः अभावः एव न भवति अस्यैव निरूपणं क्रियते-

### २.१ मीमांसायां नञर्थविचारः-

मीमांसायां नञः किं स्वरूपं वर्तते? नञर्थस्य अन्वयः केन सह कदा भवति? एवं नञ् कदा निषेधार्थं प्रतिपादयति? कदा नञा विरोध्यर्थः प्रतिपाद्यते? एतेषां विषये निम्नरुपेण सम्यक्तया ज्ञातुं शक्यते-

### २.१.१ नञ्स्वभावनिरूपणम्-

नञर्थस्य ज्ञानात् पूर्वं तस्य स्वरूपस्य ज्ञानमावश्यकम् भवति। अतः सर्वप्रथमं तस्य स्वरूपस्य लक्षणं क्रियते- नञः स्वभावोऽयं यत् सः स्वसमभिव्याहृतपदार्थस्य विरोध्यर्थस्य ज्ञानं कारयति[129]। यथा- "घटो नास्ति" वाक्येऽस्मिन् अस्तिशब्देन सहोच्चारितः नञ् घटस्य अस्तित्वस्य विरोधिः "घटासत्त्व" इत्यर्थस्य ज्ञानं कारयति, अत एव घटो नास्ति इत्यस्य घटासत्त्वार्थः ज्ञायते। अनेन प्रकारेणैव "न कलञ्जं भक्षयेत्" अस्मिन् निषेधवाक्ये "भक्षयेत्" पदं विधिलिङ्गे प्रयुक्तः। लिङस्य अर्थः प्रवर्तना भवति[130], इति शाब्दी भावनायां स्पष्टं वर्तते। अनेन प्रकारेण स्पष्टं वर्तते यत् लिङस्य अर्थः प्रवर्तना, एवं नञः अर्थः समीपोच्चारितपदार्थस्य

[129] "नञश्चैष स्वभावो यत् स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्", अर्थसंग्रहः, पृ.सं.216.

[130] "तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभवना। सा च लिडंशेनोच्यते। लिङ्श्रवणेऽयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीतेः।" अर्थसंग्रहः, पृ.सं.23.

विरोधः भवति, तर्हि लिङेन सहोच्चारितस्य नञः अर्थः प्रवर्तनायाः विरोधी अर्थात् निवर्तना वर्तते। यथा- "यजेत स्वर्गकामः" इत्यादीनि विधिवाक्यानि श्रुत्वा पुरुषम् अर्थबोधो भवति यत् "इदं विधिवाक्यां मां यागे प्रवर्तयति" अतः प्रवर्तना अर्थात् प्रवृत्त्यनुकूलव्यापारस्य प्रतीतिः भवति। तथैव "न कलञ्जं भक्षयेत्" इत्यादीनि निषेधवाक्यानि श्रुते वाक्यमिदं कलञ्जभक्षणात् निवर्तयति अनेन प्रकारेण निवर्तना अर्थात् निवृत्त्यनुकूलव्यापारस्य प्रतीतिः भवति। अतः अत्र स्पष्टं यत् यान्यपि निषेधवाक्यानि भवन्ति तेषां वाक्यार्थः निवर्तना एव भवति।

विधेः वाक्यार्थः प्रवर्तना निषेधस्य च निवर्तना। अर्थात् विधेः निषेधस्य च परस्परः विपरीतार्थः भवति। यदि "न कलञ्जं भक्षयेत्" अस्य निषेधवाक्यस्य वाक्यार्थः हननवर्जनकर्तव्यता मन्यते तर्हि हननवर्जनकर्तव्यता इत्यर्थः प्रवर्तना एव भवति। तदा विधिनिषेधयोः विपरीतार्थः न वर्तते, अपितु समानार्थः एव। परमुभयोः समानार्थता नोचिता यतोहि न्यायसुधायाः बृहट्टीकायामुद्धृतः यत्- लोके या भिन्नता ब्राह्मणहत्यापापकर्मणि अश्वमेधपुण्यकर्मणि च मन्यते, सा एव भिन्नता वैदिकविधिवाक्ये निषेधवाक्ये च प्रतिपाद्यते। पुनश्च विधिनिषेधयोः भिन्नता सारविवेचनीटीकायां पञ्चभेदानामाधारैः स्पष्टीकृता यत्- स्वर्गादिरूपमिष्टं फलं विधेः, अनिष्टनिवृत्तिर्निषेधफलम्। विधिश्रवणे "अहमनेनास्मिन् कर्मणि प्रवर्तितः" इति बुद्धिरुत्पद्यते, निषेधश्रवणे च "अहमस्मात् कर्मणो निवर्तितः" इति धीरुदेति। यागादिगतेष्टसाधनत्वं विधेः प्रमेयम्, कलञ्जभक्षणादिगतानिष्टसाधनत्वं निषेधस्य प्रमेयम्। यथोक्तम्- विशेषणविशिष्टः स्वर्गादिकामनावान् निमित्तवान् वा पुरुषः स्वयमप्रवृत्तः प्रमाणान्तरेणाप्रवर्तितो विधेयेष्वधिकारी, रागादिना प्रवृत्तमात्रः पुरुषो निषेधेस्वधिकरोति। नञ्रहितो लिङादिर्विधेर्बोधकः लिङाद्यनुगृहीतो नञ् निषेधस्य बोधकः[131]। अनयोः विधिनिषेधयोः भिन्नतां निम्नलिखितचार्टमाध्यमेनापि ज्ञातुं शक्यते-

| विधिपक्षः | निषेधपक्षः |
|---|---|
| ➢ **फलभेदः-** विधेः फलं स्वर्गादीष्टपदार्थः भवति। | निषेधस्य फलमनिष्टपरिहारः नरकादिगमनात् रक्षणम्। |
| ➢ **बुद्धिभेदः-** विधिवाक्यस्य श्रवणे अनेन विधिना अहमस्मिन् कार्ये प्रवृत्तः एतादृशं ज्ञानं भवति। | निषेधवाक्यश्रवणे अहमस्मात् कार्यात् निवृत्तोऽस्मि इति ज्ञानं भवति। |
| ➢ **प्रमेयभेदः-** विधेः प्रमेयः यागादेः इष्टसाधनता। | निषेधस्य प्रमेयः कलञ्जभक्षणादेः अनिष्टस्य साधनं भवति, अतः कलञ्जभक्षणादेः अनिष्टसाधनता। |

131 सारविवेचिनी, पृ.सं.159-60.

| | |
|---|---|
| ➢ **अधिकारभेदः-** विधिश्रुतविशेषणैः युक्तः सः पुरुषः यः न स्वं कर्मणि प्रवृत्तः, एवं न अन्यप्रमाणेन प्रवृत्तः सः विधौ अधिकारी भवति। | रागादिभिः कलञ्जभक्षणादौ स्वयमेव प्रवृत्तमान् पुरुषः निषेधस्थले अधिकारी भवति। |
| ➢ **बोधकभेदः-** विधेः बोधकः नञा रहितः लिङ्गादिप्रत्ययः। | निषेधस्य बोधकः लिङ्गादिभिः अन्वितः नञ् भवति। |

अस्यैव विधिनिषेधयोः भिन्नतायाः चर्चा न्यायसुधायामपि कृता, तत्र सामान्यतया उक्तं यत्- विधेः इष्टफलं निषेधस्य चानिष्टफलम् वर्तते। विधिः प्रेरयति निषेधश्च निवर्तयति[132]। विधेयस्य प्रमेयः इष्टसाधनता निषेधस्य च अनिष्टसाधनता[133]। विधेः अधिकारी सः भवति यः अन्यकारणेन न प्रवर्तयति एवं निषेधस्य तु रागादिवशात् यः प्रवृत्तः सः[134]। नञ्वर्जितः लिङः विधेः बोधकः एवं लिङादिना अनुगृहीतः नञ् निषेधस्य बोधकः इति[135]। उक्तविवेचनेन स्पष्टं यत् निषेधवाक्यानामर्थः निवर्तना एव भवति। अर्थात् निषेधवाक्यं निवर्तनायाः प्रतिपादकं भवति। यथा निषेधवाक्यस्य विषये उक्तं यत् तत्र नञः अन्वयः लिङ्गत्ययेन सह भवति तदा एव निवर्तनायाः बोधो भवति। परं यदा कदा लिङ्गत्ययेन सह नञः अन्वये सति बाधा भवति इति मीमांसकाः अपि स्वीकुर्वन्ति। तर्हि तस्मिन् बाधस्थले कथमर्थबोधो भवति विषयस्यास्य विवेचनं क्रियते-

## २.१.२ नञर्थेन प्रत्ययार्थस्यान्वये बाधकविचारः-

यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च बाधकं द्विविधम्। तस्य व्रतम् इत्युपक्रमो, विकल्पप्रसक्तिश्च।

### २.१.२.१ तस्य व्रतम्-

अत्र उभयोः बाधकयोः प्रथमोऽस्ति तस्य व्रतम् अस्य उपक्रमः "तस्य व्रतम्" अस्य अर्थः भवति

---

132 "विधिरिष्टफलोऽनिष्टपरिहारफलो परः।
प्रेरितोऽस्मीतिधीः पूर्वे वारितोऽस्मीति चापरे॥" न्यायसुधा- 1/3/7, पृ.सं.394-395.

133 "विधेयस्येष्टहेतुत्वं विधिना च प्रमीयते।
निषेधेन निषेध्यस्थ प्रत्यवायनिमित्तता॥" न्यायसुधा, 1/3/8. पृ.सं.394.

134 "विधिश्चाधिकारोत्यन्यकारणेनाप्रवर्तितम्।
रागादिना प्रवृत्तं तु निषेधस्तद्विलक्षणम्॥" न्यायसुधा, तत्रैव..

135 "नञ्वर्जितो लिङ्गादिश्च विधिबोधस्य कारणम्।
लिङाद्यनुगृहीतस्तु नञ् निषेधस्य बोधकः॥" न्यायसुधा, तत्रैव..

यत् ब्रह्मचारीणां कर्तव्यः। यत्र कुत्रापि ब्रह्मचारीणां कर्तव्यानामुपक्रमः अर्थात् आरम्भः तस्य व्रतं पदैः कृतः, तत्र लिङर्थस्य प्रवर्तनायाः अन्वयः नञर्थेन न भविष्यति, यतोहि तस्य व्रतमनेन सङ्कल्पेन नञर्थस्य अन्वये सति प्रवर्तनायाः बाधः भविष्यति, अतः एषु स्थलेषु धात्वर्थस्य एव नञर्थेन अन्वयः भवति।

नञ्युक्तनिषेधवाक्येषु द्वाभ्यां बाधकाभ्यां पर्युदासस्य आश्रयः गृह्यते। पयुर्दासः सः भवति यत्र उत्तरपदेन नञ् भवति[136] अर्थात् क्रियावाचकभावनावाचकप्रत्ययाभ्याम् अतिरिक्तः शब्दः धातुश्च एवं कलञ्जादिसंज्ञा शब्दैः नञः अन्वयः स्यात्, एवं निषेधः तत्र भवति यत्र क्रियया आख्यार्थेन[137] सह नञर्थोऽन्वितः[138]। चिन्नस्वामिशास्त्रिणा सूचितं यत् अत्र पर्युदासप्रतिषधयोः लक्षणयोः बोधिका कारिका भर्तृहरिकृतस्य वाक्यपदीयस्य श्लोकांशः वर्तते[139]।

अत्र "नेक्षेतोद्यन्तमादित्यम्"[140] अर्थात् उद्यन्तमादित्यं न पश्येत् इति। अस्मिन् वाक्ये पर्युदासस्य आश्रयः गृह्यते, यतोहि तस्य व्रतम् अयं कर्तव्यसूचकः उपक्रमोऽस्ति। स्पष्टरूपेण अनेन ज्ञातुं शक्यते- "व्रत" शब्दः कर्तव्यस्य कथनं करोति। अतः तस्य व्रतमत्र स्नातकस्य कर्तव्यपदार्थवाचनाय उपक्रमः प्रस्तुतः। इदं श्रुत्वा तत् कर्तव्यमर्थात् स्नातकैः अनुष्ठेयकर्म किमस्ति इयमपेक्षा सति "नेक्षेतोद्यन्तमादित्यम्" अस्मिन् वाक्ये कर्तव्यार्थः एव भवितव्यः न तु निवर्तना। यतोहि यदि अकाङ्क्षितस्य पदार्थस्य अभिधानं न कृत्वा अर्थान्तरस्य अभिधानं क्रियते तर्हि पूर्ववाक्यस्य "तस्य व्रतम्" अस्य साकाङ्क्षत्वात् अप्रमाणं भविष्यति। साकाङ्क्षवाक्यस्य प्रामाण्यं न भवति अन्यथा "गौरश्वः पुरुष.." इत्यादिषु वाक्येषु अपि प्रामाण्यस्य प्रसक्तिः भविष्यति, यन्नोचितम्। अथ च कर्तव्यार्थस्य उक्तिः न भूत्वा अर्थान्तरस्य उक्तेः सत्त्वात् "नेक्षेतोद्यन्तम्" अस्य वाक्यस्य उपक्रमेण "तस्य व्रतम्" अनेन सह ज्ञेयमाना एकवाक्यता न भविष्यति। अनयोः एकवाक्यता वस्तुतः प्रतीयमाना, स्थापिता, निर्णीता च। अतः "नेक्षेतोद्यन्तमादित्यम्" वाक्येन कस्यचित् कर्तव्यार्थस्य एव प्रतिपादनं भवेत्, एवं कर्तव्यार्थस्य

---

[136] "अत्रोत्तरपदं क्रियावाचकप्रत्ययातिरिक्तपरम्..." सारविवेचिनी, पृ.सं.161.

[137] क्रिया च आख्यातार्थः, सारविवेचिनी, पृ.सं.161.

[138] पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रतिषेधः स विज्ञेयः क्रियया सह यत्र नञ्॥

[139] लक्षणवाक्यद्वयमपीदं हरिकारिकायां श्लोकद्वयस्यार्धार्धात्मकम्। तत्र च-
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्॥
प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासस्स विज्ञेयो यत्रोत्तरपदेन नञ्॥
इतिश्लोकद्वयं श्रूयते। ग्रन्थकारस्त्वयं प्रकृतोपयुक्तमेकैकश्लोकादेकैकमर्धमुपादाय प्रतिषेधलक्षणे किञ्चिदन्यथयित्वा व्यलिखदित्यवगम्यते। सारविवेचिनी, पृ.सं.161

[140] नेक्षेतोद्यन्तमादित्यं नान्तं यस्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्॥ मनुस्मृति-4/37.

अभिधानाय आवश्यकोऽस्ति यत् नञर्थस्य प्रत्ययर्थेन नान्वयः। कारणमिदं यत् नञर्थस्य प्रत्ययार्थेन सम्बन्धे कर्तव्यार्थः उपपन्नः न भवितुमर्हति। तदा नञ् धात्वर्थेन अन्वितः। यतोहि प्राधन्यक्रमे प्रत्ययार्थस्यानन्तरं धात्वर्थः एव। धात्वर्थेन अन्वये सति नञ् प्रतिषेधकः न अपितु प्रवर्तकः, कर्तव्यार्थस्य अभिधानं करोतीति।

अतः नेक्षेत् अस्य लक्षणया धात्वर्थविरोधिरूपे “अनीक्षणसङ्कल्पः” इत्यर्थः भवति, कारणं यत् धात्वर्थविरोधी पदार्थः एतादृशः स्यात् यः कर्तव्यरूपे स्यात्। सङ्कल्पः भावात्मकं मानसकर्म भवति। अनेन प्रकारेण अनीक्षणसङ्कल्पः कर्तव्यस्य स्थितौ सति “नेक्षेतोद्यन्तमादित्यम्” वाक्यस्य मीमांसासम्मतार्थः इत्थं भवति- “आदित्यविषयकानीक्षणसङ्कल्पेन भावयेत्” अतः अत्र अर्थबोधवाक्यं विधिरूपे कर्तव्यरुपः भवति। उक्तवाक्ये भावयेत् पदं साकाङ्क्षं वर्तते। अत्र किं भावयेत् अनेन प्रकारेण साध्यस्य आकाङ्क्षा भवति, यस्य उपशमनं “एतावता हैनसा वियुक्तो भवति” अनेन अर्थवादवाक्येन भवति। अस्य अर्थो भवति यत् अनेन आदित्यविषयकानीक्षणसङ्कल्पेन व्यक्तिः पापात् मुक्तः भवति। अतः नेक्षेतोद्यन्तमादित्यम् एवम् एतावता हैनसा वियुक्तो भवति एते द्वे वाक्ये मिलित्वा पूर्णवाक्यं भवति। उभे वाक्ये परस्परं साकाङ्क्षत्वात्। प्रथमवाक्यं साध्याकाङ्क्षं द्वितीयञ्च साधनाकाङ्क्षम्। उपर्युक्तविविचनेन सिद्धोऽयं भवति यत् अत्र धात्वर्थविरोधरूपे अनीक्षणसङ्कल्पः एव अर्थः न तु प्रवर्तनाविरोधी निवर्तना इति।

चिन्नस्वामी व्रत शब्दं धर्मस्य, एवम् उपक्रमशब्दम् उपसंहारस्य उपलक्षणं स्वीकरोति। अस्मिन् स्थितौ यदि उपसंहारवाक्ये धर्मस्योल्लेखः स्यात् एवं तस्य पूर्वं धर्मपरकवाक्ये नञः प्रयोगः स्यात् तर्हि पर्युदासस्य आश्रयः स्वीकरिष्यते एवं नञर्थस्य अन्वयः धात्वर्थेन भविष्यति। उदाहरणेन अवबोध्यते यत् पूर्वं विधिवाक्यस्य उल्लेखः प्राप्यते- “एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि” अर्थात् उभयोः पक्षयोः एकादश्यां भोजनं न कुर्यात्। पुनश्च पश्चात् उक्तवाक्यस्य प्रसङ्गे उपसंहारवाक्यं प्राप्यते- “वनस्थयतिधर्मोऽयम्”। अत्र उपसंहारवाक्ये धर्मशब्दस्य अर्थः कर्तव्योऽस्ति। अत एव “एकादश्यां न भुञ्जित पक्षयोरुभयोरपि” अस्मिन्नपि कर्तव्यस्य प्रतिपादनं भवेत् तदैव उभयोः वाक्ययोः एकवाक्यता भवति। अत्र न भुञ्जीत अस्य अर्थः लक्षणया अभोजनसङ्कल्पेन भावयेत् इति भवति[141]।

[141] व्रतमित्युपलक्षणं धर्मादिपदस्यापि। उपक्रम इत्युपलक्षकमुपसंहारस्यापि। अत एव एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोऽयम् इत्यत्राभोजनसङ्कल्पलक्षणा स्मर्तृभिरङ्गीकृता सङ्गच्छते। (सारविवेचिनी)

केवलं धात्वर्थेन सह एव नञर्थस्य अन्वये सति नञ् प्रतिषेधकः न भवति अपितु नामार्थेन सह अपि यदा नञर्थस्य अन्वयः, तदा अपि नञ् न प्रतिषेधकः [142]। कारणमस्ति यत् नाम धातुश्च विधायकौ न स्तः। विधायकः तु प्रत्ययः भवति। तात्पर्यमिदमस्ति यत्- धात्वर्थेन सह नञर्थस्य अन्वये सति नञ् प्रतिषेधको न भवति, यथा "नेक्षेत" अत्र नञर्थस्य "ईक्ष" धात्वर्थेन सम्बन्धे सति "ईक्षणविरोधी" अनीक्षणसङ्कलपस्य बोधं भवति न तु प्रतिषेधस्य। अन्विते सति "नञ्" एवं "ईक्ष" उभाभ्यां लक्षणावृत्या[143] ईक्षणाविरोध्यर्थस्य प्रतिपादनं क्रियते। ब्राह्मणः धर्मश्च शब्दौ नामसंज्ञकौ स्तः। अनयोः नामार्थयोः नञर्थेन अन्वये सति "अब्राह्मणः" "अधर्मः" च रूपे प्राप्येते। अत्र नञ् केवलं कस्यचित् ब्राह्मणस्य धर्मस्य च विरोधी पदार्थस्य कथनं करोति, न तु प्रतिषेधस्य।

## २.१.२.२ विकल्पप्रसक्तिः-

नञर्थेन प्रत्ययार्थस्य अन्वये द्वितीयं बाधकं विकल्पप्रसक्तिः वर्तते। अस्योदाहरणं वर्तते यत्- "यजतिषु ये यजामहं करोति नानुयाजेषु" श्रौतसूत्रे पठित्वात् वाक्यमिदं शास्त्रमुच्यते। अस्य वाक्यस्य अर्थोऽस्ति यागेषु "ये यजामहं" संज्ञकमन्त्रस्य पाठः करणीयः, न अनुयाजेषु। वस्तुतः "यजतिषु ये यजामहं करोति, नानुयाजेषु" अस्मिन् द्वे वाक्ये स्तः प्रथमवाक्यं यजतिषु ये यजामहं करोति, द्वितीयं वाक्यं नानुयाजेषु इति। अत्र अवगम्यते यत् द्वितीयं वाक्यं नानुयाजेषु इदं पूर्णं नास्ति। अस्य पूर्णरूपं प्रथमवाक्येन सम्भवति अर्थात् परवाक्यं पूर्ववाक्याश्रितं वर्तते। पूर्ववाक्येन परवाक्यस्य पूर्णरूपमिदं भवति- "नानुयाजेषु ये यजामहं करोति"। अस्य अर्थः भवति यत् अनुयाजसंज्ञकेषु याजेषु ये यजामहं मन्त्रस्य पाठः न करणीयः। अनुयाजेषु ये यजामहं न करोति अस्मिन् वाक्ये नञर्थेन प्रत्ययार्थस्य अन्वयः न कर्तुं शक्यते। कारणमस्ति यत् नञर्थेन प्रत्ययार्थस्य अन्वये सति निवर्तनायाः बोधो भविष्यति एवं निवर्तनया अनुयाजसंज्ञकेषु याजेषु ये यजामहं मन्त्रस्य पाठः न करणीयः इति स्वीकरणीयम्। अनेन ये यजामहम् अस्य मन्त्रस्य निषेधो भविष्यति। परमत्र ज्ञातव्यमस्ति यत् कस्यापि पदार्थस्य निषेधः सदैव प्राप्तिपूर्वकः भवति अर्थात् यस्य कस्यापि पदार्थस्य प्राप्तिः पूर्वं भवति, तस्य एव निषेधः सम्भवः। यस्य प्राप्तिः न भवति तस्य प्रतिषेधोऽपि न। उदाहरणाय "नान्तरिक्षे न दिवि" अनेन चयनस्य प्रतिषेधः किमर्थं स्वीकरणीयः यतोहि चयनेन तात्पर्यमस्ति यत् आहवनीयाग्नेः स्थापनायै इष्टकाभिः यज्ञवेद्याः निर्माणं स्यात्[144]। अत्र आधाररहिते अन्तरिक्षे कथं चयनं कर्तुं शक्यते, अर्थात् चयनस्य प्राप्तिः

[142] घटादितुल्यता तस्य प्रतिषेधो न चाप्ययम्। विधायकैरसंयुक्तो न हि नञ् प्रतिषेधकः॥ श्लोकवार्तिक, वा.अ. श्लोक सं. 308

[143] अतश्च नञीक्षतिभ्यां विधानयोग्यः कश्चनेक्षणविरोधी अर्थो लक्षणया प्रतिपाद्यते, मीमांसान्यायप्रकाशः, पृ.सं.421

[144] "चयनं नामाहवनीयस्याग्नेः स्थापनार्थमिष्टकाभिः स्थण्डिलविशेषसम्पादनम्" सारविवेचिनी, पृ.सं.167.

कथं भविष्यति यतोहि यदा चयनस्यैव अप्राप्तिः वर्तते तदा तस्य प्रतिषेधस्य तु प्रश्नः एव न। प्रतिषेधः प्राप्तिपूर्वकः एव नान्यथा। तथैव "न कलञ्जं भक्षयेत्" वाक्यं कलञ्जभक्षणस्य निषेधः करोति, यतोहि अत्रापि कलञ्जभक्षणस्य प्राप्तिः रागेन पूर्वमेव भवति।

अत्र स्पष्टमेव यत् अनुयाजेषु ये यजामहं न करोति अस्मिन् वाक्ये ये यजामहं मन्त्रस्य प्राप्तिः यजतिषु ये यजामहं करोति वाक्येन भवति। उभयोः वाक्ययोः एकवाक्यता त्वस्त्येव। उभे वाक्ये शास्त्रसंज्ञज्ञा अभिहिते स्तः, यतोहि ते वाक्ये शास्त्रे श्रौतसूत्रे प्राप्येते। अनेन प्रकारेण नञर्थेन प्रत्ययार्थस्य अन्वये सति यजतिषु ये यजामहं करोति अनेन शास्त्रेण ये यजामहं मन्त्रस्य अनुयाजेषु ये यजामहं न करोति अनेन शास्त्रेण निषेधः प्राप्यते। परं शास्त्रप्राप्तस्य पदार्थस्य अन्यशास्त्रेण निषेधः न मन्यते। कारणमस्ति यत् प्रकृतस्थले परशास्त्रं स्वार्थबोधहेतवे पूर्वशास्त्रस्य अपेक्षा भवति। अनेन प्रकारेण सापेक्षत्वात् परशास्त्रं पूर्वशास्त्रप्राप्तमन्त्रस्य बाधे असमर्थोऽस्ति। यदि उभे शास्त्रे परस्परं निरपेक्षे भवतः तर्हि तयोः बाध्य-बाधकभावसम्बन्धः भवितुमर्हति। एतदतिरिक्तं रागप्राप्तपदार्थस्य शास्त्रेण निषेधः भवितुं शक्यते, यथा रागप्राप्तस्य कलञ्जभक्षणस्य बाधः न कलञ्जं भक्षयेत् अनेन शास्त्रेण भवति, रागप्राप्तस्य पदार्थस्य यथा शास्त्रेण बाधः भवति, तथैव शास्त्रप्राप्तस्य पदार्थस्य अन्यशास्त्रेण बाधः न भवितुमर्हति[145]। अतः यस्य पदार्थस्य प्राप्तिः शास्त्रेण भवति, एतादृशस्य "ये यजामहम्" मन्त्रस्य निषेधः शास्त्रान्तरेण अनुयाजेषु ये यजामहं न करोति इत्यनेन न भवितुं शक्यते।

अनेन विवेचनेन अत्र प्रश्नः उदेति यत् प्रकृतस्थले एकशास्त्रेण प्राप्तस्य पदार्थस्य अपरशास्त्रेण निषेधोऽस्ति यन्नोचितम्। तदा तत्र किमुचितम्? अस्योत्तरे वदति यत् विकल्पः अत्र मान्यः। अर्थात् यदा शास्त्रप्राप्तस्य शास्त्रेण निषेधः भवति, तदा तत्र विकल्पः भवति, न निषेधः। विकल्पस्य स्थले पाक्षिका अप्रमाणिकता भवति। अतैव यदा विकल्पस्य प्राप्तिः भूयते तदा पर्युदासस्य आश्रयः गृह्यते। पर्युदासस्य आश्रये नञर्थेन धात्वर्थस्य नान्वयः। अनेन प्रकारेण सिद्धोऽयं यत् विकल्पप्रसक्तिः नञर्थेन प्रत्ययार्थस्य अन्वये बाधकं वर्तते।

अत्र पूर्वपक्षेण एतादृशः दृष्टान्तः उपस्थाप्यते, यस्मिन् शास्त्रप्राप्तस्य अपरशास्त्रेण निषेधः प्राप्यते। अस्मिन्नेव आधारे सः प्रकृतस्थलेऽपि शास्त्रप्राप्तस्य शास्त्रान्तरेण निषेधः स्वीकर्तुमिच्छति। पूर्वपक्षः उदाहरणं प्रस्तौति यत् "सप्तमे पदे जुहोति" वाक्यमिदं पदशास्त्रम्। अस्य अर्थोऽस्ति गोः सप्तमे पदे यागः करणीयः। ज्योतिष्टोमप्रकरणे गोविशेषेण सोमक्रयणस्य विधानमस्ति यत्- "अरुणया पिङ्गाक्ष्यैकहान्यया (गवा) सोमं क्रीणाति" यजमानस्य गोष्ठे स्थितः

---

145 शास्त्रेण भ्रान्तिनिमित्तरागस्येव शास्त्रान्तरस्यात्यन्तबाधायोगात्। मीमांसान्यायप्रकाशः, पृ.सं.427.

गां क्रयस्थानं प्रति नीयते। तस्य गोः यत्र सप्तमः पादक्षेपः भवति तत्रैव यागस्य विधानम् "सप्तमे पदे जुहोति" अनेन विधिशास्त्रेण क्रियते। एवं आहवनीयशास्त्रं- "यदाहवनीये जुहोति" इदं वाक्यं वर्तते। तर्हि अत्र पूर्वपक्षेण कथ्यते यत् यथा "सप्तमे पदे जुहोति" अनेन शास्त्रेण "आहवनीये जुहोति" अस्य सामान्यशास्त्रस्य बाधः भवति यतोहि विशेषविषयस्य विधानं क्रियमाणं शास्त्रं सामान्यविषयकविधायकशास्त्रात् बलवान् भवति। तथैव "नानुयाजेषु" अनेन विशेषशास्त्रेण "यजतिषु येयजामहं करोति" अस्य सामान्यशास्त्रस्य बाधः किमर्थं न स्वीक्रियते इति पूर्वपक्षस्य मतम्।

अस्य समाधानं क्रियते यत् इति तु सत्यं यत् विशेषशास्त्रेण सामान्यशास्त्रस्य बाधः भवति, परम् एकशास्त्रं शास्त्रान्तरस्य बाधः तदा न कर्तुं शक्नोति यदा ते उभे शास्त्रे स्व-स्वविधेयस्य विधानाय परस्परमाश्रितौ भवतः। स्वतन्त्ररूपेण यदि शास्त्रे स्तः तर्हि तत्र बाधः सम्भवः। अर्थात् द्वयोः शास्त्रयोः बाध्यबाधकभावसम्बन्धः तदैव भवितुमर्हति यदा उभयोः परस्परः निरपेक्षता वर्तते, किमपि शास्त्रं शास्त्रान्तरस्य अपेक्षा न भवति। पूर्वपक्षेण प्रदत्ते उदाहरणे "सप्तमे पदे जुहोति" इदं पदशास्त्रं स्वस्य विधेयस्य विधाने आहवनीयशास्त्रस्य अपेक्षा न भवति। उभे शास्त्रे परस्परं निरपेक्षे सति अत्र पदशास्त्रेण आहवनीयशास्त्रस्य बाधः भवति। परं "नानुयाजेषु" इदं निषेधशास्त्रं कृतकार्याय "यजतिषु येयजामहं करोति" अस्य विधिशास्त्रस्य अपेक्षा भवति, यतोहि अनेन एव विधिना "नानुयाजेषु" अस्य निषेध्यस्य "येयजामहम्" अस्य प्राप्तिः भवति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् परस्परं उभे शास्त्रे सापेक्षत्वात् बाध्यबाधकाभावाच्च "यजतिषु ये यजामहं करोति" अस्य शास्त्रस्य बाधः "नानुयाजेषु" अर्थात् अनुयाजेषु ये यजामहं न करोति अनेन वाक्येन न सम्भवति।

यदा शास्त्रवाक्येषु एकशास्त्रवाक्यं स्वार्थबोधनाय शास्त्रान्तरे आश्रितः भवति तदा निषेधशास्त्रम् आश्रयशास्त्रं न प्रतिषेधयति। परमत्र प्रकृतस्थले नोचितं यतोहि यदि "नानुयाजेषु" अनेन ये यजामहमस्य निषेधः न भविष्यति तर्हि अनुयाजेष्वपि अस्य प्राप्तिः भविष्यति यत् नोचितम्। अतैव एतादृशेषु स्थलेषु प्रतिषेधः न स्वीक्रियते, अपितु विकल्पस्य आश्रयः गृह्यते, परं सर्वत्र विकल्पस्य आश्रयः अपि न समीचीनम्। यतोहि विकल्पस्य अपि दोषयुक्ते[146] सति सः अनुष्ठेयपदार्थबोधकशास्त्रस्य पाक्षिकः अप्रामाण्यम्। यथा- "व्रीहिभिर्यजेत यवैर्वा" इदं वाक्यं गृह्यते, अत्र वैकल्पिकरूपेण वाक्यद्वयं वर्तते- व्रीहिभिर्यजेत, यवैर्यजेत च अत्र उभे वाक्ये परस्परं

---

[146] तथा च विकल्पः स चाष्टदोषदुष्ट इति, मीमांसान्यायप्रकाशः, पृ.सं.408.

निरपेक्षे स्तः। अत्र यदि बाध्य-बाधकभावः स्वीक्रियते तर्हि कः कस्य बाधकः? इति निर्णयः न भविष्यति अतः अत्र विकल्पः गृह्यते। विकल्पे सति स्व स्व स्थाने उभे अनुष्ठिते सति कथञ्चित् उभयोः वाक्ययोः प्रामाण्यस्य रक्षा भवति, परं यदा यवैर्यजेत इदं वाक्यं प्रमाणं मत्वा यवैः यागानुष्ठानं क्रियते, अस्मिन् स्थितौ यवशास्त्रं (यवैर्यजेत) प्रमाणम्। किन्तु यदा व्रीहिभिर्यजेत वाक्यमिदं प्रमाणं मत्वा व्रीहिभिः यागानुष्ठानं क्रियते तदा अस्मिन् स्थितौ यवशास्त्रम् अप्रमाणम्। अनेन प्रकारेण दृश्यते यत् एकस्मिन् पक्षे यवशास्त्रं प्रमाणम्, एवं अन्यस्मिन् पक्षे यवशास्त्रस्य अप्रामाण्यं भवति।

अर्थात् "व्रीहिभिर्यजेत यवैर्वा" अस्मिन् विकल्पस्थले शास्त्रस्य पाक्षिकाप्रामाणिकता आपद्यते। परं यत्र मन्त्रोच्चारणस्य दृष्टप्रयोजनं न दृश्यते, तत्र अदृष्टप्रयोजनं स्वीकरणीयम्[147]। अतः अत्र अदृष्टप्रयोजनं स्वीकृत्य कार्यं क्रियते। तथा "यजतिषु ये यजामहं करोति" अनेन सामान्यशास्त्रेण सामान्यरूपेण सर्वेषु यागेषु ये यजामहम् अस्य मन्त्रस्य पाठस्य प्राप्तिः भवति। यागसामान्येषु अन्तर्गतं अनुयाजसंज्ञकः यागः अपि वर्तते। अत एव यजतिषु ये यजामहं करोति वाक्यमिदं प्रमाणं मत्वा यदा अनुयाजसंज्ञकेषु यागेषु ये यजामहं मन्त्रस्य पाठः क्रियते तदा अस्मिन् पक्षे नानुयाजेषु वाक्यमिदमप्रामाणिकं भवति, यतोहि अस्य वाक्यानुसारेण अनुयाजेषु ये यजामहं मन्त्रस्य पाठः न करणीयः। एवं यदि "नानुयाजेषु" इदं वाक्यं प्रमाणं मत्वा "अनुयाजेषु ये यजामहम्" मन्त्रस्य पाठः न क्रियते तर्हि यजतिषु ये येजामहं करोति इदं शास्त्रमप्रमाणम्। अतः अस्य अप्रामाण्यापत्तेः भयात् विकल्पस्य स्वीकृतिः नोचिता। एवमत्र "व्रीहिभिर्यजेत यवैर्वा" अस्य स्थलसदृशः विकल्पप्रसक्तिरूपापत्तिं साह्या न स्वीक्रियते। यतोहि अत्र उपायान्तरेण कार्यं कर्तुं शक्यते। स उपायः वर्तते- पर्युदासस्य आश्रयणम्।

अस्य विवेचनस्य निष्कर्षोऽयं यत् नञर्थस्य प्रत्ययार्थेन अन्वयः स्वीकृते अन्ते यदा दोषद्वयगर्भितः विकल्पः आपद्यते, तदा विकाल्पात् मुक्तये नञर्थस्य प्रत्ययार्थेन अन्वयः न कृत्वा सुबन्तेन अनुयाजेषु अनेन सह क्रियते। इममेव पर्युदासः कथ्यते। सामान्यतः नञः अर्थः विरोधी भवति, किन्तु यदा नञर्थस्य अनुयाजार्थेन अन्वयः क्रियते तदा नञ् शब्दस्य लक्षणया तदतिरिक्तार्थस्य बोधो भवति। अस्मिन् स्थितौ "यजतिषु ये यजामहं करोति नानुयाजेषु" अस्य वाक्यस्य अभिप्रेतार्थः भवति यत्- अनुयाजव्यतिरिक्तेषु यजतिषु ये यजामहं कुर्यात् अर्थात् अनुयाजातिरिक्तेषु सर्वेषु यागेषु ये यजामहं मन्त्रस्य पाठः स्यात्। अनेन प्रकारेण पर्युदासस्य आश्रये सति विकल्पस्य प्रसक्तिः अपि न भवति एवं परस्परं बाध्यबाधकभावसम्बन्धः अपि न। अतः उक्तशास्त्रेषु न किञ्चिदपि अप्रामाणिकम्। अत्र ध्यातव्यमस्ति यत् "अनुयाजेषु ये यजामहं

[147] "येषां क्वापि न सम्भवति तदुच्चारणस्य त्वगत्यादृष्टार्थत्त्वम्'' मीमांसान्यायप्रकाशः, पृ.सं.346.

करोति” अनेन वाक्येन ये यजामहं मन्त्रस्य विधानं न क्रियते, मन्त्रस्य विधानं तु “यजतिषु ये यजामहं करोति” अनेन वाक्येन क्रियते। अभिप्रायोऽयं यत् “यजतिषु ये यजामहं करोति” अनेन विधानं क्रियते यत् यागेषु ये यजामहं मन्त्रस्य पाठः करणीयः, तत् अनुयाजातिरिक्तेषु यागेषु अस्ति, अत्र अनुयाजातिरिक्तयागे केवलम् अस्य एव पदार्थस्य विधानमिति “नानुयाजेषु” अनेन वाक्येन भवति।

## २.१.३ पर्युदासोपसंहारभेदनिरूपणम्-

पर्युदासविवेचनेन अत्र शङ्का भवति यत् उपसंहारस्य अपि स्वरूपं पर्युदाससदृशः तु नास्ति यतोहि सामान्यशास्त्रेण प्राप्तस्य पदार्थस्य विशेषे सङ्कोचस्य एव उपसंहारः जायते, एवं पर्युदासे अपि तथैव भवति। उदाहरणाय “यजतिषु ये यजामहं करोति” अनेन सामान्यशास्त्रेण प्राप्तस्य येयजामहं मन्त्रस्य नानुयाजेषु अनेन शास्त्रेण अनुयाजव्यतिरिक्तयागेषु सङ्कोचः भवति, अयमेव पर्युदासः कथ्यते, एवम् उपसंहारस्थलेऽपि सामान्यशास्त्रेण प्राप्तपदार्थस्य विशेषे सङ्कोचः क्रियते। अनेन प्रकारेण उभयोः स्थलयोः स्थानसङ्कोचः भवति, अतः उभयोः भेदः न स्वीकर्तव्यः। अस्यैव समाधानम् उत्तरपक्षेण क्रियते-

पर्युदासम् उपसंहारञ्च सदृशं न मन्तव्यम्, अत्र कारणं वर्तते यत् तन्मात्रसङ्कोचमुपसंहारः कथ्यते, अर्थात् विधेयपदार्थस्य शब्देन निर्दिष्टः विषयमात्रे भूयमानः सङ्कोचः उपसंहारः कथ्यते। अस्य स्पष्टस्वरूपम् उदाहरणेन ज्ञातुं शक्यते यत् “पुरोडाशं चतुर्धा करोति” अनेन सामान्यशास्त्रेण पुरोडाशस्य चत्वारः भागः क्रियते (पुरोडाशचतुर्धाकरण[148]), अस्य विधानं भवति, तदा “आग्नेयं चतुर्धा करोति” अनेन विशेषशास्त्रेण पुरोडाशचतुर्धाकरणस्य सङ्कोचः आग्नेय-अग्निषोमीय-ऐन्द्राग्निषु एतेषु त्रिषु प्रकारकेषु पुरोडाशेषु केवल्म् आग्नेयपुरोडाशे एव भवति। आग्नेयं चतुर्धा करोति अस्मिन् वाक्ये आग्नेयं पदं श्रूयते एवं चतुर्धाकरणरूपविधेयपदार्थस्य सङ्कोचः अपि आग्नेयपुरोडाशमात्रे एव कृतः, अर्थात् अत्र सङ्कोचः श्रुताय (आग्नेय) पुरोडाशमात्राय एव विहितः। श्रुतार्थमात्रे विद्यमानं सङ्कोचमेव अत्र तन्मात्रसङ्कोचार्थः।

पर्युदासस्य स्वरूपम् अस्मात् पृथक् अस्ति। पर्युदासस्थले तन्मात्रसङ्कोचः न भूत्वा तदन्यमात्रे सङ्कोचः, अर्थात् पर्युदासस्थले विधेयपदार्थस्य सङ्कोचः निर्दिष्टादितरविषये जायते। यथा- “यजतिषु ये यजामहं करोति” अनेन वाक्येन ये यजामहं मन्त्रस्य विधानं विधीयते एवं “नानुयाजेषु” वाक्येन अनुयाजेतरमात्रयागेषु तस्य मन्त्रस्य सङ्कोचः भवति। अनेन प्रकारेण अत्र

[148] दर्शपूर्णमासप्रकरणे हि........ प्राप्तमित्यर्थः, सारविवेचिनी, पृ.सं.172.

निर्दिष्टस्तु अनुयाजः अस्ति, किन्तु सङ्कोचः अनुयाजेतरमात्रे भवति। अतः सिद्धोऽयं यत् उपसंहारः पर्युदासश्च पृथक्-पृथक् भवतः।

एवमनयोः पर्युदासोपसंहारयोः स्वरूपतः स्पष्टभेदे सति, पुनः कश्चित् व्यक्तिः अत्र पर्युदासोपसंहारयोः अभेदस्य अशंका एतदर्थं करोति यत् उभयोः फलं तु एकैव वर्तते सङ्कोचः इति[149]। तमेव विशेषं पर्युदासपक्षे अनुयाजव्यतिरिक्तेषु वक्तुं शक्यते एवम् उपसंहारपक्षे अनुयाजेषु इति। इत्थं न भवितुमर्हति यतोहि उभयोः अभेदः तु तदा एव भवति यदा यत्र पर्युदासः स्यात् तत्र अनिवार्यतः उपसंहारोऽपि स्यात्। किन्तु इदं न भवति। उदाहरणाय "नेक्षेतोद्यन्तमादित्यम्" अत्र पर्युदासः तु अस्ति किन्तु उपसंहारः न, यतोहि अत्र तादृशः सामान्यप्राप्तस्य विशेषे सङ्कोचः न क्रियते यादृशः "आग्नेयं चतुर्धा करोति" अस्मिन् स्थले वर्तते। अस्मिन् स्थले सामान्यप्राप्तस्य चतुर्धाकरणस्य विशेषे आग्नेयपुरोडाशे सङ्कोचः क्रियते। अत्र "नेक्षेतोद्यन्तमादित्यम्" अनीक्षणसङ्कल्पमात्रस्य विधानं वर्तते। मात्र शब्दस्य प्रयोगेण उपसंहारस्य व्यावृत्तिः भवति, यतोहि नञः ईक्षणार्थस्य च अन्वयेन (अनीक्षणेन) तदन्यस्य[150] उत्तरपदेन नञश्च[151] चरितार्थत्वात् अत्र केवलं पर्युदासः एव भवितुमर्हति। विधेयस्य फलमवश्यं भवति। विधेयविशेषोऽस्ति अनीक्षणसङ्कल्पः, तस्य फलञ्च पापक्षयः[152], यमुद्दिश्य अनीक्षणसङ्कल्पस्य विधानं कृतमस्ति। अनेन प्रकारेण अत्र पर्युदासः एव वर्तते, नोपसंहारः। फलतः अवबोध्यते यत् पर्युदासः उपसंहारश्च परस्परं भिन्नं वर्तते।

कस्मिंश्चित् स्थले पर्युदासस्य सम्भावना न स्थिते सति विकल्पः भवति, एवं नञर्थस्य प्रत्ययार्थेन अन्वयः अपि भवति[153]। तत्र विकल्पप्रसक्तिं नञर्थस्य प्रत्ययार्थेन सह अन्वये बाधकः न मन्यते, अर्थात् विकल्पप्रसक्तेः सत्यपि एतादृशेषु स्थलेषु अगत्यानिषेधः स्वीक्रियते। विकल्पः तत्र दोषरूपे न अपितु स्वीकार्यरूपे। अस्योदाहरणं वर्तते "नातिरात्रे षोडशिनं गृह्णाति" इदमेकं निषेधवाक्यं वर्तते, अस्यार्थोऽस्ति यत् अतिरात्रनाम्नि सोमयागे षोडशीनाम्नः सोमपात्रं न गृहीतव्यम्। एकमन्यं विधिवाक्यं वर्तते "अतिरात्रे षोडशिनं गृह्णाति" अनेन अतिरात्रसंज्ञके सोमयागे षोडशीनाम्नः सोमपात्रस्य ग्रहणस्य विधानं विधीयते।

नातिरात्रे षोडशिनं गृह्णाति अस्मिन् स्थले नञर्थस्य अन्वयः प्रत्ययार्थेन भवति। अनेन अतिरात्रौ षोडश्याः ग्रहणस्य निषेधः भवति। अतिरात्रे षोडशिनं गृह्णाति अनेन विधिवाक्येन

[149] ननु सत्यपि बोधकभेदे फले विशेषाभावात् किमर्थं तयोर्भेद आश्रीयते इत्यत् आह- एवमिति, सारविवेचिनी, पृ.सं.173.

[150] तदन्य- मात्र सङ्कोचार्थत्वात् पर्युदासस्य, मीमांसान्यायप्रकाशः, पृ.सं.434.

[151] पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्, तत्रैव, पृ.सं.417

[152] …पापक्षयो भाव्यतया सम्बध्यते। मीमांसान्यायप्रकाशः, पृ.सं.421.

[153] अत्र पर्युदासस्यानुपपत्तेर्निषेध एव स्वीक्रियते, विकल्पोऽपि स्वीक्रियते। मीमांसान्यायप्रकाशः, पृ.सं.437.

अतिरात्रौ षोडश्याः ग्रहणस्य विधानमपि वर्तते। अत्र विधिः निषेधश्च स्तः। अत एव एकस्मिन्नेव अतिरात्रौ षोडश्याः विधानं निषेधश्च उभयोः सत्वात् विकल्पस्य प्राप्तिः भवति। यद्यपि विकल्पः दोषयुक्तः, पुनरपि अत्र विकल्पः अपेक्षणीयः। यतोहि अत्र अन्यः कोऽपि उपायो नास्ति।

अत्र कारणमस्ति यत् यदि विकल्पप्रसक्तिं दोषः मत्वा विकल्पात् मुक्तये पर्युदासस्य आश्रयः गृह्यते तर्हि "नातिरात्रे षोडशिनं गृह्णाति" अत्र नञर्थस्य अन्वयः षोडश्यर्थेन अथवा अतिरात्र्यर्थेन सह भविष्यति। यदि नञर्थस्य अन्वयः षोडश्यर्थेन सह भवति तर्हि अतिरात्रे षोडशिव्यतिरिक्तं गृह्णाति इत्यर्थः भविष्यति। किन्तु अस्य अर्थस्य अतिरात्रे षोडशिनं गृह्णाति अनेन प्रत्यक्षविधिविहितार्थेन सह विरोधः जायते, यतोहि अयं विधिः अतिरात्रे षोडश्याः ग्रहणस्य विधानं करोति। अनेनैव प्रकारेण यदि नञर्थस्य अन्वयः अतिरात्रपदस्य अर्थेन भवति तर्हि अतिरात्रव्यतिरिक्ते षोडशिनं गृह्णाति इति वाक्यार्थः भविष्यति। पुनः अतिरात्रे षोडशिनं गृह्णाति अस्य प्रत्यक्षविधेः विरोधः भवति। अत एव शास्त्रप्राप्तस्य अपरशास्त्रेण निषेधः भवति। अतः अस्मिन् स्थितौ पूर्वमपि निर्देशितं यत् यत्र एकशास्त्रेण विहितपदार्थस्य अन्यशास्त्रेण निषेधः भवति, तत्र निषेधं न मत्वा विकल्पः मन्यते[154]। इदमेव कारणं यत् प्रकृतस्थले विकल्पः भवति नान्यः कोऽपि उपायः। यद्यपि विकल्पे दोषः वर्तते, किन्तु प्रकृतस्थले विकल्पः दोषः न भूत्वा स्वीकार्यः। कारणमस्ति यत् एतादृशेषु स्थलेषु विधिना निषेधेन च क्रमशः विहितः, निषिद्धिश्च उभौ पदार्थौ अदृष्टस्य उत्पादकौ स्तः।

एवं प्रकृतविकल्पस्थले विधिना निषेधेन च यागस्य सम्पादनं भवति अर्थात् उभौ यागस्य उपकारकौ भवतः, कोऽपि अनिष्टः नोत्पादयति। "अतिरात्रे षोडशिनं गृह्णाति" एवं "नातिरात्रे षोडशिनं गृह्णाति" आभ्यां वाक्याभ्यां क्रमशः अतिरात्रे षोडश्याः ग्रहणस्य विधानं एवं षोडश्याः ग्रहणस्य निषेधः विकल्पेन प्राप्यते। तत्र विधिः निषेधश्च वैकल्पिकौ स्तः, "नातिरात्रे षोडशिनं गृह्णाति" अनेन वाक्येन षोडश्याः ग्रहणस्य निषेधे सत्यपि विधिपक्षे प्रतिषिध्यमानस्य षोडश्याः ग्रहणम् अनर्थस्य कारणं न भवति, यतोहि एतादृशेषु विकल्पस्थलेषु विधिना निषेधेन च यागः निष्पद्यते। विधिपक्षे विधेयस्य अनुष्ठानेन यागस्य उपकारः भवति, तस्मिन् काले निषेध्यवाक्येन यागानुष्ठाने कापि हानिः न भूयते। अर्थात् तस्मिन् काले निषेधः निष्क्रियः भवति, विधेः विरोधः न करोति। इत्थमेव निषेधपक्षे यदा षोडश्याः ग्रहणस्य निषेधः क्रियते तदा अतिरात्रे षोडशिनं

[154] तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव। अर्थसंग्रहः, पृ.सं.231.

गृह्णाति वाक्यमिदं निषेधवाक्यस्य विरोधः न करोति। प्रत्येकपक्षः अन्यस्य विरोधः न कृत्वा यागानुष्ठानस्य उपकारी भवति[155]।

अनेन प्रकारेण अस्माभिः ज्ञायते यत् “नातिरात्रे षोडशिनं गृह्णाति” अनेन निषेधवाक्येन प्रतिषिध्यमानस्य षोडश्याः ग्रहणम् अनर्थस्य कारणं न भवति, परमन्यस्थलेषु यथा न कलञ्जं भक्षयेत् अस्मिन् स्थले प्रतिषिध्यमानः कलञ्जभक्षणः अनर्थस्य (नरकप्राप्तेः) कारणं मन्यते अर्थात् विकल्पप्रतिषेधपक्षस्य इयं विशेषता यत् प्रतिषिध्यमानः अनर्थस्य कारणं न भवति[156]। कलञ्जभक्षणवत् अतिरात्रे षोडश्याः ग्रहणं अनर्थकारी नास्ति यत् येन व्यक्तेः षोडशिग्रहणे प्रवृत्तिः न स्यात्[157]।

प्रतिषिध्यमानपदार्थः तस्मिन् स्थले अनर्थस्य कारणं भवति, यत्र निम्नलिखिताः विशेषताः प्राप्यते- तत्र प्रथमा विशेषता वर्तते यत्र विकल्पः न भवति, द्वितीया यत्र पदार्थस्य प्राप्तिः रागेन भवति, तृतीया यत्र निषेधः एव पुरुषेभ्यः इष्टः। अस्योदाहरणं वर्तते “न कलञ्जं भक्षयेत्” इदं निषेधस्थलं वर्तते। अत्र कलञ्जभक्षणः न वैकल्पिकः, यदि वैकल्पिकः भवति तर्हि कलञ्जं भक्षयेत् एतादृशः विधिरपि प्राप्यते, परमेतादृशः कोऽपि विधिः न प्राप्यते। एवं कलञ्जभक्षणस्य प्राप्तिः रागवशात् भवति अर्थात् रागवशादेव पुरुषः कलञ्जस्य भक्षणं कर्तुमिच्छति। कलञ्जभक्षणस्य निषेधः पुरुषार्थः मन्यते, यतोहि कलञ्जभक्षणं न कृत्वा पुरुषः नरकरूपानिष्टात् स्वं रक्षयति। इदमेव कारणं यत् न कलञ्जं भक्षयेत् अस्मिन् स्थले प्रतिषिध्यमानः कलञ्जभक्षणः नरकरूपानिष्टस्य प्रापको मन्यते[158]।

सोमयागप्रकरणे “दीक्षितो न ददाति न जुहोति” अयं विधिः प्राप्यते। विधिरयं सोमयागे दीक्षाप्राप्तं यजमानं यागे दान-होमादिभ्यः अवरोधयति[159]। दानं होमादयश्च शात्रप्राप्ताः सन्ति, अर्थात् शास्त्रे दानहोमादीनां विधानं कृतमस्ति। यदा शास्त्रप्राप्तपदार्थस्य शास्त्रेण निषेधः भवति तदा विकल्पः स्वीक्रियते। अत्र शङ्का भवति यत् यागे दानहोमादेः सम्पादनमपि तथैव नानर्थमुत्पादयति, यथा “नातिरात्रे षोडशिनं गृह्णाति” वाक्येन षोडश्याः ग्रहणस्य निषेधेऽपि षोडश्याः ग्रहणं नानर्थमुत्पादयति।

---

155 विधिनिषेधोभयस्यापि क्रत्वर्थत्वात्। अर्थसंग्रः, पृ.सं.240.

156 इयांस्तु विशेषो यद्विकल्पादेकप्रतिषेधे प्रतिषिध्यमानस्य नानर्थत्वम्, अर्थसंग्रहः, पृ.सं.240.

157 यद्येवं कलञ्जभक्षणनिषेधषोडशिग्रहणनिषेधयोस्साम्यं तर्हि अतिरात्राधिकरणकषोडशिग्रहणस्याप्यनर्थहेतुतापत्तौ कदाचिदपि तत्र पुरुषप्रवृत्तेरनुदयात् तद्विधिवैयर्थ्यापत्तिरित्यत आह एतावानिति। सारविवेचिनी, पृ.सं.175.

158 नरकादिरूपानिष्टजनकत्वमित्यर्थः। सारविवेचिनी, पृ.सं.176.

159 सौमिकीं दीक्षां प्राप्तो यजमानः यावद्दीक्षाविमोकं पुरुषार्थदानानि क्रतुमध्यपतितानि न कुर्यात्, एवं पुरुषार्थहोमाग्निहोत्रादीन्न कुर्यादित्यर्थः। सारविवेचिनी, पृ.सं.176.

यद्यपि दानस्य होमादेः विधानं शास्त्रेण क्रियते, पुनरपि मीमांसकाः यागे एतेषां विकल्पः न स्वीकुर्वन्ति। कारणं वर्तते यत् "दीक्षितो न ददाति न जुहोति" अनेन निषेधवाक्येन प्रतिषिध्यमानः दानं, होमश्च यागे अनर्थमुत्पादयति, वैगुण्यमुत्पादयति, एवमेतयोः नेषेधेन यागः न्यूनतां विना सम्पन्नः भवति। वस्तुतः शास्त्रेण दानहोमादीनां विधानं क्रियते, अतैव ते अदृष्टजनकाः भवन्ति, परं क्रतौ तेषां सम्पादनमनर्थकारी भवति। इमं विषयं स्पष्टरूपेण अन्योदाहरणेन ज्ञातुं शक्यते। यथा स्वस्त्रीगमनः पुरुषार्थः, एतत् रागप्राप्तः शास्त्रप्राप्तश्चापि वर्तते। पुनरपि "न स्त्रियमुपेयात्" इदं दर्शपूर्णमासप्रकरणे पठितं निषेधवाक्यं यागे स्वस्त्रीगमनस्य निषेधः करोति। क्रतौ स्वस्त्रीगमनः अनर्थः, वैगुण्यमुत्पादयति। अनेन प्रकारेण सिद्धोऽयं यत् क्रतौ स्त्रीगमनस्य विषये विकल्पः न मन्यते। अतः अस्मादेव कारणात् क्रतौ दानहोमादिरपि वैकल्पिकः न।

## २.२ व्याकरणे नञर्थविचारः-

वैयाकरणाः नञः द्योतकत्वं स्वीकुर्वन्ति। नैयायिकास्तु प्रादयो द्योतकाः चादयस्तु वाचकाः इति स्वीकुर्वन्ति। तेषां मते नञः निपातत्वात् वाचकत्वमेव। तर्हि अत्र नञः द्योतकत्ववाचकत्वविषये विचारः प्रस्तूयते। अत्र व्याकरणस्य विभिन्नाचार्याणां मते नञः विषये कः विचारः, विषयेऽस्मिन् क्रमशः चर्चा क्रियते।

### २.२.१ महाभाष्यकारमतविवेचनम्-

पतञ्जलिना पाणिनीयव्याकरणे भाष्यं लिखितमस्ति। भाष्यस्य लक्षणं वर्तते यत् सूत्रानुकारिवाक्यैः अर्थात् वार्तिकैः यत्र सूत्रार्थस्य स्वपदस्य च वर्णनं स्यात् तद् भाष्यं कथ्यते[160]। राजशेखरेण अपि भाष्य शब्दस्य व्युत्तपतौ उक्तं यत्- यद् आक्षिप्य समाधानं कथयति तद् भाष्यम्[161]। अतः तत्रैव "नञः"[162] सूत्रस्य व्याख्यानावसरे नञ्समासविषये पतञ्जलिना भाष्ये पक्षत्रयं समुपस्थापितं।

1. अन्यपदार्थप्रधानः
2. पूर्वपदप्रधानः
3. उत्तरपदप्रधानः

---

160 सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥ व्या०सि० पृ.सं.१६

161 आक्षिप्य भाषणाद् भाष्यम्। का०मी० पृ.सं.३४

162 पाणिनीयाष्टाध्यायी, 2/2/5

यदा जातौ ब्राह्मणशब्दो वर्तते तदा “अब्राह्मणः” इत्यत्र अन्यपदार्थः प्रधानः क्षत्रियादिः गम्यते। यदा असत्सामान्यवृत्तिर्नञ् ब्राह्मणादिभिर्विशेष्यते “ब्राह्मणत्वेनासन्” अब्राह्मणशब्देनोच्यते तदा पूर्वपदप्रधानः। यदा तु दुरुपदेश्यान् मिथ्याज्ञानाद्वा ब्राह्मणशब्दः क्षत्रियादौ प्रयुज्यते, स्वाभाविकी ब्राह्मणपदार्थनिवृत्तिश्च नञा द्योत्यते, तदा उत्तरपदार्थप्रधानः।

अस्य तात्पर्यं वर्तते यत् अनियतविशेषणगुणस्य नियतविशेषगुणप्रतिपादनाय विशेषणं प्रयुज्यते, न तु तद्रूपघाताय। यदि च नञा ब्राह्मणपदार्थः प्रतिषिध्यते, तदा सर्वात्मना तदर्थस्याभावात् कथमुत्तरपदार्थस्य प्राधान्यं स्यात्। तस्मात् “अब्राह्मणः” इत्यत्र नञो ब्राह्मणगतविशेषगुणस्यावचनत्वादनर्थकत्वमेव। तथा च अब्राह्मणशब्दोऽपि ब्राह्मणवाचकः एव स्यात्। अथवा “भेदप्रतियोगि ब्राह्मणः” इत्यर्थे ब्राह्मणस्य विशेष्यतया तत्रैव कर्मत्वान्वयेन “अब्राह्मणमानय” इत्युक्तौ ब्राह्मणस्यानयनं प्रसज्यते।

यद्यन्यपदार्थप्रधानस्तर्हि “अवर्षा हेमन्तः” इति हेमन्तस्य यल्लिङ्गं वचनञ्च तत्समासस्य अपि प्राप्नोति। अथवा पुनस्तु उत्तरपदार्थप्रधानः। एवञ्च “अब्राह्मणमानय” इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति इति तदुक्तं तदपि न भवति। यतो हि “राजपुरुषमानय” इत्युक्ते राजा विशेषकः प्रयुज्यते, तेनैव राजविशिष्टस्यानयनं भवति तथैव इहापि नञ् विशेषकः प्रयुज्यते, तेन नञ्विशिष्टस्यानयनं भवति। कः पुनः (नञ्) निवृत्तपदार्थकः इति प्रश्ने निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् सः क्षत्रियादिरर्थः। सादृश्यादिनाऽध्यारोपितब्राह्मण्य इत्यर्थः। एवञ्चारोपितत्वं नञ्द्योत्यमिति स्पष्टमेवोक्तम्।

नञो वाचकत्वं द्योतकत्वञ्चेति निर्णयार्थं नञ्सूत्रे भाष्ये विचारो विहितः, किं स्वयं निवृत्तस्य ब्राह्मणपदार्थस्य नञा निवृत्तिः द्योत्यते, अथवा स्थितस्यैव नञा निवृत्तिः क्रियते। इति प्रश्नमुपस्थाप्य उभयोः पक्षे दोषं च प्रदर्श्य समाधानं कृतं भाष्यकारेण[163]। सा च निवृत्तिः स्वाभाविकी नञा द्योत्यते। अर्थात् ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशात् मुख्य एव ब्राह्मणार्थे प्रत्ययमादधाति। नञ्प्रयोगे तु निवृत्तिपदार्थकता ब्राह्मणशब्दस्य प्रतीयते। नञ्प्रयोगेण क्षत्रियादौ सादृश्यादिना निमित्तेनाध्यारोपितब्राह्मण्यं न तात्विकमिति द्योत्यते। तथैवं ब्राह्मणशब्दस्यार्थो निवृत्तिः। अमुख्यः क्षत्रियादिश्च जातः। अतः न ब्राह्मणमात्रस्यानयनम्। नापि कस्यचिदन्यस्यानयनमिति सिद्ध्यति।

---

[163] म.भा.पृ.427, द्वि.भा.

पुनः प्रकारान्तरेण नञो द्योतकत्वं साधितं भाष्ये[164]। सर्वे एते शब्दाः गुणसमुदायेषु वर्तन्ते[165]। गौरः, शुद्धाचारः, पिङ्गलकेशः इत्यादयश्च धर्माः। एतेषां समुदायेषु ब्राह्मणशब्दो वर्तते। एवञ्च समुदायेषु वृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते। अतः जातिभिन्ने गुणभिन्ने वा यदा ब्राह्मणशब्दो वर्तते तदा स्वाभाविकी जातिगुणनिवृत्तिः नञा द्योत्यते।

## २.२.२ वाक्यपदीयकारस्य मतविवेचनम्-

भर्तृहरिणा वाक्यपदीये नञः द्योतकत्वं वाचकत्वं च प्रदर्श्य द्योतकत्वपक्षः सिद्धान्तत्वेनाङ्गीकृतः। अस्य मते "न ब्राह्मणः" इति वाक्ये नञ्प्रयोगे निषेधो निश्चीयते। स च निषेधः न स्वतन्त्रः प्रतियोगिरहितः। निर्विशेषणस्य अभावस्य प्रतीतेरिति निरूपकत्वेन पदार्थनिष्ठः निषेधः। तत्र स्वभावतः सन् पदार्थो नञ्प्रयोगमात्रात् निवर्तितुं नोत्सहते। विधिवाक्यापेक्षया निषेधवाक्ये शब्दान्तरस्य नञः प्रयोगेऽपि पदानां वाच्यस्य न्यूनाधिक्योरनुपपत्तेः। तस्मात् स्वभावेनैव निवृत्तीनां निवृत्तेर्द्योतको नञ्[166]।

विचारप्रसङ्गे नञो वाचकत्वपक्षोऽपि समुपस्थापितः। भाष्ये नञ्समासविषये पक्षत्रयमुपस्थापितम्। तस्य पक्षत्रयस्य पुष्टीकरणाय वाचकत्वपक्षः प्रदर्शितः। तथा च "न पाचकोऽपाचकः" इत्यादि। अत्र गुणभूतेनोत्तरपदेन धातुरूपेण क्रियाऽभिधीयते। "न ब्राह्मण" इत्यादौ ब्राह्मणादेस्तूत्तरपदस्य गुणभूताऽपि क्रिया न वाच्या। तस्माद् द्योतकत्वं नञोऽनुपपन्नम्। पक्षभेदानुपपत्तिप्रसङ्गात् वृत्तिविषये नञो वाचकत्वमभ्युपेयम्।

यदि वाचकत्वपक्षोऽङ्गीक्रियते तर्हि "अब्राह्मणमानय" इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति इत्यादिभाष्यवचनं न संगच्छते। अतः द्योतकतापक्षोऽङ्गीकृतः सिद्धान्तत्वेन भर्तृहरिणा[167]।

## २.२.३ भूषणकारस्य मतविचारः-

भूषणसारे सर्वप्रथमं नञ्समासयुक्तस्य असर्वशब्दस्य सर्वनाम संज्ञा कथं भवति? विषयेऽस्मिन् चर्चा भवति, यतोहि नञ्समासे नैयायिकाः अभावं विशिष्यः स्वीकुर्वन्ति, प्रतियोगी च विशेषणं

---

[164] म.भा.पृ.427, द्वि.भा.

[165] तपः श्रुतं च यो निश्चेत्येतद् ब्राह्मण्यकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥ म.भा.पृ.427, द्वि.भा.

[166] प्राक्समासात् पदार्थानां निवृत्तिर्द्यते नञा।
स्वभावतो निवृत्तानां रूपभेदादलक्षिता॥ वा.प.3/14/271.

[167] पदार्थानुपघातेन यद्यप्यत्र विशेषणम्।
उपचारो सतोऽर्थस्य सावस्था द्योत्यते नञा॥ वा.प.3/14/271

भवति। यथा- "असर्वः" अत्र सर्वप्रतियोगिकोऽभावः इति नैयायिकानां मतम्। अत्र सर्वशब्दः अभावे विशेषणम्। समासघटकविशेषणस्य सर्वनामसंज्ञा न भवति, अतः "असर्वः" अस्य घटकसर्वस्य कथं सर्वनामसंज्ञा? अस्यैव समाधनं क्रियते कौण्डभट्टेन यत्- नञ्समासे उत्तरपदार्थस्य प्राधान्यात् उत्तरपदस्य सर्वनामसंज्ञा भवति[168]। अत्र "असर्व" सर्व उत्तरपदार्थः वर्तते अतः उत्तरपदार्थस्य प्राधान्यात् अस्य सर्वनाम संज्ञा भवति। यत्र उत्तरपदार्थस्य प्रधानतायाः अभावः तत्र सर्वनामसंज्ञा न भवति यथा- "अतिसर्वम्" अस्मिन् शब्दे सर्वशब्दः अप्रधानः, कर्ता च प्रधानः, अतः अत्र सर्वस्य सर्वनामसंज्ञा न भवति।

कौण्डभट्टः नञः द्योतकत्वं वाचकत्वञ्च स्वीकरोति। नञः द्योतकतायाः पक्षप्रतिपादनाय प्रमाणं प्रस्तौति यद्- नञ्समासघटकब्राह्मणादिपदानामरोपितब्राह्मणत्वादिप्रवृत्तिनिमित्तमिति नञा द्योत्यते। नञ् समासे उत्तरपदार्थस्य प्राधान्यानुरोधारोपितत्वं नञ्द्योत्यं सिद्ध्यति[169]। एवं च "असर्वः" इत्यस्यारोपित सर्व इत्यर्थे सर्वशब्दस्य मुख्यत्वात् सर्वनामसंज्ञा। तन्निमित्तं कार्यं च सिद्ध्यति। निपातानां द्योतकत्वमभिप्रेत्य द्योतकत्व उक्तिः इति प्रतिपादितम्।

तस्य मते नञः वाचकत्वस्वीकारेऽपि न कश्चित् दोषः। घटो नास्ति, अब्राह्मणः इत्यादौ आरोपबोधः अर्थात् आरोपिता घटकर्तृका सत्ता। आरोपितब्राह्मणत्वविशिष्ट इति च बोधस्य सर्वजनानुभवविरुद्धत्वात् वाचकत्वमपि स्वीकरणीयम्[170]। एवं "अत्वं भवसि" अस्य अर्थो भवति भेदप्रतियोगी त्वं भवसि। अत्र "अत्वं" शब्देन यः व्यक्तिः निर्दिश्यते, सि प्रत्ययः अपि तमेव संकेतयति। उभयोः संकेतितस्य एकस्य एव व्यक्तेः सत्वात् मध्यमपुरुषस्य एकवचनं भू धतुना भवति। "अनहं भवामि" अत्रापि भेदप्रतियोगी अहं भवामि इत्यर्थे सति, "अहं" "मि" च उभयोः संकेतितार्थः एकैव वर्तते, अतः उभयोः सामानाधिकरण्ये सति फलस्वरूपमत्र भू धातुना उत्तमपुरुषस्य एकवचनं भवति। यदि भेदप्रतियोगी इत्त्यर्थः न स्वीक्रियते तर्हि "त्वदभावः" "मदभावः" एतादृशमभावं विशेष्य कृते तदर्थे युष्मद् अस्मच्च शब्दौ अभावांशे विशेषणौ भवतः। एवं युष्मद्शब्दस्य सि प्रत्ययस्य च तथा अस्मद्शब्दस्य मि प्रत्ययस्य च संकेतितार्थः भिन्नः जायते, येन मध्यमपुरुषः उत्तमपुरुषश्च न भूत्वा प्रथमपुरुषः ति भवति "शेषे प्रथमः"[171] अनेन सूत्रेण। अतः वाक्यार्थः त्वदभावः अस्ति, मदभावः अस्ति इति भविष्यति।

---

168 नञ्समासे चापरस्य प्राधान्यात् सर्वनामता। भू.सा.का.40

169 आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत्॥ तत्रैव

170 अभावो वा तदर्थस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यो वा न्यास्त्ववधार्यताम्॥ भू.सा.का.41

171 पाणिनीयाष्टाध्यायी,1/4/108

परं कौण्डभट्टस्य मते भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात् सामानाधिकरण्यं नानुपपन्नमिति[172]।

## २.२.४ मञ्जूषाकारस्य मतविचारः-

मञ्जूषायां नागेशेन नञो द्योतकत्वं स्वीकृतम्[173]। अस्य मते नञ् द्विविधः। पर्युदासः, प्रसज्यप्रतिषेधश्च। अनयोः पर्युदासनञः द्योत्यर्थः आरोपविषयत्वं वर्तते अर्थात् आरोपितज्ञानस्य विषयः। नञा समभिव्याहृतानि यानि पदानि सन्ति तेषामारोपितं यत् प्रवृत्तिनिमित्तं तद् बोधकत्वे तात्पर्यग्राहकम्[174]। यथा- "सिंहो माणवक" इत्यादौ माणवकादिपदानि सिंहादिपदस्य आरोपितसिंहत्ववद् बोधकत्वे तात्पर्यग्राहकाणि, तथा "अनुदरा कन्या" इत्यादौ अत्यल्पत्वेन उदरभावमारोप्य नञ्समभिव्यहारे आरोपितोदरबुद्ध्या तन्मूलाल्पत्वादौ तात्पर्यग्राहकमनुदरेति पदम्। अनेनैव कारणेन अब्राह्मणेत्यादिषु आरोपितब्राह्मणत्वेन युक्तः क्षत्रियादयः इति ज्ञानं भवति।

पर्युदासनञः द्योतकत्वप्रतिपादनाय हेतुद्वयं प्रदत्तं नागेशेन-

- उत्तरपदार्थप्राधान्यं नञ् तत्पुरुषः।
- "अस्मै ब्राह्मणाय", "असः शिवः" इत्यत्र सर्वनामकार्यम्।

उत्तरपदार्थप्राधान्यं नञ्तत्पुरुषः इदं वचनं तदा संगच्छते यदा पर्युदासनञः आरोपविषयतया द्योतकता भवति। यद्यस्य वाचकत्वं स्वीक्रियते तदास्य भेदरूपार्थस्य प्रधानत्वात् नञ् समासस्य पूर्वं पदम्। अतः महाभाष्यसम्मतस्य "उत्तरपदप्रधानो नञ् तत्पुरुषः"[175] इति वचनस्य सङ्गतिः नञो द्योतकता पक्षे एव स्यात्।

"अतस्मै ब्राह्मणाय","असः शिवः" इत्यादौ सर्वनाम कार्यम् अयं द्वितीयो हेतुः प्रथमहेतुना साकं सम्बन्धिता, यदि नञो द्योतकत्वं न स्वीक्रियते तर्हि नञ्समासस्योत्तरपदार्थप्रधानता न स्यात्। तेन "अस्मै ब्राह्मणाय", "असः शिवः" इति नञ् समासप्रयोगे उत्तरपदस्य तद्भिन्नाय "असः" इत्यस्यार्थः तद्भिन्नः स्यात्। अनेन प्रकारेण "अतिसर्वः" इति प्रयोगे पूर्वपदार्थस्य प्रधानत्वात् सर्वशब्दः उपसर्जनः अर्थादप्रधानो भविष्यति। तेन सर्वनाम संज्ञा न भविष्यति। अतः पर्युदासो नञ् आरोपविषयतायाः द्योतकत्वं भवति।

---

172 वैयाकरणभूषणसारः, पृ.सं.294

173 परमलघुमञ्जूषा, पृ.सं.221

174 नञः स्वसमभिव्याहृतघटादिपदानामारोपितप्रवृत्तिनिमित्तबोधकत्वे तात्पर्यग्राहकत्वम्। परमलघुमञ्जूषा, पृ.सं.184

175 महाभाष्यम्, पृ.सं.422 द्वि.भा.

वस्तुतः पर्युदासनञः द्योतकत्वपक्षे नास्ति कश्चन सन्देहः। किन्तु प्रसज्यप्रतिषेधपक्षे द्योतकत्वं वाचकत्वं वा इति निश्चयेऽस्ति कश्चन विशेषः। यत्र नञ् क्रियया सह स्यात् तत्र प्रसज्यप्रतिषेधो नञ् भवति[176]। अत्र क्रियायाः अर्थः गुणमपि ज्ञातव्यम्। अस्मिन् निषेधार्थस्य प्राधान्यं भवति, अत एव सः विशेष्यः अर्थात् प्रधानः भवति। नञः क्रियया सह अन्वयात् सुबन्तपदेन सह समासस्य असामर्थ्येऽपि "असूर्यललाटयोर्दृशितपोः"[177] अस्य सूत्रस्य ज्ञापनेन सुबन्तेन सह अपि समासः स्वीक्रियते, एवं "असूर्यम्पश्या" प्रयोगोऽयं सिद्ध्यति। किन्तु अत्रापि नञः सम्बन्धः दृशि क्रियया सहैव, न तु सूर्येण। अतः प्रसज्यप्रतिषेधो नञ् समस्तपदे असमस्तपदे च उभयोः भवति।

## २.२.५ नञ्भेदविचारः-

वैयाकरणानां मते नञ् द्विविधः- पर्युदासः प्रतिषेधश्च अतैवोक्तमपि-

**द्वौ नञो हि समाख्यातौ पर्युदासप्रसज्यकौ।**

**पर्युदासः सदृशग्राही प्रसज्यस्तु निषेध[178] कृत्॥**

## २.२.५.१ पर्युदासस्वरूपविवेचनम्-

पर्युदासो नञ् आरोपविषयकः। अत एव "आरोपितत्वं नञ्द्योत्यं नह्यसोऽप्यतिसर्ववत्" इतियुक्तिः संगच्छते[179]। आरोपितत्वं च नञा समभिव्याहृतानि यानि पदानि तेषामारोपितं यत् प्रवृत्तिनिमित्तं तद्बोधकत्वे तात्पर्यग्राहकत्वम्। तथा च स्व समभिव्याहृतपदार्थतावच्छेदकको धर्मस्तद्धर्मतद्धर्मिकारोपविषयत्वप्रकारज्ञानसहकारित्वं पर्युदासत्वमिति लक्षणं बोध्यम्।

यथा "सिंहो माणवकः" इत्यादौ माणवकादिपदानि सिंहादिपदस्यारोपित सिंहत्ववद् बोधकत्वे तात्पर्यग्रहकाणि तथा "अनुदरा कन्या" इत्यादौ अत्यल्पत्वेन उदराभावमारोप्य नञ् समभिव्याहारे आरोपितोदरबुद्ध्या तन्मूलाल्पत्वादौ तात्पर्यग्राहकमनुदरेति पदम्। अद्विज इत्यादौ च तद् भेदमूलकमारोपितप्रवृत्तिनिमितकत्वमिति भेदे विश्रान्त्या तात्पर्यग्राहकम् अद्विज इति पदम्। प्रवृत्तिनिमित्तं घटत्वब्रह्मणत्वादिः। तस्माद् अब्राह्मण इत्यत्र नञर्थ आरोपविषयत्वम्। तस्य च उत्तरपदार्थे ब्राह्मणेऽन्वयः आरोपश्च प्रत्यासत्या प्रवृत्तिनिमित्त प्रकारक एव गृह्यते। तथा च

---

176 "प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्" मीमांसान्यायप्रकाशः, पृ.सं.413

177 पाणिनीयाष्टाध्यायी, ३/२/३६.

178 परमलघुमञ्जूषा, वंशीधरमिश्रकृतायाः टीकायाः उद्धरणम्, पृ.सं.77

179 भूषणसारः, कारिका-40

आरोपविषयत्ववान् ब्राह्मण इति बोधः पर्यवसति। आरोपविषयत्वादेव उत्तरपदार्थस्य प्राधान्यं न नञ् तत्पुरुषस्येति प्रवादस्संगच्छते।

अत एव "अतस्मै ब्राह्मणाय" "असः शिवः" इत्यादौ सर्वनाम कार्य भवति। अन्यथा गौणत्वान्न स्यात्। नञर्थस्य भिन्नार्थवाचकत्वे तस्य च विशेष्यत्वात् इतरपदार्थनिष्ठविशेष्यता निरूपितप्रकारतावच्छेदकता प्रयोजकत्वरूपगौणकत्वं तच्छब्दादीनां स्यात् तेन सर्वनामकार्यं न स्यात्।

प्रवृत्तिनिमित्तारोपस्तु सदृशे एव भवति। पर्युदास निषेधस्त्वार्थः। अन्यस्मिन्नन्यधर्मारोपस्तु आहार्यज्ञानरूपः। बाधकालिकमिच्छाजन्यं ज्ञानमेवाहार्यमिति वृद्धाः वदन्ति। यथा घटे घटत्वं नास्तीति निश्चयदशायामपि इच्छाऽयं पट इति यज्ज्ञानं तदाहार्यम्। तार्किकाणां मतेन तद् धर्माभावनिष्ठविशेषता निरूपितः तद्धर्मनिष्ठाप्रकारता निरूपितज्ञानस्यैव भ्रमत्वात्।

## २.२.५.२ पर्युदासार्थभेदनिरूपणम्-

पर्युदासार्थः नञ्षड्विधः[180]। यथा-

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**

**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः[181]॥**

तत्सदृश्यस्योदाहरणम् अनरवोऽयं गर्दभ इति। अनश्वः इत्यस्य आरोपिताश्वत्ववान् इत्यर्थः। अत्र सादृश्यमूलकोऽश्ववत्वारोपः। अभावस्योदाहरणं घटो नास्ति। अपापम् इत्यादि। अपापम् पापाभावः इत्यर्थः तदन्यत्वस्योदाहरणम्- अमनुष्यः प्राणीति। मनुष्यभिन्नः इत्यर्थः। तदल्पत्वस्योदाहरणम्- अनुदरा कान्येति। अल्पमुदरं यस्याः सेति विग्रहः। अत्राल्पत्वमुदरान्वयि। तथा च अल्पत्वविशिष्टोदरवती कान्येति बोधः। अप्राशस्त्योदाहरणम्- अब्राह्मणोऽयमिति। अप्रशस्तो ब्राह्मणः। निषिद्धो वा ब्राह्मण इति बोधः। विरोधस्योदाहरणम्- असुर इति सुरविरुद्धः इति। विरोधश्चात्र क्रूरक्रियात्वेन। अधर्मः- धर्मविरुद्धः इति।

यत्र हि विधेः प्राधान्यं प्रतिषेधस्य च प्राधान्यमुत्तरपदेन साकं नञः स्थितिस्तत्र पर्युदासः। एवं च समस्त एव पर्युदासस्य विषयः। तदुक्तम्-

---

[180] नञ् भावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे।
ईषदर्थे च सादृश्येति विरुद्धन्तदन्ययोः॥ मेदनीकोशः पृ.सं.188

[181] परमलघुमञ्जूषा, पृ.सं.212

**प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।**

**पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्[182] ॥**

क्वचित्तु समास विकल्पात् असमासेऽपि पर्युदासः भवति। यथा- घटः अपटो भवतीत्यर्थके घटो न पट इत्यादौ पर्युदासो भवति। एवं च "यजतिषु ये यजामहं करोति" "नानुयाजेषु"[183] इत्यत्र नञा पर्युदासबोधाः। उक्त वाक्ये यजतिशब्दो यागस्वरूपवचनः। तथा च अनुयाजभिन्नेषु यागेषु ये यजामहशब्दवन्मन्त्रं करोति उच्चारयतीत्यर्थः। अत एवात्रानुयाजभिन्नेषु यजतिषु ये यजामहपदवत् मन्त्रप्रयोगरूपैकार्थं विधानादेकविधेयार्थकत्वरूपस्य वाक्यभेदस्य आपत्तिः भवति।

## २.२.५.३ प्रसज्यप्रतिषेधस्वरूपविवेचनम्-

प्रतिषेधशब्दः तु कर्मघञन्तो बाहुलकात्। प्रसज्यविधाय प्रतिषेधः प्रतियोगी यस्य तादृशोऽभावः अर्थः यस्येति व्युत्पत्या अभावार्थकः। तत्र प्रसज्यप्रतिषेधो नाम अभावः। स च अभावः चतुर्विधः। प्रागभावः, अत्यन्ताभावः, अन्योन्याभावः, प्रध्वंसाभावश्च। समासयुक्तस्य प्रसज्यप्रतिषेधस्य अत्यन्ताभावः एव अर्थः। समासरहिते तस्य अत्यन्ताभावः, अन्योन्याभावश्च द्वौ अर्थौ भवतः। "गेहे घटो नास्ति" इति अत्यन्ताभावस्य उदाहरणं वर्तते। "घटो न पटः" इति अन्योन्याभावस्य। "असूर्यम्पश्या" इति तु समस्तप्रसज्यप्रतिषेधस्य उदाहरणमस्ति। प्रागभावे प्रध्वंसाभावे च नञ् द्योतकः न भवति[184]। अतः उक्तचतुर्विधेषु अभावेषु प्रागभावप्रध्वंसाभावपक्षे नञो वाचकत्वं स्वीकरणीयम्।

अत्यान्ताभावशब्दस्य अन्वर्थसंज्ञा भवति। तथाहि अन्तमतिक्रान्तोऽत्यन्तः अन्तशब्दोऽत्र जघन्यवाची। "अन्तो जघन्यं चरमम्" इत्यमरात्। जघन्यत्वं अस्य अत्यन्ताभावः, प्रतियोगिनिष्ठतादृश्याभावः इति अत्यन्ताभावः अर्थात् प्रतियोगित्वरूपम्। यथा- "घटाभावः" स्वः- घटाभावः तत्प्रतियोगी घटः तन्निष्ठोऽत्यन्ताभावः पटाद्यभावः, घटाद्यभावो वा न तु घटत्वात्यन्ताभाव इति घटत्वं घटाभावप्रतियोगी घटनिष्ठात्यन्ताभाव प्रतियोगी। तथा च घटाभावप्रतियोगिनिष्ठात्यन्ताभाव प्रतियोगित्वाभाववति घटत्वेऽपि घटाभावस्य सत्वेन घटाभावः स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्व व्यभिचारी, तादृश्यप्रतियोगित्वाभावाधिकरणे घटत्वेऽपि सत्वात्।

---

182 सा.द.पृ.सं.482

183 आपस्तम्ब श्रौतसूत्रम्- 24//13/5

184 प्रागभावप्रध्वंसाभावौ तु न नञ्द्योत्यौ। परमलघुमञ्जूषा, पृ.सं.190

एवं चात्यन्ताभावः- अन्तम्-स्वप्रतियोगिनिष्ठात्यन्ताभाव प्रतियोगिनिष्ठात्यन्ताभाव प्रतियोगित्वम् अतिक्रन्तः व्यभिचरितः इति अत्यन्तः तादृशस्वप्रतियोगित्वव्यभिचारी, स च स्वभावः इति कर्मधारयेण तादृश प्रतियोगित्वव्यभिचारी अभावोऽत्यन्ताभाव इत्यन्वर्थत्वं सिद्धम्। इदं च योगार्थमात्र प्रदर्शनम्। अत्यन्ताभावत्वं च- तादात्म्येतरसम्बन्धावच्छिन्न प्रतियोगिताकाभावत्वम्। नित्यत्वे सति अभावः वा।

कस्यचित् मते अत्यन्ताभावो द्विधावायौ रूपाभावादिरुप एकः। भूतले घटाभावः सामयिकात्यन्ताभावरुपो द्वितीयः। समयभेदेन यत्र कदाचित्त्वत्ता, कदाचित् तदभाववत्ता च तत्रैवायम्। अयं भावः यत् यस्य वस्तुनः अभावः तद्वस्तु तस्याभावस्य प्रतियोगी। प्रतियोगिनः भावः प्रतियोगिता प्रतियोगिवृत्तिधर्मः प्रतियोगितायाः अवच्छेदकः कश्चन धर्मः सम्बन्धश्च। धर्मसम्बन्धाभ्यां प्रतियोगिता अवच्छिद्यते। तत्र यः प्रतियोगितायाः समनियतो धर्मः घटत्वादिरूपः स प्रतियोगितावच्छेदकः। यथा- "संयोगेन भूतले घटो नास्ति" इत्यत्र संयोगसम्बन्धावच्छिन्नः घटत्वावच्छिन्नः प्रतियोगिताकोऽभावः प्रतीयते।

भविष्यमाणस्य घटस्य स्वाधिकरणे कपालादौ यः अभावः भवति। अत्र घटो भविष्यति। इत्यादिवाक्याभिव्यंग्यः स प्रागभावः इत्युच्यते भूतस्य यो नाशः स "घटो नष्टः" इत्यादि वाक्यबोधः प्रध्वंसाभावः इत्युच्यते। एतौ च न नञ्पद बोध्यौ इत्यभावत्रयं संसर्गाभावशब्देन व्यवहृयते। अन्योन्याभावस्तु "कर्मव्यतिहारे सर्वनाम्नो[185] द्वे वाच्ये" अनेन वार्तिकेन अन्यशब्दस्य द्वित्वे बहुलग्रहणात् समासवद्भावः भावे द्वित्वपूर्व भूतान्य प्रकृतिकसप्तम्याः सावादेशः "अन्योन्य[186]ङि" इत्यस्याभावशब्देन समासे बहुलग्रहणबलेनैव सोरलुकि "सुपो धातु" इति सप्तम्या लुकि च "अन्योन्याभाव" इति पदं सिध्यति।

अन्योऽन्यस्मिन् तादात्म्येनाभावः अन्योन्याभावः। तादाम्यम्- तस्य आत्मा स्वरूपं तदात्मा, तदात्मनो भावस्तादात्म्यम्, अभेद इत्यर्थः। अन्योन्याभावस्य प्रतियोगितावच्छेदक सम्बन्धश्च तादात्म्यमेव। अत एव तादम्य सम्बन्धावच्छिन्न प्रतियोगिताकोऽभावोऽन्योन्याभाव इत्यभिधीयते। यथा "घटो न पटः" इत्युक्तौ "पटभिन्नो घटः" इति बोधो जायते। सोऽयमभेद निषेधकाऽभावोऽन्योन्याभावः। "पटभिन्नो घटः" इतिवत् "घटभिन्नो पटः" इत्यपि प्रतीयते। एवं च अन्योऽभावः स्वप्रतियोगिनिष्ठान्योन्याभावप्रतियोगित्वव्यापाकः। एवम् अन्योन्यपदं तादात्म्य सम्बन्धारम्, तेनाभाव इति तृतीया समासः।

---

[185] म.भ.वा.पृ.317, प.भा., 8.1.12 सूत्रे।

[186] पा.सू.2.4.71

### २.२.५.४ प्रसज्यप्रतिषेधस्य विषयविवेचनम्-

यत्र किल विधेरप्राधान्यं प्रतिषेधस्य च प्राधान्यं क्रियया सह नञः स्थितिस्तत्र प्रसज्यप्रतिषेधः। तथा च समस्तेऽसमस्ते चास्य विषयः। तदुक्तम्-

**अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।**

**प्रसज्य प्रतिषेधोऽयं क्रियया सह यत्र नञ्**[187] **॥**

क्रियान्वय्यभावः प्रतिपादकोऽयमिति भावः। अत्र क्रियायाः ग्रहणं गुणस्य अपि उपलक्षणम्। नञ् सूत्रस्थस्य "प्रसज्यायं क्रिया गुणैः ततः पश्चात् निवृत्तिं करोति"[188] भाष्यस्य अयमभिप्रायः। "क्रियाभिः गुणैश्च कार्यं प्राप्य निषेधवाक्येन तस्य कार्यस्य अभावो बोध्यते" इति। तेन गुणाभावबोधेऽपि प्रसज्यप्रतिषेधो गम्यते। गुणस्य उदाहरणं तु- "न न एकं प्रियम्" इति भाष्यवचनमेव। अत्र न इति षष्ठ्यन्तम्, अत्र हि एकत्वप्रतिषेधेन संख्यान्त प्रयुक्तप्रियः प्रतीतिर्भवति। "स सन्देहः" इत्यादौ च सन्देहः अत्यन्ताभावः प्रतीयते। एवं सन्देहः गुणमेव वर्तते। एक धर्मिकविरुद्धनानाधर्मप्रकारकज्ञानं रूपत्वात्। पूर्वोदाहरणे एकत्वं रुपो गुणस्तस्य प्रतिषेधः। नः अर्थात् अस्माकं प्रियमेकं नेति तदर्थात्। एवं चैकत्वसंख्याप्रतिषेधः फलति। तदुक्तं कैय्याटेन- "अत्रैकत्वसंख्याप्रतिषेधादेव संख्यान्तरयुक्तवस्तु प्रतीतिः"[189] इति।

न चास्तीत्यस्याध्याहारादेककर्तृकसत्तैव निषिध्यते इति वाच्यम्, "प्रसज्या यं क्रियागुणौ पश्चान्निवृत्तिं करोति" इति भाष्यविरोधात्। अत एव प्रसज्यप्रतिषेधार्थक नञो गुणेऽप्यन्वय इति "क्रियया सह यत्र नञ्" इति प्रसज्य प्रतिषेधलक्षणे क्रियापदं गुणस्याप्युलक्षणं बोध्यम्। क्रियोदाहरणम्- "अनचि च" "गेहे घटो नास्ति" इत्यादयः तथा च "अनचि च" इति वाक्ये चेति वाक्येन प्राप्तम्। अचः परस्य यरो द्वित्वमचि परे इदं निषेधयति। समस्तनञोऽत्यन्ताभावस्य उदाहरणम्- असूर्य पश्या राजदारा इति। सूर्य कर्मकदर्शनं प्रतियोगिताकाभाववन्तो राजदारा इत्यर्थः।

असमस्तनञः अत्यन्ताभावस्य उदाहरणम्- गेहे घटो नास्ति इति अत एव घटकर्तृकसत्ताभावः गृहवृत्तिरिति बोधः।

---

187 सा.द.- पृ.481-82

188 म.भा.- पृ.सं.428, द्वि.भा.

189 म.भा.- पृ.सं.429, द्वि.भा.

असमस्तनञः अन्योन्याभावस्य उदाहरणम्- घटो न पटः इति। अत एव घटप्रतियोगिताको अभाववान् पटः इति बोधः।

## २.३ न्याये नञर्थविचारः-

न्यायपरम्पारायामपि नञः प्रयोगो भवति। अत्रापि निषेधवाक्यानां प्रयोगः भवति, परमत्र निषेधवाक्यानां वाक्यार्थबोधः पृथक् रूपेण भवति। न्यायदर्शने अस्य प्रयोगः अभावरूपे भवति, अर्थात् न्यायदर्शने अभावः पदार्थरूपे स्वीकृतः वर्तते। अभावशब्दस्य अर्थो भवति यत्- किञ्चित् वस्तु नास्तीति[190]। अस्य व्युत्पत्तिदृष्ट्या व्यक्तः भवति यत् "भाव" पदेन सह "नञ्" समासे सति "अभाव" शब्दस्य निष्पत्तिः भवति[191]। अतः अनेन स्पष्टं भवति यत् अयमभावः निषेधयुक्तप्रतीतीनामाश्रयः वर्तते।

अत एव अभावस्य विषये सर्वप्रथमम् इयमेव समस्या उत्पद्यते यत् जगति वास्तविकता सदैव भावात्मिकरूपे अथवा विधिरूपे एव दृश्यते, किन्तु अभाव पदार्थः स्वरूपतः एव निषेधात्मकरूपे प्रतीयते। उदाहरणार्थे यथा- "फलके पुस्तकं वर्तते" अनेन वाक्येन व्यक्तपुस्तकस्य अस्तित्वं वयं स्पष्टतया अनुभवामः, किञ्च "फलके पुस्तकं नास्ति" अनेन निषेधवाक्येन सङ्केतितस्य पुस्तकस्य अभावः प्रत्यक्षरूपेण कथं द्रष्टुं शक्यते।

अतः प्रश्नो भवति यत् अस्य निषेधात्मकप्रतीतेः आधारः किमस्ति? पुस्तकस्य भावः उत अभावः? अनेन प्रकारेण स्पष्टोऽयं यत् अभावः निषेधवाक्यानामश्रयो भवति। यदि अभावपदार्थः न स्वीक्रियते चेत् निषेधवाक्यानि अपि विधिक्यानि भविष्यन्ति, येन विसङ्गतिः जायते, यतोहि तदा निषेधात्मकप्रतीतेः अपि विधियुक्तरीत्या व्याख्या भविष्यति।

अतः निषेधस्य एवं निषेधयुक्तानुभवस्य आधाररूपे "अभावः" अपि पृथक् पदार्थः स्वीकरणीयः इति।

## २.३.१ अभावस्य लक्षणनिरूपणम्-

शिवादित्यानुसारेण अभावः सोऽस्ति यस्य ज्ञानं स्वप्रतियोगिज्ञानस्य आश्रितं भवति। अभावस्य इयमेव परिभाषा गंगेशोपाध्यायेन अपि स्वकीये "अभाववादे" स्वीकृता[192]। एवं तर्कसंग्रहस्य

---

190 हिन्दी विश्वकोष, प्रथम खण्ड, पृ.सं.173.

191 अभावः- (भू+भावे घञ्, नञ् समासः)। मरणम्, असत्ता। -श.क.द्रु.,प्रथमो भागः, पृ.सं. 72

192 अथाभावो भावात्मैव। (अभाववाद)- त.चि., पृ.सं.730.

सिद्धान्तचन्द्रोदयटीकायामपि “प्रतियोगिज्ञानाधीनविषयत्वम्” एव अभावः उक्तः[193]। उदयनाचार्यस्य शब्देषु नञर्थकज्ञानस्य विषयः अपि अभावोऽस्ति[194]। जयन्तभट्टः अपि “नास्तीतिज्ञानगम्यत्वम्” एव अभावस्य लक्षणं दत्तवान्, एवमुक्तं यत् सः अभावोऽपि ज्ञानाज्ञानसमर्थः भवितुमर्हति[195]। वादिवागीश्वरानुसारेण समवायात् भिन्नः तथा असमवायि अभावः वर्तते[196]। सर्वदर्शनसंग्रहेऽपि असमवाये सति यः असमवायि स्यात्, सः एव अभावः उच्यते[197]। अभिप्रायोऽयमस्ति यत् अभावः स्वयं समवायः नास्ति, समवायसम्बन्धेन कस्मिंश्चित् अन्ये सम्बद्धः अपि न भवति। न्यायसिद्धान्तमुक्तावल्यां द्रव्यादीनां षड्पदार्थानां अन्योन्याभावमेव अभावः उक्तः[198]।

अभावस्य ज्ञानं स्वप्रतियोगिनः (भावस्य) अधीनः एव भवति[199]। अत्र अभावस्य स्थितिः अथवा अस्तित्वं भावोपरि आश्रितं नोक्तम्, अपितु तस्य ज्ञानं भावाश्रितं कथितम्। यतोहि यदि अभावस्य अस्तित्वमेव भावोपरि आश्रितं स्यात्, तर्हि तस्य तात्त्विकम्, वस्तुगतपदार्थत्वम् अप्रतिहतं न भवितुमर्हति। अतैव शिवादित्येन अभावस्य “भावाश्रितं स्वरूपं” न उक्त्वा “भावाश्रितं ज्ञानं” कथितम्।

अभावेन विषयस्य यत् ज्ञानं प्राप्यते, तत् “नञर्थकः” अथवा “नास्ति” आभ्यां प्रतीतिभ्यां गम्यते। स्पष्टतया लक्षणमिदं अभावस्य ज्ञान-मीमांसा-विषयकस्वरूपेषु अथवा तस्य “ग्राह्यपक्षे” प्रतिपाद्यते। अभावस्य केनापि अन्य पदार्थेन सह समवायसम्बन्धः न भवति, अतः अयं “असमवायि” वर्तते। अनेन प्रकारेण अभावस्य विविधलक्षणैः अभावस्य स्वरूपं किञ्चित् स्पष्टं भवति।

## २.३.२ अभावस्य सिद्धिनिरूपणम्-

न्यायसम्प्रदाये अभावः सर्वथा पृथक् पदार्थः सिद्ध्यति। अस्य सिद्धेः हेतौ प्रबलयुक्तिः इयं दीयते यत् अस्य अभावस्य प्रत्यक्षप्रतीतिः भवति। यथा- व्यक्तिः फलकं पश्यति एवं तस्मिन् फलके सः पुस्तकं न पश्यति, तस्मिन् क्षणे ज्ञानं भवति यत् “फलके पुस्तकं नास्ति” अर्थात् फलके

[193] “प्रतियोगिज्ञानाधीनविषयत्वम्”। सि.च. (तर्कसंग्रहः) पृ.सं.101.

[194] “नञर्थप्रत्ययविषयोऽभावः”। लक्षणा., पृ.सं.26.

[195] न्यायमञ्जरी, भागः1, पृ.सं.56

[196] समवायान्योऽसमवाय्यभावः। - मा. मनो., पृ.सं.134.

[197] “असमवायत्वे सत्यसमवायित्वम्,”। स.द.सं., पृ.सं.444.

[198] “द्रव्यादिषड्कान्योन्याभाव इति”। न्या.सि.मु., पृ.सं.69

[199] अभावस्य तु प्रतिषेधस्वभावस्य स्वरूपमेव यस्यायं (एव) प्रतिषेधः स्यात् तदधीनम्। अतस्तत्प्रतिषेध्यमन्तरेण तदभावस्य स्वरूपान्तराभावात्। न्या.क., पृ.सं.545

पुस्तकस्य अभावः वर्तते। पुस्तकाभावस्य इदं ज्ञानं तात्कालिकं प्रत्यक्षगम्यं च वर्तते, अतः अभावस्य सिद्धौ अन्य कस्यापि प्रमाणस्य आवश्यकता एव नास्ति। उक्तोदाहरणे पुस्तकरहितस्य फलकस्य तु ज्ञानं वर्तते अतः "पुस्तकाभावः" इति तस्य फलकस्य विशेषता उत विशेषणं कथितुं शक्यते। इयं विशेषता स्वरूपतः एव निषेधात्मिका वर्तते एवं फलकं दृष्ट्वा एव तस्याः तात्कालिकं प्रत्यक्षं भवति। अत्र एतत् न वक्तुं शक्यते यत् "पुस्तकस्य अभावः" कस्यापि अन्य भावरूपवस्तूनां प्रत्यक्षेण ज्ञायते, यथा- फलकस्य आकारेण, परिमाणेन, रूपेण च अथवा फलके स्थितेन अन्यवस्तुना, यतोहि एतत्तु निश्चितं यत् "पुस्तकस्य अभावः" एका निषेधात्मिका प्रतीतिः वर्तते, अतः सा कस्यापि भावात्मकप्रतीतेः उत आत्मगतानुभूतेः विषयः न भवितुमर्हति, तस्य पृथक्रूपेण प्रतीतिः भवति, इदमेव निषेधस्य अभावरूपपदार्थस्य च सिद्धौ समुचितं प्रमाणम्। अतः एतत् स्वीक्रियते यत् पुस्तकस्य अभावः फलके निषेधात्मिका विशेषता वर्तते एवं सः वस्तुतः सदेव।

अनेन प्रकारेण प्रत्यक्षेण अभावास्य सिद्धौ सत्यपि, अन्य उपायैः तस्य सत्तायां प्रमाणं प्रस्तूयते। किरणावलीकारस्य कथनं वर्तते यत् अभावस्य ग्रहणं प्रत्यक्षेण अपि भवितुं शक्यते, अनुमानेनापि च[200]। वादिवागीश्वरः व्यवहारेण अभावस्य सिद्धिः अनेन प्रकारेण कृतवान्- यद्यपि "अघटं भूतलम्" इयं प्रतीतिः भूतलादतिरिक्तं (घटाभावं) पदार्थमपि विषयः करोति, यतोहि सा प्रतीतिः केवलं भूतलस्य प्रतीतेः भिन्ना, भूतलावगाही च वर्तते, एतदनुमानं "भूतलम्" अस्य प्रकारस्य प्रतीतौ व्यभिचरितः, तथापि "अभावः" स्वीकर्तव्यः एव केवलं भूतलस्य अज्ञाने सत्यपि अभावव्यवहारः तु भवत्येव। यथा घटस्य घटगतरूपस्य च विशिष्टप्रतीतौ केवलं घटस्य अथवा रूपस्य ज्ञानेऽसति अपि घटे रूपस्य एवं रूपे घटस्य अन्योन्याभावः प्रतीयते। अनेन प्रकारेण एव अन्धकारे स्थीयमाणौ मनुष्यौ आधारस्य ज्ञानमसत्यपि अन्तराले आलोकाभावस्य प्रतीतिः तु भवति। अन्धोऽपि हस्ताभ्यां स्पर्शयित्वा वक्तुं शक्नोति यत् "अत्र घटो नास्ति" एतदर्थमुक्तव्यवहारेण अभावः तु स्वीकर्तव्यः इति। मानमनोहरकारेण एव अभावसिद्धौ अनुमानप्रयोगः अनेन प्रकारेण कृतम्- चक्षुः स्वग्राह्यभावपदार्थात् अतिरिक्तपदार्थस्य ग्राहको भवति यतोहि इन्द्रियमस्ति[201]। चित्सुखाचार्यः मानमनोहरस्य अनुमानानां पूर्णरूपम् अनेन प्रकारेण प्रस्तौति-

---

[200] स चाभावः क्वचित् प्रत्यक्षः क्वचिच्चानुमानिक इति लोकसिद्धमेवेत्यर्थः। किरणा., पृ.सं.327

[201] मा० मनो०, पृ.सं.132-133

**"चक्षुश्चाक्षुषभावातिरिक्तग्राहकमिन्द्रियत्वाद् घ्राणवत्"।**

**"निर्घटं भूतलमिति विज्ञानमेतद्विज्ञानालम्बनमात्रातिरिक्तालम्बनम् एतद् भावमात्रालम्बननिर्विकल्पकेतरज्ञानत्वात् सघटं भूतलमिति ज्ञानवत्"[202]।**

अत्र प्रथमानुमाने चाक्षुषभावपदार्थेभ्यः भिन्नतत्त्वस्य गन्धस्य ग्राहको यथा घ्राणः वर्तते, तथैव चक्षुरपि चाक्षुषभावपदर्थेभ्यः भिन्नस्य ग्राहकः तदैव भवितुमर्हति यदा रूपादीनामभावो स्वीक्रियते। द्वितीयानुमाने, यथा "सघटं भूतलम्" इदं ज्ञानं "निर्घटं भूतलम्" अस्य ज्ञानस्य विषयीभूतभावादतिरिक्तघटस्य ग्राहकोऽस्ति। तथैव "निर्घटं भूतलम्" ज्ञानमिदं तदैव अतिरिक्तवस्तुनः ग्राहकः भवितुमर्हति यदा घटाभावः स्वीक्रियते। अनेन प्रकारेण अभावपदार्थः सिद्धः भवति। एतदतिरिक्तः, यदि अभावः पदार्थः न मन्यते चेत् षट्भावपदार्थेषु परस्परं भेदोऽपि न कर्तुं शक्यते, तथा भावपदार्थाः षडेव सन्ति, इति निर्धारणोऽपि न कर्तुं श्क्यते। अतः अवच्छेदकरूपे अभावः पृथक् सत् पदार्थः मन्यतयेव।

अनेन प्रकारेण, विद्वांसः स्व-स्वमतानुसारेण "अभाव" अस्य पृथक् एवं सत् पदार्थस्य रूपे सिद्धिः कृतवन्तः एवमिदमेव मतं प्रतिपादितं यत् अभावं विना जगतः तत्त्वानां विश्लेषणं स्पष्टरूपेण न भवितुमर्हति। वस्तुतः अन्य भारतीयदर्शनपरम्परावत् न्यायदर्शनपरम्परा अपि स्वसिद्धान्तानां ज्ञानं मनुष्यस्य पुरुषार्थमोक्षस्य अपवर्गस्य च साधनं निर्दिशति[203]।

पण्डितगोपीनाथस्य विचारः अस्ति यत् न्यायसम्प्रदाये अभावस्य स्वीकृतिः तार्किकावश्यकतया न, अपितु तात्त्विकावश्यकतया प्रेरितः भवति। तथा इयं तात्त्विकावश्यकता अस्य सम्प्रदायस्य मूलभूतसिद्धान्ते आधारिता वर्तते-

## २.३.३ मुक्तेः निषेधात्मिका कल्पनाविमर्शः-

यदि न्यायसम्प्रदायेण प्रतिपादितस्य मुक्तेः अपवर्गस्य च स्वरूपे विचारः क्रियते, तर्हि स्पष्टं भविष्यति यत् अनेन दर्शनेन विहिता मुक्तिकल्पना एव "निषेधात्मिका" वर्तते, अतः विदुषाम् इदं मतमस्ति यत् "अभाव" नाम्नः पृथक्पदार्थस्य कल्पना अत्र अपवर्गस्वरूपस्य व्याख्यायै एव कृता वर्तते। न्यायसूत्रकारेण गौतमानुसारेण दुःखम् (मनुष्यस्य कामना पूर्तिनि) बाधनालक्षणं भवति, एवं तस्मात् दुःखात् अत्यन्तविमोक्षः एव अपवर्गोऽस्ति[204]। उदयनाचार्यः अपि कथितवान् यत् "आत्यन्तिकी दुःखनिवृत्तिः एव निःश्रेयस् वर्तते, अस्मिन् सम्बन्धे तु सर्वेषां

---

[202] चित्सुखी, पृ.सं.448

[203] न्या.सू. 1/1/1

[204] बाधनालक्षणं दुःखम्। तदत्यन्तविमोक्षोऽपवर्गः। न्या.सू. 1/1/21

विदुषां मध्ये विवादः एव न वर्तते "[205]। उपस्कारकर्ता शंकरमिश्रोऽपि अपवर्गम् अथवा निःश्रेयस् "दुःखप्रागभावरूपम्" एव उक्तवान्[206]। अतः मुक्तेः उक्तलक्षणैः स्पष्टं यत् अपवर्गकल्पनया सह एव न्यायदार्शनिकानां समक्षे "निषेधस्य" अथवा "अभावस्य" समस्या अपि आसीत्। एतदर्थं "अभावः" पृथक् पदार्थरूपे स्वीकार्यः अस्य दर्शनधारायै सर्वथा अपरिहार्यः एव आसीत्। तात्पर्यमिदं वर्तते यत् सिद्धान्तमते अपवर्गस्य लक्षणमेव निषेधरूपं कृतं, तदनुसारेण मुक्तिः सुखस्य प्राप्तौ न, अपितु दुःखस्य निवृत्तौ वर्तते। अनेन प्रकारेण न्यायस्य अपवर्गनिरूपणमेव इदं सिद्धयति, यत् अस्य दर्शनस्य सिद्धान्तानां समग्रसंगतेः स्थापनायै अभाव पदार्थः अनिवार्यरूपेण स्वीकरणीयः। अनया दृष्ट्या स्पष्टं भवति यत् एतदर्थमेव न्याय-वैशेषिकदर्शनपरम्परायाम् अभावस्य कियत् महत्त्वं वर्तते इति। यतोहि एतत् तस्य अन्तिमध्येयेन सम्बद्धोऽस्ति। एतदर्थं न्यायकौस्तुभकारस्य इयमुक्तिः सर्वथा अङ्गीक्रियते यत् "यदि अभावः (भावात्) अतिरिक्तः अथवा पृथक् पदार्थः न मन्यते, तर्हि अपवर्गस्य अस्मिन् रूपे स्थापना असम्भवा एव"[207]।

अनेन प्रकारेण, स्पष्टं यत् यद्यपि न्याय-वैशेषिकदर्शनस्य सूत्रग्रन्थेषु अभावं पृथक् पदार्थः न स्वीकृतः, तथापि अपवर्गः अथवा निःश्रेयस् इति अन्तिमध्येयः तु निश्चितरूपेण स्वीकृतः एव, अतः वक्तुं शक्यते यत् अप्रत्यक्षतः अभावः अपि स्वीकृतः। संभवतः एतदर्थमेव परवर्तिषु न्याय-वैशेषिकग्रन्थेषु, यत्र अभावः पृथक् पदार्थः स्वीकृतः, तत्र अपवर्गस्य प्रमेयरूपे गणना न कृतः, यतोहि उभौ एकेनैव निर्देशेन निर्दिश्यते। तर्कसंग्रहस्य चन्द्रिकाव्याख्यायां तु स्पष्टमेव उक्तं यत् यतोहि अपवर्गः दुःखनिषेधस्य अर्थात् एकस्य निषेधात्मिकायाः भावनायाः (दुःखस्य) निषेधः एव वर्तते, अतः सः निषेधरूपपदार्थः अभावस्य अन्तर्गते एव भवति[208]।

अतः सिद्धोऽयं यत् न्याय-वैशेषिकपरम्परायाम् अभावस्य सिद्धिः तस्य अन्तिमलक्ष्यः "निःश्रेयस्" अस्य स्वरूपसिद्धये अनिवार्यः, अर्थात् अभावः बाह्यः, पृथक् पदार्थः स्वीकार्यं विना तु अस्य सम्प्रदायस्य अन्तिमध्येयस्य मोक्षस्य सिद्धि एव न भवितुमर्हति, यतोहि अत्र सोऽपि निषेधरुपमेव वर्तते। यद्यपि अस्य निषेधरुपस्य मुक्तिकल्पनायाः वेदान्तिना[209] प्रभाकरमीमांसकाभ्याञ्च[210] अत्यन्तं तिरस्कारपूर्वकमुपहासं व्यधायि, तेषामनुसारेण मुक्तिः केवलं

---

205 निःश्रेयसं पुनर्दुःखनिवृत्तिरात्यन्तिकी, अत्र च वादिनाम् अविवाद एव। किरणा., पृ.सं.6

206 उप०, पृ.सं.20

207 अतिरिक्ताभावानङ्गीकारे मोक्षस्यासाध्यतापत्तेश्च। न्या० कौ०, पृ.सं.123

208 त० सं० चन्द्रिका (मुकुन्द भट्ट गाडलीकृत), पृ.सं.86

209 अद्वैतब्रह्मसिद्धिः, पृ.सं.144-145

210 न्या० कौ०, पृ.सं.137

दुःखस्य निवृत्तिः अथवा निषेधः एव न, अपितु नित्यानन्दस्य भावदशा अपि वर्तते। अत एव अत्र अभावः केवलं तार्किकावश्यकता एव न, अपितु तत्त्वमीमांसायाः एकमपरिहार्यमङ्गमपि वर्तते। अन्य भारतीयदर्शनेषु अस्य चर्चा केवलं तार्किकरूपे कृता अस्ति।

## २.३.४ अभावस्य विशेषण-विशेष्यभावसन्निकर्षविवेचनम्-

अभावसिद्धिप्रसङ्गे प्रतिपादितं यत् उद्योतकराचार्यः एव प्रथमः नैयायिकः वर्तते, यः अभावस्य इन्द्रियसन्निकर्षस्य सिद्धान्तः स्थापितवान्। तदनुसारेण विषयेन्द्रियोर्मध्ये सन्निकर्षेण उत्पद्यमानं ज्ञानमेव प्रत्यक्षं कथ्यते, एवं विषयाणाम् इन्द्रियाणाञ्च अयं सन्निकर्षः न्यायवार्तिककारेण षड्विधः प्रतिपादितः- संयोगः, संयुक्तसमवायः, संयुक्त-समवेत-समवायः, समवायः, समवेत-समवायः, विशेषण-विशेष्य-भावश्च[211]।

स्पष्टतः एते षड्सन्निकर्षाः सम्बन्धत्रये आधारे निर्मिताः सन्ति- संयोगः, समवायः, विशेषण-विशेष्य-भावश्च। प्रथमत्रयः सन्निकर्षाः संयोगसम्बन्धे आधृतः सन्ति, चतुर्थः, पञ्चमश्च सन्निकर्षौ समवायसम्बन्धेन उद्भुतौ स्तः, तथा अन्तिमः सन्निकर्षः विशेषणतायां आश्रितः वर्तते। अत्र प्रथमसन्निकर्षे द्रव्यस्य प्रत्यक्षं भवति, द्वितीयेन गुणस्य कर्मणश्च, तृतीयेण गुणस्य जातेः (गुणत्वस्य), चतुर्थेन शब्दगुणस्य, पञ्चमेन शब्दत्वस्य, एवं अन्तिमसन्निकर्षेण अभावस्य प्रत्यक्षं भवति[212]। इदमेव सिद्धान्तमतमस्ति। वस्तुतः "विशेषण-विशेष्य-भाव" रूपस्य षष्ठसन्निकर्षस्य कल्पना एव अभावस्य प्रत्यक्षत्वस्य सिद्धये कृता। यतोहि अभावस्य स्वतन्त्ररूपेण प्रत्यक्षं न भवितुं शक्यते, अतैव अयं सिद्धान्तः प्रतिपादितः यत् सः स्वाश्रयद्रव्यस्य विशेषणरूपे एव प्रत्यक्षं भवितुमर्हति। अभावस्य प्रत्यक्षत्वसिद्धान्तः जटिलः वर्तते, यतोहि अस्य विषये समस्या उत्पद्यते। यथा- अभावः द्रव्यं नास्ति, अतः अस्य प्रत्यक्षं संयोगेन अथवा साक्षादिन्द्रियसन्निकर्षेण न सम्भवति, नैव अभावः अन्यद्रव्येषु समवेतत्वात् स्थीयते यतोहि अयं गुणः न वर्तते, न कर्म जातिश्च।

## २.३.५ घटाभाववद्भूतलस्य प्रत्यक्षविवेचनम्

न्याये अभावस्य प्रत्यक्षं कथं भवति अस्य विचारः क्रियते, घटस्य अभावप्रत्यक्षे द्वे तत्त्वे स्तः- तत्र प्रथमं वर्तते रिक्तभूतलस्य (घटाभाववान्) तथा चक्षुरिन्द्रियस्य मध्ये सन्निकर्षः। द्वितीयं

---

211 "इन्द्रियेणार्थस्य सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत्प्रत्यक्षम्।......सन्निकर्षः पुनः षोढा भिद्यते- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेषणविशेष्यभावश्चेति"। न्या० वा० (1/1/4 न्यायसूत्रे), पृ.सं.32

212 न्या० क०, पृ.सं.463

वर्तते विशेषणतारुपः विचित्रसम्बन्धः, येन भूतलस्य घटस्य च अभावस्य मध्ये सम्बन्धः प्रतिपाद्यते।

अनेन प्रकारेण वयम् अभावं भूतलस्य विशेषणरूपे पश्यामः यः घटाभावेन युक्तः वर्तते[213]। तथा न्याय-वैशेषिकयोः पूर्वसिद्धमन्यता वर्तते यत् येन इन्द्रियेण यस्य वस्तुनः प्रत्यक्षः भवति, तेनैव तस्य वस्तुनः जातेः अभावस्य चापि प्रत्यक्षः भवति[214]। अतः "भूतले घटो नास्ति" अनेन वाक्येन व्यक्तभूतले घटस्य अभावभूतलस्य विशेषणरूपे प्रत्यक्षः भवति। अभावस्य प्रत्यक्षः संयोगेन एतदर्थं सम्भवः नास्ति यतोहि सः केवलं द्वयोः द्रव्ययोः मध्ये एव सम्बन्धः स्थापयति। समवायः तु अभावविषये असम्भवः एव, यतोहि सः केवलं तयोरेव वस्तुनोः मध्ये भवति, ययोः एकः अन्यस्मिन् समवेतः भवति। यथा- पुष्पे रूपम्। परमभावः इत्थं नित्यरूपेण स्वाधिकरणेन सह सम्बद्धः न भवति, अतः अभावस्य प्रत्यक्षाय न्यायवैशेषिकेण नवीनोऽयं सन्निकर्षः स्वीकृतः।

एतदर्थं सिद्धान्तपक्षः वर्तते यत् यदा वयं भूतलं पश्यामः, तस्मिन् क्षणे अस्मान् "घटाभावविशिष्टभूतलं" एतादृशी प्रतीतिः भवति एवं भूतलसदृशः एव घटाभावस्य अपि प्रत्यक्षानुभवः भवति। अतैव प्रशस्तपादस्य व्याख्याकारः श्रीधराचार्यः अभावास्य अनुमेयत्वम् अस्वीकृत्य तस्य प्रत्यक्षत्वे तर्कोऽयं प्रस्तौति- यदा रिक्तभूतलः इन्द्रियसन्निकर्षेण गृह्यते, तदा इदमभावज्ञानमपि भवति यत् भूतले घटो नास्ति, अतः भूतलवत् अभावस्य अपि प्रत्यक्षता किमर्थं न स्वीक्रियते?[215]।

न्यायमञ्जरीकारः जयन्तभट्टोऽपि तर्कोऽयमेव प्रस्तौति यत्- यदा वयं चक्षुषी उन्मीलयामः तदा भूतलं तथा तस्मिन् भूतले घटस्य अभावमुभौ एव पश्यामः, अनेन प्रकारेण एव चक्षुषी पिधायित्वात् वयं उभौ एव न पश्यामः। अतः उभयोरेव ज्ञानयोः "तद्भावभावित्वस्य" सदृशत्वात् भूप्रदेशज्ञानं चाक्षुषम्, तथा अभावज्ञानम् अचाक्षुषमिति कथं भिन्नता स्वीकरिष्यते?[216] अतः भूतलज्ञानवत् भूतले घटस्य अभावमपि चाक्षुषः मन्तव्यम्, अयमभिप्रायो वर्तते। एतदर्थं न्याय-वैशेषिकपरम्परायाम् अभावः इन्द्रियप्रत्यक्षगम्य एव स्वीकृतः। अस्मिन् विषये न्यायकौस्तुभकारः

---

213 "तदभावविशिष्टभूतलग्रहणम्"। न्या० क०, पृ.सं.555

214 "येनेन्द्रियेण यः व्यक्तिः गृह्यते, तेनैवेन्द्रियेण तज्जातिः तदभावोऽपि गृह्यते"। न्या० वा०, (1/1/4 न्यायसूत्रे)

215 "अपि चेन्द्रियसन्निकर्षाद् उपलभ्यमाने भूतलेऽभावज्ञानमपि भवति अघटं भूतलम् इति तत्र भूतलस्येवाभावस्यापि प्रत्यक्षता किं नेष्यते?" न्या० क०, पृ.सं.544

216 न्या० मं०, भाग 1, पृ.सं.46

इयं युक्तिः उपस्थापयति यत्- “भूतले घटो नास्ति” इति मया द्दष्टम् इत्याद्यनुभवेषु अभावस्य इन्द्रियजन्यप्रत्यक्षम्, विधिनिषेधरीतिभ्याम् अनन्यथासिद्धत्वात् एव प्रमाणितं भवति[217]।

विश्वनाथेन अभवास्य सम्बन्धे अनयोः विप्रतिपत्तयोः अपि उल्लेखः कृतः। प्रथममतानुसारेण तु अभावः ज्ञानस्वरूपं भवति, अर्थात् यदा वयं भूतलं पश्यामः तदा घटस्य स्मृतौ सति ज्ञायते यत् सः घटः अत्र नास्ति, अनेन प्रकारेण “भूतले घटाभावः” विशिष्टज्ञानमेव वर्तते। एवमन्येषां मतमस्ति यत् भूतले घटाभावः इति कालविशेषः वर्तते अर्थात् यदा घटः तत्र न विद्यते सः कालः एव भूतलस्य घटाभावः कथ्यते। अतः घटाभावः कोऽपि पृथक् पदार्थः न वर्तते, अपितु भूतलस्यैव कालविशेषोऽस्ति[218]।

अनयोः मतयोः उत्तरे विश्वनाथः सिद्धान्तमतं प्रस्तौति यत् “भूतले घटाभावः” इति ज्ञानविशेषः अथवा कालविशेषः मन्तव्ये सति, अभावस्य प्रत्यक्षता एव न सिद्ध्यति यतोहि ज्ञानस्य तु मानसप्रत्यक्षं भवति एवं कालस्य तु बाह्येन्द्रियेण प्रत्यक्षः न भवति, अतः उभयोरेव स्थितयोः अभावस्य अप्रत्यक्षत्वस्य आपत्तेः अभावस्य पृथक् पदार्थत्वमेव उचितमिति[219]।

## २.३.६ नञर्थे अभावस्य भेदविचारः-

न्याय-वैशेषिकसूत्रेषु यद्यपि अभावस्य पृथक् पदार्थरूपे स्पष्टोल्लेखः न प्राप्यते किन्तु अभावस्य चतुर्णां भेदानां निरूपणं सर्वप्रथमं तत्रैव उपलभ्यते[220]। शिवादित्यः, उदयनाचार्यः, श्रीधराचार्यश्च अपि अभावं तेषु एव चतुर्भेदेषु विभाजनं कुर्वन्ति- प्रागभावः, प्रध्वंसाभावः अत्यन्ताभावः, अन्योन्याभावश्च[221]।

मानमनोहरकारस्य मतं वर्तते यत् अभावस्य एते चत्वारः भेदाः प्रतियोगिनः भेदात् जन्यः सन्ति, यतोहि अन्योन्याभावस्य प्रतियोगी तादात्म्यम्, अत्यन्ताभावस्य संसृष्टः (भूतलादि संसर्गविशिष्टः घटादि), प्रागभावस्य पूर्वकालसंसृष्टः तथा च प्रध्वंसाभावस्य उत्तरकालसंसृष्टः भवति[222]।

---

217 “वस्तुतो भूतले घटो नास्तीति मया द्दष्टम् इति अनुभवादिन्द्रियस्यानन्यथासिद्धान्वयव्यतिरेकवशाच्चेन्द्रियजन्यं प्रत्यक्षम् एवाभावस्य युक्तम्”। न्या० कौ०, पृ.सं.159

218 न्या० सि० मु०, पृ.सं.68

219 “एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तम्, अप्रत्यक्षत्वापत्तेः”। न्या० सि० मु०, पृ.सं.७५

220 वै०सू०, 9/1/1-4

221 स० प०, पृ.सं.85-87, लक्षणा०, पृ.सं.26 तथा न्या० कं०, पृ.सं.556

222 “प्रतियोगिभेदाद् भिन्नत्वमभावस्य, तादात्म्यसंसृष्टपूर्वापरसृष्टानां प्रतियोगित्वाद्”। मा० मनो०, पृ.सं.133

तात्पर्यमिदं वर्तते यत् सर्वेषाम् अभावस्य ज्ञानं स्वप्रतियोगिनः ज्ञाने एव आश्रितः भवति। उदाहरणाय "फलके पुस्तकं नास्ति" अनेन वाक्येन व्यक्तस्य पुस्तकस्य अभावः तदैव ज्ञातुं शक्यते यदा पुस्तकस्य ज्ञानं पूर्वमेव स्यात्। अतः अभावस्य लक्षणमिदं सर्वेषु अभावेषु प्रतिपाद्यते भावपदार्थेषु कदापि न, यतोहि इदं केवलम् अभावस्यैव वैशिष्ट्यम्।

विश्वनाथः प्रथमं तु अभावं द्विधा कथयति- संसर्गाभावः अन्योन्याभावश्च, पुनः संसर्गाभावस्य भेदत्रयं करोति, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावश्च[223]। जयन्तभट्टानुसारेण अभावस्य प्रमुखतया भेदद्वयमेव भवति- प्रागभावः प्रध्वंसाभावश्च। यद्यपि अनेन अन्ययोः अभावयोः नाम अपि निर्देशितम्, किन्तु तस्य विचारोऽस्ति यत् मुख्यरूपेण अभावस्य भेदद्वयमेव वर्तते। अन्यभेदौ प्रागभावस्य अन्तर्गते एव अनुस्यूतौ[224]। न्यायकन्दलीकारः यद्यपि जयन्तभट्टात् परवर्ती वर्तते तथापि अयं सामान्यतः वैशेषिकदर्शने प्रचलिताभावस्य चत्वारः भेदाः स्वीकरोति, किन्तु तेषां स्वरूपविषये प्रकरणग्रन्थकारैः सह तस्य यत्र-कुत्र वैमत्यं दृश्यते। एवमभावस्य भेदानां, स्वरूपस्य च विषये मतवैभिन्न्येन सिद्धोऽयं भवति यत् वैशेषिकदर्शने न्यायदर्शने च अभावसिद्धान्तस्य विकासः क्रमशः अभवत्। अथ चतुर्णां भेदानां सिद्धान्तमतानुसारेण लक्षणे स्वरूपे च विचारः क्रियते-

## २.३.६.१ नञर्थे प्रागभावविमर्शः-

सूत्रकारः प्रागभावस्य निरुपणमनेन प्रकारेण करोति यत्- क्रियायाः तथा गुणस्य व्यवहारः न सत्वात्, स्वोत्पत्तेः पूर्वं कार्यमसत् एव भवति[225]। तात्पर्यमिदमस्ति यत् यदि कार्यं घटादेः उत्पत्तेः पूर्वमपि विद्यते तर्हि उत्पन्नघटवत् तस्मिन्नपि क्रियायाः गुणस्य च सद्भावः स्यात्, किन्तु इत्थं न भवति। अतः अयमेव सिद्धः यत् उत्पत्तेः पूर्वं घटः न भवति अर्थात् घटस्य प्रागभावः वर्तते। तथा अयमेव प्रागभावः प्रतियोगिनः (कार्यस्य) उत्पादकः वर्तते। यतोहि घटस्य उत्पन्ने सति सैव घटः, तस्मिन्नेव क्षणे, नोत्पद्यते। यदि उच्यते यत् तस्य घटस्य उत्पत्तौ सैव घटः प्रतिबन्धकः वर्तते तर्हि प्रतिबन्धकस्य अभावस्वरूपं तं घटप्रागभावं कारणं मन्तव्यमिति[226]। अनेन प्रकारेण,

---

[223] अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते। भा० प०, कारिका 12-13, पृ.सं.69-75

[224] उत्पन्नस्य विनाशो वा तदनुत्पाद एव वा।
अभावस्तत्त्वतोऽन्ये तु भेदास्त्वौपाधिकाः मताः॥
न प्रागभावाद् अन्ये तु भिद्यन्ते परमार्थतः।

[225] वै० सू०, 1/1/1

[226] उप. पृ.सं.467-569

प्रागभावस्य स्वरूपं सिद्धं भवति। श्रीधराचार्यस्य अनुसारेण प्राक् अर्थात् कर्योत्पत्तेः पूर्वं अभावस्य अर्थात् कार्यरूपविशेषस्य अभाव एव प्रगभावः। अयं अनादिः सत्यपि विनाशशीलः वर्तते, प्रतियोगिभूतस्य वस्तुनः उत्पत्तिरेव तस्य प्रागभावस्य विनाशः[227]। शिवादित्य-अन्नम्भट्टानुसारेण अनादिः किन्तु सान्तः प्रागभावः भवति[228]। अयं कार्यस्य उत्पत्तेः पूर्वविद्यमानः अभावोऽस्ति यस्य कार्योत्पत्तेः सति विनाशः भवति। वल्लभाचार्य-उदयनाचार्यानुसारेण उत्तरकालः एव यस्य अवधिः स्यात्, एतादृशः अभावः प्रागभावः उच्यते[229]। विश्वनाथस्य शब्देषु, विनष्टः भूयमानः अविनाशी अभावः प्रागभावः कथ्यते[230]।

अनम्भट्टानुसारेण प्रागभावः कार्यस्य उत्पत्तेः पूर्वं विद्यते। यथा घटस्य प्रागभावः मृत्परमाणुसु। प्रागभावः स्वप्रतियोगिनः (कार्यस्य) जनकोऽपि भवति। कार्यम् उत्पत्तिष्यति एतादृशस्य व्यवहारस्य हुतुरेव प्रागभावः वर्तते[231]।

अनेन प्रकारेण वक्तुं शक्यते यत् घटस्य उत्पत्तेः पूर्वं विद्यमानस्य घटस्य अभावः प्रागभावः कथ्यते यः अनादिकालात् प्रचलति स्म किन्तु घटस्य उत्पत्तौ सति नष्टः अभवत्। रघुनाथशिरोमणिना केषाञ्चित् विदुषां मतमिदमपि प्रस्तुतं यत्- “प्रागभावः पारमार्थिकः न”[232] इति।

## २.३.६.२ नञर्थे प्रध्वंसाभावविमर्शः-

सूत्रकारानुसारेण “सद्रूपघटादिः असत् भवति” अयमेव तस्य प्रध्वंसाभावः वर्तते। तात्पर्यमिदं वर्तते यत् यथा उत्पादककारणानां व्यापारात् पूर्वं प्रत्यक्षेण अनुमानेन च प्रमाणेन घटादिकार्यस्य असत्ता (प्रागभावः) ज्ञायते, तथैव मुद्गरादिचलनरूपस्य कार्यस्य पश्चात् वर्तमानेव कार्यघटादि अस्मिन् समये असत् वर्तते, इति प्रत्यक्षेण अनुमानेन च प्रमाणेन निश्चीयते। तस्याभावस्य नाम वर्तते “ध्वंसः” यतोहि घटो नष्टः, पूर्वं श्रुतः गकारादिशब्दः अस्मिन् काले नास्ति, इत्यादि प्रतीतिः अनेनैव भवति[233]। श्रीधराचार्यस्य अनुसारेण उत्पन्नकार्यस्य स्वरूपात् विनष्ट एव प्रध्वंसाभावः वर्तते। अभावोऽयं उत्पत्तिशीले सत्यपि विनाशशीलः न वर्तते, यतोहि विनष्टस्य

---

227 “प्रागुत्पत्तेः कारणेषु कार्यस्याभावः प्रागभावः, तत्र प्राक् कार्योत्पत्तेः पूर्वमभावो विशेषस्य”। न्या० क०, पृ.सं.556

228 “अनादिः सान्तः प्रागभावः”। स० प०, पृ.सं.85, त० सं०, पृ.सं.62

229 “विनाश्यभावत्वं प्रागभावत्वम्”। न्या० सि० मु०, पृ.सं.72 तथा “उत्तरैकावधिरभावः प्रागभावः”। न्या० ली०, पृ.सं.567

230 “उत्तरकालावधिरभावः प्रागभावः”। लक्षणा०, पृ.सं.26

231 “प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनको भविष्यतीति व्यवहारहेतुः प्रागभावः”। त० दी०, पृ.सं.62

232 “प्रागभाव एव न पारमार्थिक इत्यन्ये”। प० त० नि०, पृ.सं.69

233 “सदसत्”। वै० सू० 9/1/2 तथा उप. पृ.सं.469-470

भावव्यक्तेः पुनः उत्पत्त्यसंभवात्[234]। शिवादित्यस्य शब्देषु "सादि" किन्तु अनन्तः प्रध्वंसाभावः भवति[235]। वल्लभाचार्यस्य उदयनाचार्यस्य च कथनं वर्तते यत् "पूर्वकाल एव यस्य अवधिः" सः प्रध्वंसाभावः भवति[236]। विश्वनाथस्य मतमस्ति यत् जन्याभावः ध्वंसाभावः कथ्यते[237]। अस्य जन्यस्य तात्पर्यमिदमेव वर्तते यत् अयं कार्यस्य नष्टे सति उत्पद्यते, एतदर्थं इदं "सादि" अपि कथ्यते। किन्तु उत्पन्ने सति पुनः अस्य कदापि नाशो न भवति, अतः अयमनन्तः अपि वर्तते। अनेन प्रकारेण पूर्वकालः (कार्यस्य उत्पत्तिदशा) एव अस्य अवधिः भवति। तस्य अवधेः सम्पन्ने सत्येव (कार्यस्य नष्टे सति) ध्वंसाभावः उत्पद्यते।

अन्नम्भट्टानुसारेण सादि, किन्तु अनन्तः अभावः ध्वंसाभावः वर्तते यः कार्यस्य उत्पत्तेः पश्चात् प्राप्यते। प्रागभाववत् प्रध्वंसाभावस्य अपि अनेन तिस्रः विशेषताः निर्देशिताः- अयं स्वकार्यात् (नाशात्) जन्यः भवति। प्रागभाववत् अयमपि स्वप्रतियोगिनः (कार्यस्य) समवायिकारणे प्राप्यते। नष्टः अभवत् इत्यादिव्यवहारस्य हेतुः अयमेव ध्वंसाभावः भवति[238]। अनेन प्रकारेण, प्रध्वंसाभावः प्रागभावस्य सर्वथा विपरीतः वर्तते। अस्य विषये उल्लेखनीयं तथ्यमिदमेव यत् यद्यपि अयं कार्यस्य ध्वंसानन्तरम् उत्पद्यते, तथापि अस्य कदापि नाशः न भवति, अयमेवानन्तः।

अत्र पूर्वपक्षेण शंका क्रियते यत् नष्टस्य कार्यस्य पुनरुत्पत्तौ सति तस्य प्रध्वंसाभावः तु समाप्यते, पुनः तमनन्तः कथं वक्तुंशक्यते? अस्य शंकायाः समाधानं स्पष्टमेव वर्तते यत् यत्कार्यवस्तु नष्टः भवति, पुनः तस्य पुनरुत्पत्तिः असंभवा एव। तेषामेव कारणसामग्रीनां प्रयोगे सत्यपि किमपि कार्यं पूर्वकार्यवत् तु भवितुमर्हति, किन्तु तदेव न भवितुं शक्यते, यतोहि तत्पूर्वकार्यस्य उत्पत्तौ भूयमानानाम् अवयवानां संयोगः नूतनकार्यस्य अवयवसंयोगैः सर्वथा भिन्नः वर्तते। अनेन प्रकारेण सिद्धोऽयं भवति यत् कस्यापि कार्यस्य नष्टानन्तरम् उत्पद्यमानः तस्य प्रध्वंसाभावः कदापि नष्टो न भवति, सः अनन्तैव भवति।

प्रध्वंसाभावः अपि कार्येण सम्बद्धो वर्तते। उर्युक्तविवेचनेन स्पष्टमेव यत् प्रागभावः प्रध्वंसाभावश्च उभौ कर्येण सम्बद्धरुपे एव व्याख्यायितौ। प्रागभावः कार्यस्य उत्पत्तेः पूर्वं विद्यमानः अभावः वर्तते, प्रध्वंसाभावः कार्यस्य नष्टानन्तरं विद्यते।

---

234 "उत्पन्नस्य स्वरूपच्युतिः प्रध्वंसाभावः। स चोत्पत्तिमानप्यविनाशी भावस्य पुनरनुपलम्भात्"। न्या० कं०, पृ.सं.556

235 "सादिरनन्तः प्रध्वंसाभावः"। स० प०, पृ.सं.86

236 "पूर्वकालावधिरभावः प्रध्वंसाभावः"। लक्षणा०, पृ.सं.26 तथा "प्रागेकावधिरभावो ध्वंसः"। न्या० ली० पृ.सं.567

237 "जन्याभावत्वं ध्वंसत्वम्"। न्या० सि० मु०, पृ.सं.73

238 "सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य"।
"प्रतियोगिजन्यः प्रतियोगिसमवायिकारणवृत्तिर्ध्वस्तव्यवहारहेतुर्ध्वंसः"। त० सं० दी०, पृ.सं.62

प्रायः नैयायिकानामनुसारेण अत्यन्ताभावस्य अत्यन्ताभावः भावसदृशः वर्तते, अर्थात् यथा द्वौ निषेधौ एकविधिसदृशः भवतः, तथैव द्वौ अभावौ एकभावस्य सूचकौ मन्येते। किन्तु रघुनाथशिरोमणिं मतमिदं न स्वीकरोति। यतोहि यदि इदं स्वीक्रियते चेत् अनवस्था भविष्यति। एवं सर्वेषु अभावेषु "अभावत्व" नाम्नः एका अखण्डोपाधिः विद्यते[239] अनेन कारणेन अभावः भावाद् पृथक् सिद्धः भवति, अत्यन्ताभावस्य अत्यन्ताभावः कदापि भावः न भवितुमर्हति। तृतीयः अत्यन्ताभावः प्रथमात्यन्ताभावस्य तुल्यमेव भवति,[240] अयं पदार्थतत्त्वनिरूपणकारस्य सिद्धान्तो वर्तते। पदार्थमण्डनकारेणापि मतमिदं व्यक्तम्[241]।

भारतीयदार्शनिकेषु रघुनाथशिरोमणिः "प्रध्वंसाभावस्य प्रागभावः" तथा "प्रागभावस्य प्रध्वंसाभावः" अस्य अपि चर्चा कृतवान्, एवं मतमिदं प्रतिपादितं यत् "प्रध्वंसस्य प्रागभावः" तथा "प्रागभावस्य प्रध्वंसः" स्वीक्रियते एव, यतोहि घटादेः सत्त्वदशायां तस्य (घटस्य) प्रागभवाः प्रध्वंसश्च उभावेव "न स्तः" एतादृशी अबाधितप्रतीतिः भवति[242]। रघुनाथस्य परवर्ती वेणीदत्तः अस्मिन् स्थले अपि रघुनाथस्य मतेन सह सहमतिः व्यक्तवान्[243]।

उक्तसिद्धान्तस्य स्वीकृते सति तर्किकविसंगतिः उपस्थीयते यत् "प्रागभावस्य ध्वंसः" तु स्वं कार्यवर्त्तमानतया एव सिद्ध्यते। अतः अस्य "प्रागभावस्य ध्वंसस्य ध्वंसः" किं भविष्यति, यतोहि सैद्धान्तिकानुसारेण तु प्रागभावस्य नाशे सति "प्रध्वंसाभावस्य" जन्म भवति, न तु प्रागभावस्य। वल्लभाचार्यः अस्याः शंकायाः समाधानं करोति यत्- यदि प्रागभावस्य निवृत्तौ सति पुनः तस्यैव (प्रागभावस्य) उत्पत्तेः आशंका क्रियते, इदं नोचितम्, यतोहि अत्र तु प्रध्वंस अपि तस्य (प्रागभावस्य ध्वंसस्य ध्वंसः) अस्य विरोधी वर्तते[244]। उपस्कारकर्ता अपि इदमेव मतं व्यक्तवान्[245]। तात्पर्यमिदं वर्तते यत्- घटस्य प्रागभावस्य निषेधः= घटस्य स्थितिः। एते उभे स्थिती तु एकस्यैव तत्त्वस्य सूचकः स्तः, किन्तु अत्र द्वितीयः निषेधः (प्रागभावस्य)

---

239 "एवं घटाद्यभावस्याप्यभावोतिरिक्त एव। घटादिमति तदभावो नास्तीति अबाधिताभावप्रत्ययात्"। प० त० नि०, पृ.सं.62

240 "न चैवम् अनवस्था एकस्यैव घटाभावस्य स्वाभावत्वरूपत्वे विरोधत्वात्"। तत्रैव, पृ.सं.68

241 "न चैवमनवस्था, घटाभावस्य तदभावरूपत्वे विरोधाभावात्। तथा च घटाभावाभावस्याप्यभावो घटाभाव एव न त्वतिरिक्त इति नानवस्था"। प० म०, पृ.सं.27

242 "ध्वंसप्रागभावयोश्चातिरिक्तौ एव प्रागभावध्वंसौ घटादेः सत्त्वकाले तस्य प्रागभावध्वंसौ न स्त इत्यबाधिताभावत्वप्रत्ययात्"। प० त० नि०, पृ.सं.69

243 "ध्वंसप्रागभावयोश्चातिरिक्तावेव प्रागभावध्वंसौ, घटादेः सत्त्वकाले प्रागभावध्वंसौ न स्त इत्यबाधिताभावप्रत्ययात्"। प० म०, पृ.सं.28

244 "प्रागभावनिवृत्तिनिवृत्तौ तदुन्मज्जनापत्तिरिति चेत्, न, ध्वंसस्यापि तद्विरोधित्वात्"। न्या० ली०, पृ.सं.567-568

245 उप०, पृ.सं.469

प्रागभावस्य ध्वंसस्य सूचकोऽस्ति न तु तस्य उत्पन्नस्य। अत एव बल्लभाचार्यस्य उक्तिः वर्तते यत् प्रध्वंसाभावे, प्रागभावे (घटाभावे) च उभयो एव रूपयोः भिन्नः न वर्तते[246]।

## २.३.६.३ नञर्थे अत्यन्ताभावविमर्शः-

सूत्रकारेण अत्यन्ताभावस्य स्वरूपमनेन प्रकारेण स्पष्टं कृतं यत् यः त्रिभ्यः अभावेभ्यः पृथक् अभावः वर्तते स एव अत्यन्ताभावः[247]। शंकरमिश्रेण अस्य अर्थः स्पष्टकृतः यत् अत्र सूत्रे उभौ असत् पदे भावं प्रधानं मत्वा उक्ते। तयोः द्वयोरेकम् "असत्" पदं उद्देश्यः तथा द्वितीयं विधेयः वर्तते, इति सत्त्वात् प्रागभावादिभ्यः त्रिभ्यः अभावेभ्यः भिन्नः यः अभावः स एव अत्यन्ताभावः इति सूत्रस्य पर्यवसितार्थः जायते[248]। न्यायकन्दलीकारस्य मते सर्वथा अविद्यमानस्य वस्तुनः यः निषेधः, स एव अत्यन्ताभावः अथवा कस्मिंश्चित् सिद्धाश्रये सर्वथा अविद्यमानः, किन्तु केवलं बुद्धौ आरोपितवस्तुनः "अस्मिन्नाश्रये एतत्कदापि कस्मिन्नपि प्रदेशे नास्ति" इति प्रतिषेध एव अत्यन्ताभावः वर्तते[249]।

शिवादित्येन अनादिः अनन्तश्च संसर्गाभाव अत्यन्ताभावः उक्तः[250]। उदयनाचार्यानुसारेण उभाभ्यां (पूर्वकालरूपम् उत्तरकालरूपञ्च) अवधीभ्यां रहितः संसर्गाभावः अत्यन्ताभावः उच्यते[251]। विश्वनाथः अत्यन्ताभावस्य लक्षणं प्रस्तौति यत् नित्यसंसर्गाभावः अत्यन्ताभावः कथ्यते[252]। अन्नम्भट्टस्य मतं वर्तते यत् त्रैकालिकसंसर्गेण अवच्छिन्नः प्रतियोगिताकः अभावः अत्यन्ताभावः भवति अर्थात् यस्य प्रतियोगी त्रिषु कालेषु केनापि सह संसृष्टो न भवति, स अत्यन्ताभावः उच्यते[253]। अत्र "त्रैकालिक" पदस्य प्रयोगः अत्यन्ताभावः प्रागभावात् प्रध्वंसाभावाच्च उभाभ्यां पृथक् सिद्ध्यति, एवं "संसर्गावच्छिन्न प्रतियोगिकत्वम्" इति अत्यन्ताभावः अन्योन्याभावात् व्यावृत्तः भवति[254]।

अभावोऽयं नित्याभावः वर्तते, यथा वायौ रूपस्य अभावः अथवा भूतद्रव्येषु चैतन्यस्य अभावादिः[255]। अर्थात् वायौ रूपस्य अभावः सर्वदा भवति तत्र रूपस्य उत्पत्तिः असम्भवा एव

---

246 "यथा एक एव ध्वंसो भावाभावनिषेधात्मा न भिद्यते तथात्रापि न्यायस्य तुल्यत्वात्"। न्या० ली०, पृ.सं.574

247 "यच्चान्यदसदतस्तदसत्"। वै० सू०,1/1/5

248 उप०, पृ.सं.472

249 "अत्यन्ताभावो यदसतः प्रतिषेध इति"। न्या० क०, पृ.सं.557

250 "अनादिरनन्तः संसर्गाभावोऽत्यन्ताभावः"। स० प०, पृ.सं.83

251 "उभयावधिरहितः संसर्गाभावोऽत्यन्ताभावः"। लक्षणा०, पृ.सं.26

252 "नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्"। न्या० सि० मु०, पृ.सं.73

253 "त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः"। त० सं०, पृ.सं.62

254 "भूतभविष्यवर्तमानवृत्तिरित्यर्थः"। वाक्यवृत्तिः (त० सं०, पृ.सं.365)

255 "अन्तमवधिमतिक्रान्तो नित्योऽभाव इति व्युत्पत्तिः। अतएवायमात्यन्तिकस्त्रैकालिक इत्यभिधीयते"। Athalye-Bodas,

अतः अत्र नित्यरूपेण अत्यन्ताभावः विद्यते। एवं भूतद्रव्येष्वपि चैतन्यस्याभावः त्रिषु कालेषु भवति अतः अत्रापि अत्यन्ताभावः नित्येन भवति। अनेन स्पष्टं भवति यत् अत्यन्ताभावः नित्याभावः भवति।

सामवायिकाभावोऽपि अत्यन्ताभाव एव वर्तते। न्यायसिद्धान्तमुक्तावल्यां तर्कदीपिकायाञ्च अस्मिन् विषये एका शंका उत्थापिता यत् "अस्मिन् भूतले घटो नास्ति" इत्यादिषु वाक्येषु व्यक्तं "भूतले घटाभावम्" अत्यन्ताभावः अथवा नित्याभावः कथं वदिष्यते, यतोहि तत्र घटस्य भावे सति एव अभावः समाप्यते अर्थात् स अत्यन्ताभावः तावत् पर्यन्तमेव वर्तते, यावत् पर्यन्तं तत्र घटस्य भावः न भवति। एतेभ्यः स्थलेभ्यः केचित् विद्वांसः उत्पाद-विनाशशीलः एकः चतुर्थप्रकारस्य संसर्गाभावः "सामयिकाभावः" स्वीकुर्वन्ति, यः सादिरपि स्यात् एवं सान्तरपि। किन्तु सिद्धान्तमतानुसारेण अस्मिन् क्लिष्टता इयमस्ति यत् भूतले घटं स्थापयित्वा तु स अभावः समाप्तः भविष्यति एवं ततः घटं निष्कासने पुनः तस्य अभावः भविष्यति, अनेन प्रकारेण अनेकं समवायिकाभावं स्वीकर्तव्यमिति। अतः अन्नम्भट्टस्य विचारोऽस्ति यत् इमं सामयिकाभावमपि अत्यन्ताभावस्य अन्तर्गते एव स्वीकरणीयम्, तथा यद्यपि भूतले घटस्य अभावः नित्य एव किन्तु कस्यचित् क्षणस्य कृते तत्र घटमानयने सति सः लुप्तः भवति। अतः इदमेव वक्तुं शक्यते यत् नित्ये सति घटस्य अत्यन्ताभावः तदैव प्रकटति यदा सः भूतले घटसंयोगस्य प्रागभावेन अथवा प्रध्वंसाभावेन सहचरितः भवति[256]।

अत्यन्ताभावस्य द्वौ भेदौ भवतः तर्कसंग्रहस्य सिद्धान्तचन्द्रोदयटीकायां अत्यन्ताभावस्य अपि भेदद्वयं निर्देशितः- "एकपर्याप्तधर्मावच्छिन्नप्रतियोगिताकः" अर्थात् एतादृशः अत्यन्ताभावः, यस्य प्रतियोगिधर्मः एकैव द्रव्ये विद्यते, यथा- घटत्वाभावः।

"अनेकपर्याप्तधर्मावच्छिन्नप्रतियोगिकः" अर्थात् स अत्यन्ताभावः, यस्य प्रतियोगी एकः एतादृशः धर्मः वर्तते यः समूहे अनेकवस्तुसु विद्यते, यथा- द्वित्वाभावः[257]। अयं विभाजनः अत्यन्ताभावस्य सम्पूर्णविभाजनः न भवितुमर्हति, यतोहि स्वयमेव तर्कदीपिकाकारः अपि कथयति यत् अन्योन्याभावः अत्यन्ताभावश्च अनयोः तावदेव भेदाः भवितुं शक्यते, यावत् प्रतियोगिनः संसर्गः अथवा तादात्म्यं भविष्यन्ति, यद्यपि प्रतियोगी एकः एव भविष्यति[258]। दीधितिकारः अपि इमं विचारं व्यक्तवान् येन स्पष्टः भवति यत् सः अपि अत्यन्ताभावस्य

---

Notes on T.S., p.365

256 "सामयिकाभावोऽत्यन्ताभाव एव समयविशेषे प्रतीयमानः"। त० दी०, पृ.सं.63

257 त० सं०, पृ.सं.366

258 त० दी०, पृ.सं.62-63

अन्योन्याभावस्य च बहुविधत्वं स्वीकरोति स्म[259]। अनेन प्रकारेण, न्यायकोशकारानुसारेण वक्तुं शक्यते यत् “प्रति संसर्गभेदादत्यन्ताभावबहुत्वम्” तथा “प्रतिधर्मभेदादन्योन्याभावबहुत्वम् इति योजना”[260]। उदाहरणाय देवदत्तस्य अत्यन्ताभावः दण्डी देवदत्तस्य अत्यन्ताभावात् तथा श्वेतघटस्य अन्योन्याभावः नीलघटस्य अन्योन्याभावात् पृथक् भविष्यति।

उपर्युक्तविवेचनेन स्पष्टोऽयं यत् अभावस्य त्रयः भेदाः “संसर्गाभावस्य” भेदाः सन्ति, “संसर्गः” तस्य सम्बन्धस्य नाम वर्तते येन किमपि वस्तु कस्मिंश्चित् अन्यवस्तुनि विद्यते। यथा घटः स्वाधिकरणे भूतले संयोगसम्बन्धेन विद्यते, गन्धः स्वाधिकरणे पृथिव्यां समवायसम्बन्धेन विद्यते, एतौ उभावेव सम्बन्धौ वृत्तिनियामकस्य “संसर्गस्य” नाम्ना ज्ञायते। प्रागभावः, प्रध्वंसाभावः अत्यन्ताभावश्च एतेषां त्रिप्रकारकाणां संसर्गाभावेषु संयोग-समवायादिभिः सम्बन्धैः प्रतियोगिनः विद्यमानस्य निषेधः भवति अर्थात् तेषां प्रतियोगिता संयोग-समवायादिभिः सम्बन्धैः अवच्छिन्ना भवति, अतः अत्र अत्यन्ताभावः “संसर्गावच्छिन्नप्रतियोगिताकः” सम्बन्धः उक्तः वर्तते।

## २.३.६.४ नञर्थे अन्योन्याभावविमर्शः-

वैशेषिकसूत्रकारः अन्योन्याभावस्य सिद्धिः अनेन प्रकारेण करोति- सत् (वर्तमानः) पदार्थोऽपि असत् (अवर्तमानः) भवति[261]। अर्थात् वर्तमानं घटादिद्रव्यमपि पटः नास्ति, अनेन प्रकारेण परस्परं विद्यमानमेव द्वयोः द्रव्ययोः यः परस्परः अभावः प्रतीयते, स अन्योन्याभावः उच्यते। शंकरमिश्रेण सूत्रस्यास्य विशदार्थः क्रियते- यदा सत् (विद्यमाने सति) घटादिद्रव्येषु असत् (नास्ति पटः) इति व्यवहारः क्रियते, तस्मिन् घटस्य पटस्य च तादात्म्यतायाः अभावः (भेदः) प्रतीयते यतोहि अश्वः गोरूपेण असत् वर्तते, पटः घटरूपेण असत्, पटः घटाद्भिन्नः वर्तते, गौः अश्वः नास्ति, अश्वः गौः नास्ति, इत्यादयः प्रतीतिः भवति। अनेन कारणेन अस्यां प्रतीतौ “गौः अश्वस्य अन्योन्याभाववती वर्तते”, घटः पटस्य अन्योन्याभाववान् वर्तते, अनेन प्रकारेण तादात्म्यरुपसम्बन्धेन युक्तः प्रतियोगिता सत्त्वात् यस्य अन्यनाम तादात्म्याभावः वर्तते, एतादृशः अन्योन्याभावः एव प्रकाश्यते। अनेनैव कारणेन अस्मिन् अन्योन्याभावे “तादात्म्यः” एव प्रतियोगितायाः नियामकः सम्बन्धः वर्तते[262]। न्यायकन्दल्यां गवि अश्वस्य अभावम् एवम् अश्वे गोः अभावमितरेतराभावः कथ्यते। सः समवायस्य इव स्वाश्रयेषु एक एव वर्तते एवं नित्य अपि

---

[259] किरणा० प्रका० दीधिति, पृ.सं.12-14

[260] न्या० कौ०, पृ.सं.45

[261] “सच्चासत्”। वै० सू० 1/1/4

[262] उप०, पृ.सं.471

वर्तते यतोहि आश्रयीभूतस्य एकवस्तुनः विनष्टे सत्यपि तादृशे अन्यवस्तुनि तस्य प्रभावः भवति[263]।

तादात्म्यस्य अभाव एव अन्योन्याभावः वर्तते शिवादित्यानुसारेण "तादात्म्यस्य निषेधः एव अन्योन्याभावः वर्तते"[264]। उदयनाचार्यस्य लक्षणावल्यां "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिकोऽभावमः" अन्योन्याभावः उक्तः, तथा लक्षणावल्याः प्रकाशव्याख्यायां "प्रतियोगितावच्छेदकस्य आरोपपूर्वकस्य प्रतीतविषयस्य अभावमः" अन्योन्याभावः कथितः[265]। वल्लभाचार्येण "तादात्म्यप्रतियोगिक अभाव एव अन्योन्याभावः वर्तते" इति लक्षणं कृतम्[266]। विश्वनाथकृतलक्षणमपि अस्यामेव पदावल्यां वर्तते[267]। अन्नम्भट्टेनापि इदमेव लक्षणं उक्तम् एवं तस्य उदाहरणं प्रदत्तं यत्- "घटः पटो न भवतीति"[268]।

उपर्युक्तलक्षणैः इदमेव स्पष्टं भवति यत् यस्य (अभावस्य) प्रतियोगिता तादात्म्यसम्बन्धेन अवच्छिन्ना वर्तते, एतादृशः अभावः अन्योन्याभावः कथ्यते। तात्पर्यमिदं वर्तते यत् अन्योन्याभावे द्वयोः वस्तुनोः परस्परं तादात्म्यस्य, एकतायाः, अथवा अभेदस्य निषेधः भवति, यथा- घटः पटः नास्ति। अत्र घटे पटस्य तादात्म्यस्य निषेधोऽस्ति अथवा घटे पटः तादात्म्यसम्बन्धेन न विद्यते। तादात्म्यस्य अर्थः वर्तते यत् तदात्म अथवा तत्स्वरूपं स्यात् एवं तत्स्वरूपम् अथवा घटस्वरूपं तु स्वयमेव घट एव भवितुमर्हति, किमपि अन्यवस्तु न, अर्थात् तादात्म्यसम्बन्धेन घटे घट एव विद्यते न किमपि अन्यवस्तु। अयमन्योन्याभावः अपि नित्यः भवति यतोहि द्वयोः वस्तुनोः मध्ये तादात्म्यस्य अभावः कदापि न समाप्यते।

### २.३.७ अत्यन्ताभाव-अन्योन्याभावयोः भेदविचारः-

कन्दलीकारः स्थलेऽस्मिन् पूर्वपक्षतः आक्षेपः कृतवान् यत् "अत्यन्ताभावः इतरेतराभावात् भिन्नं किमपि वस्तु नास्ति"। अस्य निराकरणं क्रियमाणः श्रीधराचार्यस्य कथनमस्ति यत् एतत् तु राजमार्गे एव भ्रमवत् स्पष्टतः विरोधप्रतीतिः वर्तते, यतोहि यत्र प्रतियोगिनः अनुयोगिनश्च उभयोः सत्ता विद्यते किन्तु परस्परम् एकस्य तादात्म्यस्य अन्ये निषेधः क्रियते, तत्र इतरेतराभावः मन्यते, एवं कस्मिंश्चित् सिद्धाश्रये सर्वथा अविद्यमानः, केवलं बुद्धौ आरोपितस्य वस्तुनः कस्मिंश्चित्

---

263 "गव्यश्वाभावोऽश्वे च गोरभाव इतरेतराभावः। स च सर्वत्रैको नित्य एव पिण्डविनाशेऽपि सामान्यवत् पिण्डान्तरं प्रत्यभिज्ञानात्"। न्या० क०, पृ.सं.557

264 "तादात्म्यनिषेधोऽन्योन्याभावः"। स० प०, पृ.सं.87

265 "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः"। लक्षणा० प्र० व्या०, पृ.सं.26-27

266 न्या० ली०, पृ.सं.576

267 "अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिकाभावत्वम्"। न्या० सि० मु०, पृ.सं.72

268 "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः यथा घटः पटो न भवतीति"। त० सं०, पृ.सं.62

आश्रये अयं कदापि अस्मिन् प्रदेशे नास्ति अस्य प्रकारस्य प्रतिषेध एव अत्यन्ताभावः वर्तते, यथा- द्रव्यादिषड्पदार्थेभ्यः अतिरिक्तं किमपि वस्तु नास्ति[269]।

तात्पर्यमिदं वर्तते यत् अन्योन्याभावः अत्यन्ताभावात् पृथक् प्रकारस्य सम्बन्धे आश्रितः भवति, अत अयं निश्चितरूपेण तस्माद्भिन्नः वर्तते। अन्योन्याभावे एकवस्तु अन्ये तादात्म्यसम्बन्धेन विद्यमानस्य अभावस्य प्रतियोगी भवति, किन्तु अत्यन्ताभावे संयोगेन अथवा समवायसम्बन्धेन विद्यमानस्य अभावस्य प्रतियोगी भवति। स्पष्टरुपेण वक्तुं शक्नुमः यत् अत्यन्ताभावे तु वयं प्रतियोगिनः अनुयोगिनश्च (अधिकरणस्य) मध्ये कस्यापि प्रकारस्य सम्बन्धस्य निषेधः कुर्मः एवमन्योन्याभावे वयम् उभयोः केवलं परस्परं तादात्म्यस्य निषेधः कुर्मः। उदाहरणाय "भूतलः घटः नास्ति" अस्मिन् उभयोः तादात्म्यस्य निषेधः कृतः, किन्तु "भूतले घटः नास्ति" अस्मिन् केवलं उभयोः तादात्म्यस्यैव न अपितु कस्यापि प्रकारस्य सम्बन्धस्य निषेधः कृतोऽस्ति।

संक्षेपतः अत्यन्ताभावः द्वयोः वस्तुनोः मध्ये संसर्गस्य निषेधः वर्तते, किन्तु अन्योन्याभावः तयोः तादात्म्यस्य। यद्यपि मूलतः अभावस्य स्वरूपे अन्तरं नास्ति, अभावः अभावः एव वर्तते, अर्थात् "पटे घटत्वं नास्ति" अथवा "पटः घटो न" उभयोः वाक्ययोः अभिप्रायः सदृश एव वर्तते, तथापि निषेधस्य प्रकारेण अभावस्य नामपरिवर्तनं भवति, तया दृष्ट्या प्रथमवाक्यं अत्यन्ताभावस्य उदाहरणं वर्तते, द्वितीयवाक्यञ्च अन्योन्याभावस्य। इदमेव उभयोर्मध्ये अन्तरं वर्तते।

पदार्थतत्त्वनिरूपणकारेण कस्याश्चित् जटिलाभावपद्धतीनां चर्चा कृता, येषु एकः अन्योन्याभावेन सम्बद्धः वर्तते। सः वदति यत् अन्योन्याभावस्य अन्योन्याभावः तु भावत्व एव वर्तते, यतोहि अतिरिक्तान्योन्याभावं स्वीकृते सति तु अनवस्थादोषस्य प्रसंगः भविष्यति[270]। उदाहरणार्थे जले अग्नेः अन्योन्याभावस्य अन्योन्याभावस्तु सद्भाववदेव भविष्यति, अतः तस्यानुसारेण अन्योन्याभावः अस्त्येव न। अस्य विपरीतम्, धीरेन्द्रशर्मणः मतं वर्तते यत् अत्र "संसर्गाभावत्वं च" पदमिदं शेषं वर्तते, यतोहि रघुनाथस्य परवर्ती वेणीदत्तस्य ग्रन्थे रघुनाथस्य मतस्य स्वीकृत्यवसरे एते पदे अपि दृश्येते। तदनुसारेण अस्य पङ्क्तेः अभिप्रायो भविष्यति यत् अन्योन्याभावस्य अन्योन्याभावः तु भावत्वं संसर्गाभावत्वमेव वर्तते, यतोहि

---

[269] "इतरेतराभाव एवात्यन्ताभाव इति चेत्? अहो राजमार्ग एव भ्रमः इतरेतराभावो हि स्वरूपसिद्धयोरेव गवाश्वयोरितरेतरात्मप्रतिषेधः। अत्यन्ताभावे तु सर्वथा असद्भूतस्यैव बुद्ध्यावारोपितस्य देशकालानवच्छिन्नः प्रतिषेधः। यथा षड्पदार्थेभ्यो नान्यत्प्रमेयमस्तीति"। न्या० कं०, पृ.सं.557-558

[270] "अन्योन्याभावस्यान्योन्याभावो भावत्वम्, अतिरिक्तान्योन्याभावाङ्गीकारेऽनवस्थाप्रसङ्गात्"। प० त० नि०, पृ.सं.68

अतिरिक्तान्योन्याभावस्य स्वीकारे अनवस्था भविष्यति। तात्पर्यमिदमभवत् यत् अन्योन्याभावस्य अन्योन्याभावः “भावत्वम्” “अभावत्वम्” च उभयोः तुल्यमेव वर्तते।

पदार्थमण्डनकारेण प्रसङ्गोऽयम् अनेन प्रकारेण स्पष्टः कृतः यत् अन्योन्याभावस्य अन्योन्याभावः तु भावत्वमेव वर्तते अथवा संसर्गाभावत्वम्। यतोहि अतिरिक्तान्योन्याभावं स्वीकृते तु अनवस्था दोष एव भविष्यति। अस्य आधारोऽयं वर्तते यत् अन्योन्याभावः अन्योन्याभावत्वात् पृथक् एव भवति। घटादेः अन्योन्याभावस्य अन्योन्याभावः भावत्व एव भवति, संसर्गाभावत्वं घटादेः अन्योन्याभावत्वमेव वर्तते[271]।

वेणीदत्तः अस्मिन् स्थले केषाञ्चित् विदुषां मतमिदमपि उद्धृतवान् यत् अन्योन्याभावस्य अन्योन्याभावः अपि अतिरिक्त एव भवति, एवम् अस्मिन् अनवस्था दोषोऽपि नास्ति, प्रामाणिकत्वात् स अदोष एव वर्तते, अन्यथा तु अन्योन्याभावमात्रस्य अतिरिक्तत्वस्य एव लोपः भविष्यति। सर्वत्र स अधिकरणे विद्यमानधर्मस्य रूपे एव कल्प्यते[272]।

---

271 “अन्योन्याभावस्य वा भावत्वं संसर्गाभावत्वं चान्योन्याभावः, अतिरिक्तान्योन्याभावाङ्गीकारेऽनवस्थाप्रसङ्गात्। इदं चान्योन्याभावत्वावच्छिन्नस्यान्योन्याभावमवलम्ब्योक्तम्। घटाद्यन्योन्याभावस्य तु अन्योन्याभावो भावत्वं, संसर्गाभावत्वं घटाद्यन्योन्याभावत्वं चेत्यपि बोध्यम्”। प० मं०, पृ.सं.27-28

272 “केचित्तु अन्योन्याभावस्याप्यन्योन्याभावोऽतिरिक्त एव। न चैवमनवस्था, प्रामाणिकत्वेनादोषत्वात्। अन्यथा अन्योन्याभावमात्रस्येवातिरिक्तत्वविलोपप्रसंगात्। सर्वत्र तदधिकरणमात्रवृत्तिधर्म एव तत्स्वरूपत्वकल्पनासम्भवादिति वदन्ति”। प० मं०,पृ.सं.28

## ॥ तृतीयोऽध्यायः ॥

## ३. ॥ निषेधवाक्यार्थविचारः ॥

वैदिकवचनानां चतुर्थो भागः निषेधो वर्तते। निषेधवाक्यैः[273] मनुष्याः अवाञ्छितफलस्य उत्पादयितेभ्यः कर्मभ्यः स्वं रक्षयन्ति। यथा विधिवाक्यानि पुरुषान् प्रेरयन्ति, यथा- कश्चित् यागः कस्यचित् वाञ्छितफलस्य प्राप्तेः साधनं वर्तते, एतदर्थं विधिः मनुष्यं तस्य यागस्य सम्पादनाय प्रेरयति। तथैव निषेधवाक्यमपि "न कलञ्जं भक्षयेत्" अथवा "मिथ्या न वक्तव्यम्"[274] एतादृशानि निषेधवाक्यानि मनुष्यं प्रतिकारं प्रति सङ्केतयन्ति, एवं निर्देशयन्ति यत् निषेधवाक्यार्थेन अवाञ्छितफलस्य प्राप्तिः भवति अतः मनुष्याः अनिष्टसाधनकर्मभ्यः दूरं स्युः।

अत एव वैदिकवाङ्मये लौकिकवाङ्मये च निषेधस्य अत्यधिकमहत्त्वं वर्तते। वैदिकवाङ्मये तु निषिद्धकर्मभ्यः पुरुषं निषेधवाक्यमेव निवर्तयति, लौकिकव्यवहारेऽपि निषेधवाक्यस्य प्रयोगः क्रियते। यदि निषेधवाक्यानि न भवन्ति चेत् मनुष्याः बहूनि पापकर्माणि कुर्वन्तः अनिष्टफलस्य भोक्तारः भवन्ति, अतः मनुष्याः अनिष्टफलस्य भोक्तारः न स्युः, एतदर्थं मीमांसायां निषेधप्रकरणे निषेधवाक्यानां विषये सम्यक्तया प्रतिपादितम्। निषेधवाक्यस्य बोधः "न" इत्यनेन भवति, "न" कस्यापि क्रियायाः, संज्ञायाः, विशेषणस्य च पूर्वे भवितुमर्हति। कस्मिंश्चित् उदाहरणे नस्य "अ" अपि भवति, यथा "अब्राह्मणः", अधर्मश्च इत्यादयः। अथवा यत्र कुत्रापि यदा नञ् कस्यापि अजादिशब्दस्य आदौ प्रयुज्यते तदा नकारस्य अन् अपि भवति, यथा- अनर्थः, अनुष्णः इत्यादयः अनयोरर्थः भवति यत् न अर्थः इति अनर्थः, न उष्णः इति अनुष्णः इत्यादयः। पाणिनिना नस्योपरि सूत्राणि लिखितानि, एवं स्पष्टरूपेण प्रतिषेधं नस्य अर्थे प्रयुक्तवान् आचार्यः पणिनिः। यथा- "नञ्"[275] अस्य सूत्रस्य स्पष्टार्थः यत् नञ् समर्थेन सुबन्तेन सह समस्यते, एवं तत्पुरुषः समासो भवतीति। अथ "नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः"[276] सूत्रेऽस्मिन्नपि पणिनिना स्पष्टरूपेण नञः विषययुक्तमस्ति।

यदा नञः प्रयोगः कस्मिन्नपि वाक्ये भवति तदा तस्य नञः प्रतिषेधः अथवा पर्युदासार्थः भवति। तर्हि अस्य ज्ञानमावश्यकं भवति यत् कुत्र नञ् प्रतिषेधार्थे, कुत्र पर्युदासार्थे भवतीति।

---

[273] "अनर्थहेतुकर्मणः सकाशात्पुरुषस्य निवृत्तिकरत्वेन निषेधानां पुरुषार्थानुबन्धित्वम्"। मी० न्या० प्र०, पृ.सं.248-249

[274] तै० सं० 2/5/6

[275] पा० सू० अ०, 2/2/6

[276] पा० सू० अ०, 6/2/115

यतोहि यदि अस्यैव ज्ञानं न भविष्यति तर्हि तस्य निषेधवाक्यस्य स्पष्टार्थः न अवगन्तुं शक्यते। अत एव अस्य ज्ञानम् अवश्यमेव भवितव्यम्। अस्य ज्ञानं निम्नलिखितविवेचनेन भवितुमर्हति-

## ३.१ प्रतिषेधार्थे निषेधवाक्यविचारः-

सर्वप्रथमं ज्ञानमिदमावश्यकं यत् यानि निषेधवाक्यानि सन्ति तानि कथं निवर्तनायाः प्रतिपादकानि भवन्ति? यतोहि "न भक्षयेत्" (न कलञ्जं भक्षयेत्), "न हन्तव्यः" (न ब्राह्मणो हन्तव्यः) अनयोः वाक्ययोः नञः धातोश्च अव्यवधानत्वात् नञर्थस्य अभावस्य धात्वर्थेन (भक्षणेन, हननेन च) अन्वयः भवति, अस्य फलस्वरूपे एतादृशानि सर्वाणि वाक्यानि धात्वर्थस्य वर्जने (धात्वर्थवर्जनप्रवृत्तौ) प्रतीयन्ते। अत एव यथा "यजेत" इत्यादिविधिस्थलेषु वक्यस्य अर्थः यागकर्तव्यता (यागानुष्ठानं पुरुषस्य कर्तव्यम्) भवति, तथैव निषेधवाक्यस्थलेषु तस्य (निषेधवाक्यश्रुतस्य) प्रत्येकधात्वर्थस्य वर्जनस्य कर्तव्यमिति वाक्यार्थः भवति, न तु निवृत्तिरर्थः। तर्हि कथं निषेधवाक्येन निवृत्तिरर्थः प्रतिपाद्यते अस्य समाधानं प्रस्तौति यत् अत्र नञर्थस्य धात्वर्थेन अन्वयस्य कोऽपि अवसर एव नास्ति, यतोहि धात्वर्थः सर्वदा तिङन्तपदगतस्य प्रत्ययार्थस्य उपसर्जनं भूत्वा उपस्थीयते। लिङर्थस्य उपसर्जनभूतधात्वर्थस्य अन्वयः नञर्थेन एतदर्थं न भवति यतोहि नियमः अस्ति यत् कस्यचित् उपसर्जनभूतार्थः नान्येन अन्वितः भवितुमर्हति[277], यथा "राजपुरुषम् आनय" अत्र राजा उपसर्जनं वर्तते पुरुषं प्रति अतः आनयन क्रियया सह राज्ञः अन्वयः न भवति।

अनेनैव प्रकारेण नञर्थस्य अपि केनचिदुपसर्जनभूतपदार्थेन अन्वयः न भवितुमर्हति। उदाहरणार्थे "अरुणया पिङ्गाक्ष्यैकहान्या सोमं क्रीणाति" वाक्येऽस्मिन् "एकहायनी" अस्य "आरुण्य" अनेन सह अन्वयः न भवति यतोहि "एकहायनी" इति प्रकृतेरर्थः वर्तते। एवं "आरुण्य" इति प्रत्ययार्थस्य कारकस्य उपसर्जनं वर्तते, एतदर्थं "एकहायनी" अस्य अन्वयः उपसर्जनीभूतेन आरुण्येन सह न भवितुं शक्यते।

अतः स्पष्टं भवति यत् "न कलञ्जं भक्षयेत्" अस्मिन् वाक्ये नञर्थस्य अन्वयः धात्वर्थेन न भवति, एवं नञर्थस्य अन्वयः कलञ्जादिपदार्थेन अपि न भवितुमर्हति यतोहि कलञ्जकारकः (कलञ्जम्=कलञ्ज+अम्) अत्र "अम्" प्रत्ययबोध्यस्य कर्मकारकस्य उपसर्जनं वर्तते अतः तस्य अन्वयः भिन्नपदार्थेन (नञा) न भविष्यति। यथा- "एकहायनी" अस्य करणकारकस्य

---

[277] "नह्यन्योपसर्जनमन्येनान्वेति"। मी० न्या० प्र०, पृ.सं.413

(एकहान्या=एकहायनी+टा) उपसर्जनं वर्तते, अतः तस्य अन्वयः भिन्नपदार्थेन (आरुण्येन) न भविष्यतीति[278]।

अत्र पुनः शंका जायते यत् यदि नञर्थस्य अन्वयः न धात्वर्थेन, एवं नैव कलञ्जादिपदार्थेन भवति (यतोहि एते अर्थाः कस्यचित् उपसर्जनीभूताः) तर्हि केन सह नञर्थस्य अन्वयः भविष्यति? अस्य प्रश्नस्य उत्तरं प्रस्तौति यत् नञर्थस्य अन्वयः प्रत्ययार्थेन स्वीकर्तव्यः यतोहि सः प्रत्ययार्थः सर्वापेक्षया (धात्वर्थापेक्षया, कलञ्जादिपदार्थापेक्षया च) प्रधानः भवति। यथा आरुण्यादेः अन्वयः क्रयभावनया एतदर्थं भवति यत् क्रयभावना प्रत्ययार्थत्वात् प्रधाना भवति[279]। किन्त्वत्र ध्यातव्यं यत् प्रत्यये अंशद्वयं भवति "आख्यातत्वम्" "लिङ्गम्" च अनयोरुभयोः अर्थः भावना एव भवति। प्रत्ययस्य आख्यातत्वांशस्य अर्थः "आर्थीभावना" भवति तथा लिङ्गस्य अंशस्य अर्थः "शाब्दीभावना" भवति[280]। इयमेव शाब्दीभावना प्रवर्तनादिसंज्ञया अभिहिता भवति। आर्थीभावना शाब्दीभावनायाः (प्रवर्तनायाः) उपसर्जनं भवति। अतः अत्र नञर्थस्य अन्वयः आर्थीभावनया न अपितु सर्वापेक्षया प्रधानभूतशाब्दी-भावनया (प्रवर्तनया) भवति। अर्थात् लिङ्गांशेन नञ् सम्बध्यते।

नञः स्वभावो भवति यत् नञ् येन सह अन्वितः भवति तस्य प्रतिपक्षस्य बोधं कारयति, यथा "नास्ति" अत्र नञः सम्बन्धः 'अस्ति' इत्यनेन सह वर्तते। अस्ति पदस्य अर्थः सत्ता वर्तते अतः "न अस्ति" वाक्यस्यास्य अर्थः असत्त्वः भवति। अतः नञः लिङ्गेन (प्रत्ययांशेन) अन्वये सति निवर्तना अर्थः बोध्यते यतोहि 'लिङ्' अस्य अर्थः वर्तते प्रवर्तना, एवं नञर्थस्य योगेन प्रवर्तनायाः विरोधी निवर्तना एव अर्थः ज्ञायते। अभिप्रायोऽयं वर्तते यत् "न कलञ्जं भक्षयेत्" अस्मिन् निषेधवाक्ये 'नञ्' निवर्तना अर्थस्य बोधको भवति।

यथा "यजेत स्वर्गकामः" इत्यादिविधिवाक्यं श्रुते सति श्रोतापुरुषं "इदं विधिवाक्यं मां यागे प्रवर्त्तयति" अस्याः प्रवर्तनायाः (प्रवृत्त्यनुकूलव्यापरस्य) प्रतीतिः भवति। तथैव "न कलञ्जं भक्षयेत्" इत्यादिनिषेधवाक्यं श्रुते सति "वाक्यमिदं मां कलञ्जभक्षणात् निवर्तयति" अस्याः निवर्तनायाः (निवर्त्त्यनुकूलव्यापारस्य) प्रतीतिः भवति। अतः सिद्धोऽयं यत् अत्र निषेधवाक्यस्य वाक्यार्थः निवर्तना एव भवति। अनेन प्रकारेण अत्र निषेधेन "कलञ्जः अनिष्टस्य साधनं भवति" इति ज्ञानं भवति (बोधस्य विषयः प्रमेयः भवति- अनिष्टसाधनत्वम्)। इति स्वीकृते कापि

---

[278] "एकहायन्याः करणत्वोपसर्जनीभूताया यथा न भिन्नपदोपात्तेनारुण्येनान्वयः एवं प्रत्ययार्थोपसर्जनीभूतानां कलञ्जादीनां नञर्थेनान्वयो न सम्भवतीत्यर्थः", सारविवेचिनी, पृ.सं.158

[279] "आरुण्यस्यापि क्रयाङ्गत्वं तृतीयाश्रुत्या",मी० न्या० प्र०, पृ.सं.128, एवं "...प्रधानस्यानेकविशेषणसंग्राहकत्वादारुण्यादिविशिष्टक्रयविधान इव..." तत्रैव, पृ.सं.386

[280] "तत्सिद्धं यजेतेत्यत्र लिङ्गांशेन शाब्दी भावनोच्यते इति" तत्रैव, पृ.सं.415

विप्रतिपत्तिः न भवेदिति। अनेन विवेचनेन निष्कर्षोऽयं प्राप्यते यत् "न कलञ्जं भक्षयेत्" अस्मिन् निषेधवाक्ये सर्वप्रकारेण नञर्थस्य अन्वयः प्रत्ययार्थेन भवति यतोहि प्रत्ययार्थः सर्वापेक्षया प्रधानः भवति।

अनेन विवेचनेन स्पष्टीभवति यत् "न कलञ्जं भक्षयेत्" अस्मिन् निषेधवाक्ये प्रयुक्तः 'नञ्' प्रतिषेधार्थे वर्तते, यतोहि नञ् अनेकार्थेषु भवति, किन्तु अस्मिन् निषेधवाक्ये कलञ्जभक्षणस्य प्रतिषेधः विधीयते येन स्पष्टं भवति यत् अत्र नञ् प्रतिषेधार्थे एव वर्तते न तु अन्यार्थे इति।

## ३.२ पर्युदासार्थे निषेधवाक्यविचारः-

यदा नञर्थस्य प्रत्ययार्थेन अन्वये बाधा भवति तदा अगत्या धात्वर्थेन अन्वयः मन्यते। अस्मिन् स्थितौ पर्युदासस्य आश्रयः गृह्यते। पर्युदासेन कथं निषेधवाक्ये अर्थबोधो भवति अस्य ज्ञानात् पूर्वं पर्युदासस्य किं स्वरूपं वर्तते अस्य विवेचनं करणीयमिति। पर्युदासस्य लक्षणं क्रियते यत् यत्र उत्तरपदेन (क्रियावाचकात् भावनावाचकत्वात् प्रत्ययादतिरिक्तेन शब्दधातुभ्यां कलञ्जादिसंज्ञाशब्देन च) नञः अन्वयः स्यात्। अर्थात् यदा प्रत्ययार्थेन नञर्थस्य अन्वयः न भूत्वा धात्वर्थेन कलञ्जादिनामार्थेन च अन्वयः स्यात्, तदा पर्युदासार्थे नञ् भवति[281]।

### ३.२.१ धात्वर्थेन नञर्थस्य अन्वयविचारः-

"नेक्षेतोद्यन्तमादित्यम्" अस्य निषेधवाक्यस्य अर्थो भवति यत् उदन्तं सूर्यं न पश्येत्। अस्मिन् वाक्ये पर्युदासस्य आश्रयः गृह्यते, यतोहि यदि अत्र नञर्थस्य अन्वयः प्रत्ययार्थेन भवति तर्हि अत्र बाधको "तस्य व्रतम्" इति भवति। अस्य स्पष्टीकरणमनेन प्रकारेण भवति यत् अत्र व्रत शब्दः कर्तव्यार्थे रूढः वर्तते, एवं "तस्य व्रतम्" अनेन स्नातकस्य कर्तव्यविधानस्य प्रारम्भः कृतोऽस्ति। तर्हि आकाङ्क्षा भवति यत् तत् किं कर्तव्यं वर्तते? अस्य निवारणं "नेक्षेतोद्यन्तमादित्यम्" अनेन निषेधवाक्येन भवति, तथा अनेन वाक्येन कर्तव्यार्थस्य एव प्रतिपादनं भवेत्, अन्यथा "तस्य व्रतम्" एवं "नेक्षेतोद्यन्तमादित्यम्" अनयोः द्वयोः वाक्ययोः एकवाक्यता न भवितुमर्हति। अत एव कर्तव्यार्थस्य अबोधत्वात् नञर्थेन प्रत्ययार्थस्य अन्वयः न भविष्यति। नञर्थेन प्रत्ययार्थस्य अन्वये सति प्रवर्तनायाः विरोधिन्याः निवर्तनायाः एव ज्ञानं भवति, तथा निवर्तनायां कर्तव्यतायाः अभावः विद्यते, एतदर्थं "नेक्षेतोद्यन्तमादित्यम्" अस्मिन्

[281] "नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः। वदत्यब्राह्मणाधर्मावन्यमात्रविरौधिनौ॥", मी० न्या० प्र०, पृ.सं.419

स्थले लक्षणया नञः अर्थः धात्वर्थस्य विरोधी अनीक्षणसङ्कल्पः गृह्यते, यतोहि अनीक्षणसङ्कल्पः कर्तव्यस्य कोट्यां भवति अर्थात् अनीक्षणस्य सङ्कल्पः कर्तुं शक्यते।

यत्र कर्तव्यविषयाणां विवेचनं व्रतादिशब्दानामुल्लेखेन प्रारम्भः क्रियते[282] एवं तेषामेव कर्तव्यानां बोधकवाक्येषु नञः प्रयोगः क्रियते, तत्र नञर्थस्य अन्वयः प्रत्ययार्थेन न भवति। यथा अस्मिन्नेव उदाहरणे "नेक्षेतोद्यन्तमादित्यम्" दृश्यते अस्य वाक्यार्थसमये नञर्थेन (नेक्षेतगतस्य) "त" प्रत्ययार्थस्य अन्वयः न क्रियते। कारणमस्ति यत् 'नेक्षेतोद्यन्तमादित्यम्' अस्य वाक्यस्य प्रयोगः "व्रत"[283] (कर्तव्यस्य) प्रसङ्गे कृतः वर्तते।

अत्र प्रश्नो भवति यत् यदि नञर्थस्य अन्वयः प्रत्ययार्थेन न भवति तर्हि केन सह भविष्यति? अस्य समाधानं क्रियते यत् धात्वर्थस्य अन्वयः नञर्थेन भवति अर्थात् नञर्थेन "ईक्ष्" धातोरर्थस्य अन्वयः विवक्षितः। नञः अर्थः विरोधी वर्तते तथा ईक्ष् धातोरर्थः ईक्षणम् अर्थात् दर्शनमस्ति। तदा नञर्थस्य धात्वर्थस्य च अन्वितः अर्थः "ईक्षणविरोधी" अर्थात् दर्शनविरोधी जायते, किन्त्वत्र समस्या भवति यत् ईक्षणविरोधिना कः पदार्थः ग्रहीष्यते? मीमांसकाः अत्र लक्षणया धात्वर्थविरोधिरूपे "अनीक्षणसङ्कल्पम्" गृह्णन्ति। अस्य कारणं वर्तते यत् धात्वर्थविरोधी पदार्थः एतादृशः स्यात्, यः कर्तव्यरूपे भवितुमर्हति। सङ्कल्पः भावात्मकमानसकर्म भवति। अनेन प्रकारेण "अनीक्षणसङ्कल्पः" कर्तव्यस्य रूपे भवितुमर्हति। अनीक्षणसङ्कल्पस्य मानसकर्मणि सति "नेक्षेतोद्यन्तमादित्यम्" अस्य वाक्यस्य मीमांसासम्मतः वाक्यार्थः भवति यत् "आदित्यविषयकानीक्षणसङ्कल्पेन भावयेत्" अनेन अवबोध्यते यत् अर्थबोधवाक्यं विधिरूपे अथवा कर्तव्यरूपे परिणतः भवति।

उपर्युक्तविवेचनेन ज्ञायते यत् "नेक्षेतोद्यन्तमादित्यम्" अस्मिन् निषेधवाक्ये नञ् पर्युदासार्थे वर्तते। यतोहि यदि अत्र पर्युदासार्थे नञर्थं न मन्यते तर्हि अत्र प्रत्ययार्थेन नञर्थस्य अन्वये सति निवर्तना अर्थः प्राप्यते, यस्य "तस्य व्रतम्" अनेन वाक्येन सह एकवाक्यता न स्यात्। यतोहि व्रतशब्दः प्रवर्तनार्थं बोधयति। अत एव "नेक्षेतोद्यन्तमादित्यम्" अस्य वाक्यस्य प्रवर्तनार्थः स्यात् एतदर्थं वाक्येऽस्मिन् नञः धात्वर्थेन अन्वये सति प्रवर्तनार्थं गृह्यते न निवर्तनार्थम्। एवं यत्र नञर्थस्य अन्वयः धात्वर्थेन भवति तत्र पर्युदासार्थे नञ् भवतीति स्पष्टम्।

---

[282] "यत्रोपक्रमेऽनुष्ठेयपदार्थवाचको व्रतशब्दो दृश्यते"। सारविवेचिनी, पृ.सं.139

[283] "अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः। स्वर्गायुष्ययशस्यानि व्रतानीमानि धारयेत्॥" मनुस्मृति-4/13

### ३.२.२ नामार्थेन नञर्थस्य अन्वयविचारः-

यदा नामार्थेन नञर्थस्य अन्वयः भवति तदा अपि नञ् पर्युदासार्थे एव भवति। पर्युदासार्थेऽपि नञ् षड्प्रकारकेषु अर्थेषु प्रयुक्तो भवति[284]। नञः सामान्यार्थः अभावः वर्तते। परमयमर्थः सर्वेषां विषयाणामनुकूलो न भवति यतोहि यदा कोऽपि वदति यत् "अब्राह्मणमानय" वाक्येऽस्मिन् नस्य अर्थः अभावः न भवति, यतोहि यदि अत्र अभावार्थः भवति चेत् कोऽपि अभाववन्तं ब्राह्मणं न आनयितुं शक्नोति। अतः कमपि न आनयितुं शक्यते। एतदर्थम् इदं वाक्यं श्रुत्वा यः ब्राह्मणः नास्ति किन्तु ब्राह्मणसदृशोऽस्ति क्षत्रियादिः तस्य आनयनं भविष्यति। अत एव अस्मिन् उदाहरणे "अब्राह्मण" अस्मिन् शब्दे प्रयुक्तस्य नस्य अर्थः सादृश्यः वर्तते, अर्थात् अब्राह्मणः अस्य अर्थः सः व्यक्तिः वर्तते यः ब्राह्मणातिरिक्तः अन्यः अस्ति। अस्मिन् विषये सम्यक्तया विचारः क्रियते यत् कथं "अब्राह्मणः" अस्य अर्थः क्षत्रियादयः भवति। अत एव अत्र कथं अब्राह्मणशब्देन क्षत्रियाद्यर्थः भवति विषयेऽस्मिन् विचारः क्रियते-

### ३.२.२.१ अब्राह्मणशब्दस्य निषेधविचारः-

अत्र ब्राह्मणशब्दे नस्य प्रयोगः कृतः, यस्य सामान्यार्थः अभावः वर्तते, तर्हि अत्र शंका भवति यत् अभावः बुद्धेः भावविषयं कथं भविष्यति, कारणमस्ति यत् अभावः भावात् विपरीतः वर्तते। श्लोकवार्तिके अस्य समाधानं कृतं यत् सर्वाणि वस्तूनि स्वरूपेण सत् अन्यरूपेण असत् भवन्ति। अतः पयसः सत्ता एव पयसः उत्पत्त्यादिक्रिया वर्तते। सा एव सत्ता पयनाशात् पूर्वं ताभिः क्रियाभिः युक्ता प्रतीयते एवं सा एव सत्ता दध्यादेः अपोहेन युक्त्या अभावबुद्ध्या गृह्यते। अनेन प्रकारेण सामान्याभावस्य बुद्धेः सत्तारूपविषयः सिद्ध्यते। अत एव अभावविशेषबुद्धेः[285] अपि सत्ता एव विषयोऽस्ति।

क्षत्रिये[286], वैश्ये, शूद्रे च त्रिष्वेव अब्राह्मणशब्दस्य प्रयोगः भवति, अत्र शंका भवति यत् यदि अब्राह्मणत्वभावरूपार्थः गृह्यते चेत् तत्तु त्रिषु एव न वर्तते। एवं यदि पुरुषत्वम् उक्तबुद्धेः विषयः स्वीकृते ब्राह्मणेऽपि पुरुषत्वस्य विद्यमानत्वात् ब्राह्मणेऽपि "अब्राह्मणः" प्रयोगोऽयं भविष्यति। अतः अब्राह्मणः अस्य बुद्धेः अभाव एव विषयः स्वीकर्तव्य इति। अत एव अब्राह्मणः अस्य बुद्धेः ब्राह्मणाभावः एव सामान्यः भविष्यति एवं स अवस्तुरूपसामान्यः वर्तते, न तु

---

284 "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥" मी० न्या० प्र०, भट्टालंकारनाम्नि टिकायामुद्धृतः, पृ.सं.430

285 "अनित्यत्वं विनाशाख्यक्रियासामान्यमुच्यते।" श्लो० वा०, अपो०, श्लो. सं.13

286 "...अब्राह्मणत्वं किन्तु स्याद्भिन्नेषु क्षत्त्रियादिषु॥ पुरुषत्वं चतुःसंस्थं विशेषेषु च नास्तिधीः।
सामान्यप्रत्ययश्चैषु प्रत्येकमुपजायते॥ तेनात्र ब्राह्मणाभावः सामान्यं स्यादवस्तु तत्।..." श्लो० वा०, अपो०, श्लो.सं.13-15

वस्तुरूपसामान्यः। अस्याः शंकायाः समाधानमुत्तरपक्षेण क्रियते यत् केचित् पुरुषाः अनेकार्थस्य बोधकः अक्षशब्दवत् अब्राह्मणशब्दमपि अनेकार्थकं मत्वा भावरूपसामान्यं विषयः सिद्धं कुर्वन्ति। यथा एक एव अक्षशब्दः विभीतकाक्षस्य, देवनाक्षस्य, इन्द्रियाक्षस्य च बोधको भवति तथैव एकैव अब्राह्मणशब्दः क्षत्रियत्वस्य, वैश्यत्वस्य, शूद्रत्वरूपसामान्यस्य च बोधको भवति। अतः अब्राह्मणः अस्य बुद्धेरपि क्षत्रियत्वः, वैश्यत्वः, शूद्रत्वरूपभावश्च एव विषयाः वर्तन्ते, अभावः विषयः न भवितुमर्हति। अनेन प्रकारेण सर्वत्र भावरूपैव सामान्यविषयः भविष्यति न तु अभावरूपसामान्यविषयः[287]।

अत एव सिद्धान्तरूपे अब्राह्मणः अस्य बुद्धेः क्षत्रियादिषु त्रिषु विद्यमानः भावरूपपुरुषत्व एव विषयः वर्तते। यथा ब्राह्मणे, क्षत्रिये, वैश्ये, शूद्रे च चतुर्षु विद्यमानं पुरुषत्वं सुरामनयने "पुरुषमानय" अनेन वाक्येन शूद्रे प्रतीयते तथैव अब्राह्मणः प्रयोगेऽस्मिन् नकारस्य सामर्थ्येन ब्राह्मणेषु अविद्यमानः, एवं क्षत्रियादिषु त्रिषु विद्यमानं पुरुषत्वमेव विषयः भविष्यति। अतः पुरुषत्वभावरूपसामान्य एव उक्तप्रयोगस्य विषयः भविष्यति, न त्वभावरूपसामान्यः।

किन्तु यदि नकारस्य विद्यमाने सत्यपि पुरुषत्व एव प्रतीयते तर्हि "पुम्" शब्दवत् अब्राह्मणशब्देनापि चतुर्षु वर्णेषु अब्राह्मणः बुद्धिरियं भवेत्। अतः बुद्धेः भेदः कथं भविष्यति? अस्य समाधानं करोति यत् अब्राह्मणशब्देन नकारस्य सामर्थ्येन ब्राह्मणस्य पर्युदासः क्रियमाणः क्षत्रिये, वैश्ये, शूद्रे च विद्यमानः पुंस्त्वः प्रतीयते, एवं "पुम्" शब्देन स्वरूपतः चतुर्षु वर्णेषु विद्यमानस्य पुरुषत्वस्य प्रतिपादनं भवति। अतः बुद्धेः भेद उचितैव। अत्र पूर्वपक्षेण शङ्का क्रियते यत् एकैव पुंस्त्वः "पुम्" शब्देन प्रतिपादिते सति चतुर्षु वर्णेषु एवं अब्राह्मणशब्देन प्रतिपादिते त्रिष्वेव कथं भविष्यति? अस्य समाधानं क्रियते यत् यथा एकैवरूपं गिद्धस्य चक्षुः बहुदूरपर्यन्तं पश्यति, एवं काकस्य चक्षुः तस्यापेक्षा समीपे एव पश्यति, इदं शक्तिभेदः दृश्यते, तथैव पुम् शब्दस्य अब्राह्मणशब्दस्य च शक्तौ भेदः वर्तते। अतः शक्तिभेदात् 'पुम्' शब्दात् प्रतिपादितः पुंस्त्वः चतुर्षु तथा अब्राह्मणशब्देन प्रतिपादितः पुंस्त्वः त्रिषु एव विद्यते।

एकैव अब्राह्मणशब्दः ब्राह्मणस्य पर्युदासस्य पुंस्त्वस्य च प्रतिपादनमुभे कार्ये कथं करिष्यति? अस्य समाधानं करोति यत् समस्तपदम् अवयवयुक्तत्वात् विग्रहवाक्यार्थस्य प्रतिपादनं करोति। अतः ब्राह्मणपदेन सह उच्चरितेन नञ्पदेन ब्राह्मणत्वाभावस्य शक्तिना तथा ब्राह्मणत्वात् भिन्ने विद्यमानस्य पुंस्त्वस्य लक्षणया प्रतिपादनं भविष्यति। अनेन प्रकारेण शक्तेः लक्षणारूपवृत्तेश्च भेदाभ्याम् उभयोः बोधः भवितुमर्हति। अत्र पुनः शंका उपस्थाप्यते पूर्वपक्षेण

---

[287] "कैश्चित्त्वत्रैकशब्दत्वमक्षादाविव कल्पितम्। जातित्रयस्य नैवं तु सम्भवत्यघटादिषु॥" श्लो० वा०, अपो०, श्लो.सं.16

यत् अब्राह्मणशब्देन ब्राह्मणत्वस्य अभावेन युक्तः पुंस्त्व एव किमर्थं लक्ष्यते, वस्तुमात्रकिमर्थं न लक्ष्यते? अस्य समाधानं क्रियते यत् ब्राह्मण[288] शब्दः स्वशक्त्या ब्राह्मणत्वस्य प्रतिपादनं करोति। ब्राह्मणत्वस्य अविनाभूतः पुंस्त्वः प्राणित्वादयोऽपि प्रतीयन्ते। अतः ब्राह्मणशब्दस्य असाधारणाभिधेयस्य नञा निषेधे सति नञा विशिष्टः ब्राह्मणः पदं ब्राह्मणत्वमात्रात् पृथक् सामान्यस्य प्रतिपादनं करोति। एतदर्थं नञः बलेन ब्राह्मणत्वस्य एव त्यागः भविष्यति, अन्ये सर्वे पुंस्त्वप्राणित्वादयः ज्ञायन्ते तेषां त्यागः न भविष्यति। क्षत्रियादीनां ग्रहणे ब्राह्मणत्वादतिरिक्तः सर्वे गृह्यन्ते तथा वस्तुत्वादीनां ग्रहणे सति पुंस्त्वादेः ग्रहणं न भविष्यति, एवमेतत् समीचीनं नास्ति, अर्थात् पुंस्त्वादेः लक्षितमुचितम्, वस्तुमात्रस्य लक्षितं नोचितम्।

अथ च कक्षाभेदेन सत्त्वम्, द्रव्यत्वम्, पार्थिवत्वम्, प्राणित्वम्, पुंस्त्वम्, ब्राह्मणत्वञ्च इत्यादयः सामान्याः सन्ति। एतेषु पूर्वस्य अपेक्षा उत्तरोत्तरविशेषः, अर्थात् लघुदेशे विद्यमानः वर्तते। अत्र अब्राह्मणशब्देन पुंस्त्वस्य विशेषब्राह्मणत्वस्य नञा पर्युदासे सति ब्राह्मणत्वस्य अभावेन युक्तस्य सामान्यस्य अपेक्षा क्रियमाणः शब्दः ब्राह्मणत्वस्य अव्यवहिते पूर्वे विद्यमानस्य पुंस्त्वस्य ग्रहणं करोति। कारणमिदं वर्तते यत् ब्राह्मणत्वस्य पूर्वे पुंस्त्वः प्रतीयते। प्रथमस्य परित्यागे किमपि कारणं नास्ति। अतः ब्राह्मणत्वाद् रहितः पुंस्त्वः अब्राह्मणशब्देन प्रतीयते।

ब्राह्मणत्ववत् पुंस्त्वस्य निषेधस्य अभावे इदमपि कारणं वर्तते यत् यथा नञा ब्राह्मणशब्दस्य[289] शक्त्या ज्ञातस्य ब्राह्मणत्वस्य निषेधः भवति तथैव पुंस्त्वस्य निषेधः न भवितुमर्हति। कारणमस्ति यत् एकोच्चारितः शब्दः पुनः अन्य अर्थस्य प्रतिपादनं न कर्तुं शक्नोति। अत एव नञा एक एव निषेधः प्रतीतः भविष्यति। अतः पुंस्त्वस्य निषेधः न भविष्यति। इति तु स्पष्टं भवति यत् पुंस्त्वस्य निषेधः न भवति, यस्य पुंस्त्वस्य विशेषब्राह्मणत्वनञा[290] निषिद्धः अभवत्, स एव पुंस्त्वः प्रतीयते, अतः सः प्रतीयमानः पुंस्त्वः विशेषयुक्तः भवति। अत एव स पुंस्त्वः क्षत्रियादिविशेषे प्रतीयते। लोकेऽपि अब्राह्मणपदेन क्षत्रियादिषु एव पुंस्त्वस्य प्रतीतिः भवति, न तु वस्तुमात्रे। एतदर्थं क्षत्रियादिषु एव अब्राह्मण[291] शब्दस्य प्रयोगः भविष्यति, वस्तुमात्रे न। अत्र कारणमस्ति यत् क्षत्रियादिषु ब्राह्मणस्य सादृश्यं वर्तते, एवं वस्तुमात्रेषु

---

288 "विशेषे प्रतिषिद्धे हि सामान्यं यदनन्तरम्। सामान्याकाङ्क्षिणं शब्दं निरुणद्धि तदात्मनि॥
प्रथमातिक्रमे तस्य कारणं नैव विद्यते। ब्राह्मणत्वादतोऽपेतं नरत्वमवशिष्यते॥" श्लो० वा०, अपो०, श्लो. सं.25-26

289 "व्युदस्य ब्राह्मणत्वं च नञि जाते विशेषणे। नरत्वोदसनं यत्तु कल्पेताश्रुतमेव तत्॥" श्लो० वा०, अपो०, श्लो.सं.27

290 "तस्माद्यस्यैव ते भेदा निषिद्ध्येरंस्तदर्थतः। भेदान्तरस्थं सामान्यं लोकेऽप्येवं प्रतीयते॥" तत्रैव, श्लो.सं.28

291 "प्रसङ्गिन्यां च तद्बुद्धौ निषेधोऽर्थादपीष्यते। तन्मात्ररहिते चार्थे सादृश्यात् तन्मतिर्भवेत्॥
सादृश्यमेव वा वाच्यमिष्टमब्राह्मणादिषु। तच्चावयवसामान्याद्विनाप्येतेन लक्ष्यते॥" तत्रैव, श्लो.सं.29-30

ब्राह्मणस्य सादृश्यं नास्ति। अतः ब्राह्मणत्वात् रहितः अन्यवस्तुनः अपेक्षा सति ब्राह्मणस्य क्षत्रियादिषु सादृश्यात् क्षत्रियादिषु एव अब्राह्मणशब्दस्य प्रयोगः भवति, वस्तुमात्रे न।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् "अब्राह्मणः" अस्यार्थः क्षत्रियादय एव भवति, अत्र नञ् सादृश्यार्थे प्रयुज्यते, न तु अभावार्थे इति। एवम्प्रकारेण स्थलान्तरेष्वपि "नञ्" विभिन्नार्थेषु प्रयुज्यते यथा उक्तमपि-

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥[292]

श्लोकेऽस्मिन् प्रयुक्तस्य पर्युदासनञर्थस्य षट् प्रकाराः प्रदर्शिताः। तेषु षड्प्रकारेषु सादृश्यार्थस्य उदाहरणं "अब्राह्मणम्" अस्य विवेचनं पूर्वे कृतं वर्तते। एवमभावः तु नञर्थस्य सामान्यार्थः वर्तते। यथा- "अपुत्रः" अत्र अभावार्थे नञ् वर्तते इति।

## ३.२.३ अन्यार्थे नञर्थस्यप्रयोगविवेचनम्-

नञः प्रयोगः केवलं प्रतिषेधार्थे अभावार्थे च एव न भवति अपितु अन्यार्थेऽपि नञः प्रयोगो दृश्यते, यथा- "अमनुष्यं प्राणिनमानय" वाक्येऽस्मिन् अमनुष्यस्य अर्थो मनुष्याभावः नास्ति अपितु मनुष्येतरोऽर्थो वर्तते। अतः मनुष्येतराः ये प्राणिनः सन्ति तानानय इति अस्य वाक्यस्यार्थो भवति। अन्यार्थे यदा नञ् भवति तदा सः येन पदेन युक्तः भवति तस्य अभावः न निर्दिशति, अपितु अन्यविषयस्य ज्ञानं कारयति। अर्थात् अत्र मनुष्येतराः ये प्राणिनः सन्ति तान् आनय इति वाक्यार्थबोधो भवति। यतोहि यदि अत्र नञः अभावार्थः भवति तर्हि अत्र प्रयोक्तुः यत् तात्पर्यं वर्तते "मनुष्येतरप्राणिनः आनयनम्" तस्य ज्ञानं न भवति, येन स्पष्टतया वाक्यार्थबोधो न भवति। एवमत्रापि नञर्थस्य अन्वयः नामार्थेन भवति एतदर्थमिदमपि पर्युदासनञर्थस्य भेदः वर्तते।

## ३.२.४ अल्पार्थे नञर्थप्रयोगविचारः-

पर्युदासनञर्थस्य एकः प्रभेदः अल्पमपि वर्तते, अर्थात् न्यूनताऽर्थेऽपि नञः प्रयोगो दृश्यते, उदाहरणार्थे- "अनुदरा कन्या" अस्मिन् वाक्ये अल्पार्थे नञः प्रयोगोऽस्ति। यतोहि यदि अत्र नञः अभावार्थम् अथवा अन्यार्थं गृह्यते तर्हि वाक्यमिदमनर्थकं भविष्यति। अतोऽत्र अल्पार्थे नञ् विद्यते येन वाक्यार्थः वर्तते यत् न्यूनोदरमस्ति यस्याः सा कन्या। अयं प्रयोगः लोकव्यवहारे

[292] मीमांसा न्यायप्रकाश, भट्टालंकार टीका, पृ० ४३०.

बहुत्र दृश्यते। उदरेण सह नञन्वये सति स्पष्टं भवति यत् अत्र अल्पार्थे एव नञ् भविष्यति यतोहि अन्यार्थः अत्र नोचितः कापि कन्या उदरेण विना तु नैव भवति। अल्पार्थे नञः प्रयोगः व्यवहारे बहुधा दृश्यते।

यथा- पुरुषाः वदन्ति यत् "अहं अमधुरं खादामि" अस्मिन् निषेधवाक्ये यत् नञ् वर्तते सः अल्पार्थे वर्तते। अर्थात् तेषां तात्पर्यं भवति यत् अहम् अल्पमधुरं खदामि इति वाक्यार्थः भवति।

## ३.२.५ अप्राशस्त्यार्थे (निन्दार्थे) नञर्थप्रयोगविचारः-

अप्राशस्त्यार्थेऽपि नञः प्रयोगो दृश्यते अयमपि पर्युदासस्य एव एकः भेदः वर्तते यतोहि अस्मिन्नर्थेऽपि नञर्थस्य अन्वयः नामार्थेन सह भवति। अस्योदाहरणम् अनेन प्रकारेण दृश्यते यत् यथा- "ब्राह्मणेऽब्राह्मणोऽयम्" अस्य वाक्यस्य प्रयोगः तस्य ब्राह्मणस्य कृते क्रियते यः अधर्ममाचरति अत एव तस्य ब्राह्मणस्य कृते "अब्राह्मण" शब्दस्य प्रयोगः क्रियते येन तस्य निन्दा भवति अतः सः लोके निन्दितः भवति। अस्य प्रकारस्य प्रयोगः न केवलं ब्राह्मणस्य कृते क्रियते अपितु क्षत्रियादिषु अपि एतादृशः प्रयोगः दृश्यते एव। मनुना क्षत्रियस्य कर्म उक्तम्-

**"प्रजानां रक्षणं दानं इज्याध्ययनमेव च।**

**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥"**[293]

श्लोकेऽस्मिन् क्षत्रियाणां कर्मणः विषये उक्तमस्ति यदि कश्चिदपि क्षत्रियः एतानि कर्माणि न करोति तर्हि तस्य कृते जनाः "अक्षत्रियोऽयम्" इति प्रयोगः कुर्वन्ति, येन तस्य अप्राशस्त्यं (निन्दा) भवति। अतः स्पष्टरूपेण वक्तुं शक्यते यत् नञर्थस्य प्रयोगः निन्दार्थे अपि भवति, इति विभिन्नशास्त्रेषु दृश्यते।

## ३.२.६ विरोधार्थे नञर्थप्रयोगविचारः-

विरोधार्थे यथा- "असुरः" शब्देऽस्मिन् नञः प्रयोगो विरोधार्थे कृतः, येन अर्थबोधो भवति यत् ये सुराणां विरोधिनः सन्ति तेऽसुराः सन्ति, यद्यत्र विरोधार्थे नञ् न भवति तर्हि असुरशब्दस्य अर्थो भवति यः सुरः नास्ति सः असुरः वर्तते, तदा मनुष्येभ्योऽपि असुरशब्दस्य प्रयोगो भवति, कारणमस्ति यत् सुरः (देवः) तु मनुष्याः अपि न सन्ति। अतः अत्र विरोधार्थे नञ् वर्तते। एवम्प्रकारेण अस्माभिर्ज्ञायते यत् नञः प्रयोगः विभिन्नार्थेषु दरीदृश्यते।

[293] मनुस्मृतिः,१/८९

## ३.३ आर्थवादवाक्येषु नञर्थविचारः-

अर्थवादवाक्यं तत् भवति येषु वाक्येषु विधेयपदार्थस्य प्रशंसा तथा निषेधपदार्थस्य निन्दा च क्रियते[294]। एतदर्थमेतत् द्विविधः भवति विधियुक्तार्थवादः, निषेधयुक्तार्थवादश्च। यतोहि अत्र अर्थवादवाक्येषु नञर्थविचारः क्रियते, तर्हि अत्र निषेधयुक्तार्थवादस्य विषये विचारः क्रियते।

निषेधवाक्येषु यः निषेध्यपदार्थः भवति तस्य निन्दा एव निषेधशेषार्थवादः करोति। यतोहि वयं किमपि कर्म कुर्मः चेत् तेषां कर्माणां किमपि प्रयोजनम् अथवा फलं भवति। तात्पर्यमिदं वर्तते यत् वेदे यानि विधिकर्माणि एवं निषिद्धकर्माणि उक्तानि तेषां कर्मणां किमपि फलं भवति तस्य फलस्य ज्ञानम् अर्थवादवाक्यानि कुर्वन्ति। अर्थात् विधिकर्मभिः इष्टफलस्य प्राप्तिः भवति एवं निषिद्धकर्मभिः अनिष्टफलस्य प्राप्तिः भवति। अतः कस्यापि कर्मणः फलस्य ज्ञानम् अर्थवादवाक्यैः एव भवति। तर्हि अत्र निषेधवाक्येषु कथं अनिष्टफलस्य ज्ञानमर्थवादवाक्यैः भवति विषयेऽस्मिन् विचारः क्रियते।

अस्य अवबोधनमनेन प्रकारेण भवति यत् "बर्हिषि रजतं न देयम्" इदं निषेधवाक्यं वर्तते यस्यार्थः भवति यत् यागे[295] रजतस्य दानं न करणीयमिति। निषेध्यस्य "रजतदानस्य" निन्दा अनेन निषेधशेषार्थवादेन क्रियते- "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" अनेन अर्थवादेन ज्ञायते यत् रोदनेन यत् अश्रुः पतितः, स एव रजतः वर्तते, एतदर्थं यदि रजतदानं क्रियते तर्हि गृहे रोदनस्य प्रसङ्गः भविष्यति। अनेन प्रकारेण अनेनार्थवादनिषेधवाक्येन निषिद्धस्य रजतदानस्य निन्दा सति निषेधवाक्ये अर्थवादवाक्ये च एकवाक्यता स्थापिता[296]।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् बर्हिश्नामके विशिष्टयागे रजतस्य दानं न करणीयम्। अत्र "बर्हिषि रजतं न देयम्" अस्य निषेधवाक्यस्य स्पष्टवाक्यार्थं तदैव ज्ञायते यदा "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" अनेन अर्थवादवाक्येन निषेधवाक्यस्य अनिष्टफलस्य ज्ञानं भवति। यदि अर्थवादवाक्यं न बोधयति यत् बर्हिश्विशिष्टयागे रजतस्य दानमनिष्टकारी भवति तर्हि पुरुषाः यागेऽपि रजतस्य दानं कुर्वन्ति एवं अनिष्टफलभोक्तारः भवन्ति। अतः जनाः अनिष्टफलस्य भोक्तारः न स्युः एतदर्थमर्थवादक्यमत्यावश्यकं वर्तते निषेधवाक्यार्थवादम् इति।

---

294 "प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः"। अर्थसंग्रहः, पृ.सं.245

295 "बर्हिश्शब्देन तद्विशिष्टो यागो लक्ष्यते। बर्हिषि यागे रजतं दक्षिणात्वेन न देयमित्यर्थः"। सारविवेचिनी, पृ.सं.140

296 "सोऽरोदीत् इत्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहेऽपि रोदनप्रसङ्गाद् "बर्हिषि रजतं न देयम्" इति तन्निषेधेन विधेयेन अर्थवादस्य एकवाक्यत्वम्"। (ऋग्वेदभाष्यभूमिका)

रजतदानस्य निषेधः केवलं बर्हिश्रामके विशिष्टयागे वर्तते अन्यस्मिन् कार्ये अथवा यागे रजतस्य दानं कर्तुं शक्यते।

## ३.४ धर्मशास्त्रग्रन्थेषु नञर्थप्रयोगविचारः-

न केवलं वेदे, दर्शने च एव नञर्थस्य विचारः कृतः अपितु धर्मशास्त्रग्रन्थेषु अपि नञः बहुधा एतादृशी व्याख्या कृता वर्तते यत्र नञः अर्थः अभावार्थे न भूत्वा पर्युदासार्थे वर्तते। अस्मिन्नेव पक्षे याज्ञवल्क्यस्मृतौ स्नातकस्य कर्तव्यपरिच्छेदे "नस्य" बहुधा उल्लेखः प्राप्यते, यतोहि याज्ञवल्क्यस्मृतौ आचाराध्याये स्नातकव्रतप्रकरणं वर्तते यस्मिन् प्रकरणे स्नातकस्य सङ्कल्पविषये निर्देशितं वर्तते। तत्र नञर्थस्य प्रयोगः पर्युदासार्थे कृतः वर्तते, पर्युदासनञर्थेन तात्पर्यं वर्तते यत् यत्र नञर्थः पर्युदासार्थे भवति तत्र तस्य नञः अर्थः सादृश्याद्यर्थे भवति न तु निषेधार्थे। अस्योदाहरणं तत्रैव स्नातकव्रतप्रकरणे प्रदत्तम्, तत्र त्रिविधस्य स्नातकस्य विधिनिषेधरूपान् धर्मान् प्रस्तौति यत्-

"न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः।

न विरुद्धप्रसङ्गेन सन्तोषी च भवेत्सदा॥"[297]

श्लोकस्यास्य मिताक्षराटीकायां लिखितं वर्तते यत् "नञ् शब्दः प्रत्येकं पर्युदासार्थ एव"[298]। अर्थात् तत्र स्पष्टरूपेण उक्तं यत् अत्र नञ् पर्युदासार्थे वर्तते इति। अस्य पर्युदासनञर्थस्य उदाहरणम् अन्यश्लोके सम्यक्तया परिलक्ष्यते तत्र उक्तं यत्-

"न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः।

न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्॥"[299]

अस्य श्लोकस्य भावार्थः वर्तते यत् या दुःखदायी वार्ता भवति तां वार्तामनावश्यकम् अथवा अकारणं कमपि पुरुषम् अथवा स्त्रियं न वक्तव्यम्। अनेन इदं न जायते यत् या वार्ता दुःखदायी भवति तां न वक्तव्यम्, अत्र नञ् पर्युदासार्थे वर्तते एवम् अर्थो भवति यत् केवलं तस्यां स्थितौ तां वार्तां न वक्तव्यं यस्यां स्थितौ किमपि कारणम् अथवा कापि आवश्यकता न स्यात्। यदि अत्र निषेधार्थे नञ् मन्यते तर्हि अस्य सुष्ठुः अर्थः न प्राप्यते एवं कोऽपि स्वदुःखं कस्यापि सम्मुखे न वक्तुं शक्नोति।

---

297 याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो.सं.129

298 तत्रैव, मिताक्षराटिका, पृ.सं.216

299 याज्ञवल्यस्मृतिः, आचाराध्यायः, श्लो.सं.131

तथा अन्योदाहरणमपि वर्तते-

“नेक्षेताऽर्कं न नग्नां स्त्रीं न च संसृष्टमैथुनम्।

न च मूत्रं पुरीषं वा नाशुची राहुतारकाः॥”[300]

अस्मिन् श्लोके लिखितं यत् नेक्षेताऽर्कम् इति अत्रापि नञ् पर्युदासार्थे वर्तते, न निषेधार्थे, तात्पर्यमिदं वर्तते यत् यद्यपि अत्र नैवार्कमीक्षेतेति सामान्येनोक्तं तथापि अत्र उदयास्तमयराहुग्रस्तोदकप्रति-बिम्बमध्याह्नवर्तिन एवादित्यस्येक्षणं निषिध्यते न तु सर्वदा तस्य अनेक्षणं भवति। एवं श्लोके यदुक्तं “नग्नां स्त्रीं नेक्षेत” यतोह्यत्र नञ् पर्युदासार्थे वर्तते अतः अस्य वाक्यस्य अर्थो भवति यत् उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत इति, अत्र उपभोगादन्यत्र इति अर्थः पर्युदासेन एव भवति।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् पर्युदासार्थे यदि नञ् भवति तर्हि तस्य नञः अर्थः निषेधः न भवति, अपितु अन्यैव अर्थः भवति।

---

300 याज्ञावल्यस्मृति आचाराध्यायः, श्लो.सं.135

## ॥ उपसंहारः ॥

प्रस्तुतेऽस्मिन् शोधकार्ये शोधार्थिना नञर्थानां निषेधवाक्यानाञ्च स्वरूपप्रकारविमर्शः व्यधायि। शोधकार्यत्वेन गृहीतस्य शोधविषयस्य प्रतिपादनं मुख्यत्वेन मीमांसादर्शने विहितं वर्तते। अत्रत्ये विमर्शे प्राथम्येन मीमांसादर्शनस्य वेदार्थनिर्णये मीमांसायाश्च महत्त्वस्य संक्षिप्तपरिचयः प्रस्तुतः।

शोधकार्येदं त्रिष्वध्यायेषु विभक्तम्। प्रथमाध्याये वैदिकवाक्यभेदानां विषये विवेचनं कृतम्। तत्र सर्वप्रथमं विधिस्वरूपस्य विमर्शं कृत्वा कथं विधिवाक्येन पुरुषः कस्मिन्नपि कार्ये प्रवृत्तः भवति एवं तस्य किं प्रयोजनं भवति एतस्मिन् विषये सम्यक्तया विवेचनं कृतमस्ति। पुनः विधेः भेदानां विवेचनं कृतं, एवं कथं विधिना वाक्यार्थस्य बोधो भवति अस्मिन् विषये लिखितं वर्तते।

द्वितीयाध्याये नञः स्वरूपस्य विषये विवेचनं वर्तते। तत्र विवेचनेऽपि सर्वप्रथमं मीमांसायां प्रतिपादितस्य नञः स्वरूपस्य विषये विवेचितं वर्तते। मीमांसायां नञस्वरूपं विवेच्य नञर्थस्य कथं निवर्तना अर्थः भवति, एवं विधिनिषेधयोः भेदाः अपि प्रदर्शिताः। एवं नञर्थस्य अन्वयः कदा प्रत्ययार्थेन सह भवति, कदा च धात्वर्थेन भवति अस्मिन् विषयेऽपि सम्यकतया प्रतिपादितं वर्तते। अस्मिन्नेवाध्याये व्याकरणे नञर्थस्य किं स्वरूपं वर्तते, कथं समस्तपदस्य सर्वनाम संज्ञा भवति एतेषां विषये विवेचनं कृतम्। पुनः न्यायदर्शने प्रयुक्तस्य नञर्थस्य किं स्वरुपं, कथं च नञर्थेन वाक्यार्थबोधो भवति, एतेषां विषयाणां सम्यक्तया प्रतिपादनम् अस्य लघुशोधस्य द्वितीयाध्याये कृतं वर्तते।

तृतीयाध्याये निषेधवाक्यानां विवेचनं कृतम्। अस्मिन्नध्याये नञर्थस्य विभिन्नार्थेषु विचारः कृतः। नञ् केवलं निषधार्थे न प्रयुज्यते अपितु पर्युदासार्थेऽपि प्रयुज्यते अस्य विचारोऽपि अस्मिन् अध्याये विहितः। पुनः नञर्थस्य षद्प्रकाराणां (सादृश्यम्, अभावः, अन्यत्वम्, अल्पता, अप्राशस्त्यम्, विरोधश्च ) एतेषां विवेचनं विश्लेषणञ्च सम्यक्तया प्रतिपाद्य “अब्राह्मणः” अनेन शब्देन कथं क्षत्रियाद्यर्थः अवबोध्यते, अस्य विवेचनं सम्यक्तया कृतम्। एवं नञर्थस्य प्रत्ययार्थेन अन्वये सति कथं प्रवर्तना अर्थं भवति, तथा च धात्वर्थेन नामार्थेन च अन्वये सति कथं पर्युदासार्थः भवति अस्मिन् विषये प्रमाणैः विवेचनं, विश्लेषणञ्च कृतम्। अनेन प्रकारेण अस्मिन् अध्याये निषेधवाक्यानां प्रभेदानां विवेचनं प्रदर्शितमिति। अन्ते च शोधस्योपसंहारः विलिखितः। पुनः सर्वान्ते प्रकृतशोधकार्यसम्बद्धानां सन्दर्भग्रन्थानां सूची प्रदत्ता, येन शोधस्यास्य गुणवत्ता शोधसिद्धान्ताऽनुगुणं भवेत्।

वेदे पञ्चविधानि वाक्यानि भवन्ति, विधिः, मन्त्रः, नामधेयम्, निषेधः, अर्थवादश्च। अस्मिन् लघुशोधे एतेषां विषये विवेचनं विश्लेषणञ्च प्रतिपादितं वर्तते। अर्थसंग्रहे वेदस्य सः

भागः विधिरुच्यते, यः लौकिकप्रमाणैः अज्ञातस्य पदार्थस्य (प्रधानक्रियायाः, अङ्गक्रियायाः, द्रव्यस्य, क्रमस्य, अधिकारादीनाञ्च) विधानं करोति। यथा- अग्निहोत्रं जुहुयात्स्वर्गकामः वाक्यमिदं विधिः मान्यते, यतोहि इदं वाक्यं स्वर्गप्राप्तौ हेतुः वर्तते "अग्निहोत्रम्" अस्य यागानुष्ठानस्य विधानं करोति। अग्निहोत्रस्य अनुष्ठानेन स्वर्गस्य प्राप्तिः भवति। अस्य विषयस्य ज्ञानं प्रत्यक्षादिभि अन्यप्रमाणैः न भवति इति। विधेः विभाजनं त्रिप्रकारैः भवति। प्रथमविभाजने विधेः भेदद्वयं प्रदर्शितं गुणविधिः, विशिष्टविधिश्च। द्वितीयविभाजने अस्य चत्वारः भेदाः प्रतिपादिताः उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्च। तथा तृतीयविभाजने त्रयः भेदाः कृताः अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्च। अनेन प्रकारेण अस्मिन् लघुशोधे विधेः प्रभेदानां विवेचनं सम्यक्तया प्रतिपादितं वर्तते। अत एव अनेन अवबोध्यते यत् वेदस्य विध्यर्थवाक्यानां स्पष्टवाक्यार्थे मीमांसायाः विधिप्रकरणमावश्यकं वर्तते यदा मीमांसायाः विधिप्रकरणस्य ज्ञानं भविष्यति, तदैव वेदस्य विधिवाक्यानां समुचितार्थानां ज्ञानं भविष्यति।

विधेरनन्तरं मन्त्रस्योपरि विचारः कृतः। यागानुष्ठानाय अनेकपदार्थानामावश्यकता भवति। एतेषु पदार्थेषु घृतम्, काष्ठम्, पात्रम्, हव्यादीनि द्रव्याणि भवन्ति। तथा च यागः अङ्गक्रियाभिः देवतादिभिश्च विना अपि सम्पन्नः न भवितुमर्हति। अतः निष्कर्षतः इदं वर्तते यत् यागस्य सम्पन्नतायाम् अनेकाः पदार्थाः अपेक्षिताः भवन्ति। ते द्रव्यरूपे, देवतारूपे अथवा क्रियारूपे भवन्ति। यागानुष्ठाने प्रयुक्तस्य समवेतपदार्थानां स्मरणं मन्त्रैरेव क्रियते, इयमेव मन्त्राणाम् उपयोगिता वर्तते। नियमोऽयं वर्तते यत् अनुष्ठाने प्रयुक्तस्य पदार्थानां स्मरणं मन्त्राणामुच्चारणेन एव करणीयम्। अनेन प्रकारेण अस्माभिर्ज्ञायते यत् मन्त्र अपि यागादिक्रियाणामनुष्ठाने उपयोगित्वात् क्रियापरकः भवति।

मन्त्रस्य अनन्तरं नामधेये विचारः प्रस्तुतः। नामधेयशब्दः कर्ममीमांसायाः एकः पारिभाषिकः शब्दः वर्तते, यस्य अर्थः यागविशेषस्य नाम वर्तते। नामधेयशब्दः यागनामधेयस्य संक्षिप्तरूपं वर्तते। विधिवाक्येषु प्रयुक्तं किमपि शब्दविशेषं योगशक्तिना प्राप्तस्य कस्यचिदर्थस्य बोधकः न मत्वा यदि यागविशेषस्य नाम मन्यते तर्हि सः शब्दः 'नामधेयः' उच्यते। यथा- "उद्भिदा यजेत पशुकामः" अस्मिन् विधिवाक्ये उद्भिद् शब्दस्य यौगिकार्थं खनित्रं न भूत्वा यागविशेषस्य नाम मन्यते अर्थात् नामधेयः मन्यते। कोऽपि शब्दः नामधेयः न मन्यते, तत्र चत्वारि निमित्तानि भवन्ति- मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्च इति। यैः शब्दः यागस्य नामधेयः मन्यते।

अस्यानन्तरं लघुशोधेऽस्मिन् वेदस्य चतुर्थप्रभेदे निषेधे विचारः कृतः। निषेधानि एतादृशानि वाक्यानि भवन्ति, यानि पुरुषमनर्थहेतुभूतानां क्रियाणां कार्यान्वयेन अवरोधयन्ति। निषेधवाक्यानि क्रियानुष्ठानस्य प्रति पुरुषं निवर्त्तयति, अर्थात् निषेधवाक्यं निवर्तनामुत्पादयति। निवर्तनायाः बोधः तदैव भवति यदा नञर्थस्य अन्वयः प्रत्ययार्थेन भविष्यति। यत्र प्रत्ययार्थेन अन्वये बाधः भवति तत्र पर्युदासाश्रयेण नञर्थस्य अन्वयः धात्वर्थेन भवति न तु प्रत्ययार्थेन। पुन अर्थवादस्य विवेचनं कृतंम्। अर्थवादोऽपि परम्परया यागादिक्रियाभिः सम्बद्ध्यते। विधिवाक्येन विधेयवाक्यस्य प्रशंसा निषेधवाक्येन च निषेध्यपदार्थस्य निन्दा अर्थवादवाक्यैः क्रियते। अर्थवादस्य विभाजनं द्वाभ्यां प्रकाराभ्यां कृतम्। प्रथमविभाजनस्य आधारः विधेयस्य निषेध्यस्य च क्रियायाः क्रमशः प्रशंसा एवं निन्दा वर्तेते। विभाजनेऽस्मिन् अर्थवादस्य भेदद्वयं प्रस्तुतम्- विधिशेषः, निषेधशेषश्च। तथा च द्वितीयविभाजनस्य आधारः अन्यप्रमाणैः अर्थवादस्य प्रतिपाद्यविषयस्य ज्ञानस्य सत्ता अथवा अभावः वर्तते। अस्मिन् विभाजने अस्य भेदत्रयं प्रदर्शितम्- गुणवादः, अनुवादः, भूतार्थवादश्च।

लघुशोधेऽस्मिन् मीमांसायां प्रयुक्तस्य नञर्थस्य विवेचनं तु कृतमेव तथा व्याकरणे, न्याये च प्रयुक्तस्य नञर्थस्य विवेचनमपि कृतम्, तत्र मीमांसायां नञ्स्वभावविषये उक्तं वर्तते यत् अस्य स्वभावो वर्तते यत् अयं नञ् स्वसमभिव्याहृतपदार्थस्य विरोध्यर्थस्य बोधं कारयति। यथा घटो नास्ति वाक्येऽस्मिन् अस्ति शब्देन सहोच्चारितः नञ् घटस्य अस्तित्वस्य विरोध्यर्थस्य “घटासत्त्व” अस्य अर्थस्य बोधं कारयति, एवमेव “न कलञ्जं भक्षयेत्” अत्र लिङेन सहोच्चारितः नञ् लिङार्थस्य प्रवर्तनायाः विरोध्यर्थस्य निवर्तनायाः बोधं कारयति। एतदर्थं निषेधवाक्यस्थले नञः अर्थः निवर्तना एव भवति।

लघुशोधेऽस्मिन् यद्यपि वेदस्य पञ्चप्रभेदानां वाक्यानां विवेचनं कृतम्, तथापि तेषु प्रभेदेषु अपि निषेधवाक्यस्य विशेषरूपेण विवेचनं कृतं वर्तते। न केवलं मीमांसायां प्रतिपादितस्य निषेधस्य एव विवेचनं न, अपितु व्याकरणे, न्याये च प्रतिपादितस्य निषेधस्य विवेचनमपि कृतं वर्तते।

व्याकरणे नञ् समासे मुख्यतः नञर्थस्य चर्चा कृता। तत्र “असर्वः” अस्मिन् शब्दे कथं सर्व शब्दस्य सर्वनाम संज्ञा भवति विषयोऽयं सम्यक्तया प्रतिपादितः। नञ् समासे उत्तरपदार्थस्य प्रधानता भवति, एतदर्थं उत्तरपदस्य रूपे स्थितस्य सर्वशब्दस्य सर्वनामसंज्ञा भवति। अतः “असर्वः” अस्य अर्थः आरोपितसर्वः भवति अत्र आरोपितत्वः अयं नञः द्योत्यर्थः स्वीकर्तव्यः। तात्पर्यमिदं वर्तते यत् असर्वः अत्र आरोपितसर्वः अर्थेऽस्मिन् सर्वशब्दस्य प्रधानत्वात् सर्वनामसंज्ञा

सिद्ध्यति। एवमेव "अनहं भवामि" अस्य वाक्यस्य उत्तरपदम् अहं शब्दः विशेष्यः वर्तते, येन सः शब्दः यां व्यक्तिं सङ्केतयति 'मि' प्रत्ययः अपि तामेव सङ्केतयति, अतः उभयोः सङ्केतितोऽर्थः एकैव वर्तते। एतदर्थमत्र सामानाधिकरण्यं भवति। यदि अत्र अभावः विशेष्यः मन्यते तर्हि अत्र "मदभावः" अस्मिन्नर्थे अस्मद् शब्दः विशेषणरूपे भवति, येन अस्मदस्य 'मि' अस्य प्रत्ययस्य च सङ्केतितः अर्थः पृथक् भवति, अतः उत्तमपुरुषः न भूत्वा प्रथमपुरुषः 'ति' प्रत्ययः "शेषे प्रथमः" अनेन सूत्रेण भवति। अनेन प्रकारेण व्याकरणे समासोक्तपदे नञ् विशेषण रूपे भवति एवम् उत्तरपदं विशेष्यरूपे।

न्यायवैशेषिकदर्शने निषेधस्य प्रतीतीनाम् आश्रयः अभावः भवति, नव्यन्यायपरम्परायां प्रायः सर्वे दार्शनिकाः अभावं पृथक् पदार्थं स्वीकुर्वन्ति। गंगेशोपाध्यायः माथुरनाथश्च उभौ अपि अभावं पृथक् पदार्थं स्वीकृतवन्तौ। रघुनाथशिरोमणिः यद्यपि वैशेषिकस्य सप्तपदार्थस्य सिद्धान्तं यथावत् न स्वीकृतवान्, परम् अभावस्य पदार्थत्वपक्षः तेनापि स्वीकृतः इति प्रतीयते। अतः स्पष्टं भवति यत् न्यायवैशेषिकदर्शने अभावस्य सर्वथा पृथक् पदार्थत्वं सिद्धं कृतमस्ति।

न्यायवैशेषिकसम्प्रदाये प्रतिपादिता मुक्तेः अथवा अपवर्गस्य कल्पना निषेधात्मिका वर्तते। न्यायवैशेषिकपरम्परायां अभावस्य सिद्धिः तस्य चरमलक्ष्यस्य (निःश्रेयस्) अस्य स्वरूपसिद्धिहेतुः अनिवार्यः वर्तते अर्थात् अभावं विना अस्य सम्प्रदायस्य अन्तिमध्येयस्य (मोक्षस्य) सिद्धिः न भवितुमर्हति, यतोहि मोक्षस्य सिद्धिः निषेधरूपैव स्वीकृता। न्यायवैशेषिकदर्शने सिद्धान्तोऽयमपि प्रतिपादितः यत् भावपदार्थानामिव अभावस्य अपि विशेषण-विशेष्यभावसन्निकर्षस्य सामर्थ्येन प्रत्यक्षं सम्भवति। एवं तस्य चत्वारः प्रकारगतभेदाः सन्ति।

वस्तुतः यदा वयं कस्यापि तत्त्वस्य विश्लेषणं कुर्मः तदा तस्मिन् स्थले निषेधोऽपि एकः महत्त्वपूर्णपक्षः भवति, यतोहि अनेन विना वयं तस्य वस्तुनः प्रतिपादनं विधिरूपेणापि न कर्तुं शक्नुमः। परमत्र लघुशोधे उल्लेखनीयं तथ्यमिदं वर्तते यत् सिद्धान्तमते अयं निषेधः अथवा अभावः केवलं निष्कासनम् अथवा बहिष्करणम् एव न भवति, अपितु वस्तुसत्तायाः स्वरूपज्ञानस्य एकः प्रकारोऽस्ति। यदा वयं कथयामः यत् "पुष्पमिदं न रक्तम्" तदा अत्र केवलं रक्तवर्णस्य निषेधः एव अस्माकं ध्येयं न भवति, अपितु तस्माद्भिन्नस्य कस्यचिदन्यवर्णस्य सूचना अपि भवति। अतः निषेधः खण्डनस्य पर्यायः न वर्तते।

अन्यशब्देषु वक्तुं शक्यते यत् निषेधः अथवा अभावोऽपि सत्यान्वेषणस्य एका रीतिः वर्तते। उपनिषत्काराः "नेति, नेति" अनया प्रक्रियया ब्रह्मतत्त्वस्य निरूपणे अस्या एव रीतेः

प्रवर्त्तना कृतवन्तः। आधुनिकदार्शनिकाः अपि चिन्तनस्य क्षेत्रे अस्य महत्त्वं स्वीकुर्वन्ति। अतः सर्वैः दार्शनिकैः विभिन्नस्वरूपेषु अभावः अथवा निषेधः स्वीकृतः एव। एवं शोधार्थिना नञर्थस्वरूपस्य तस्य प्रभेदस्य च विमर्शः कृतः।

# ॥ सन्दर्भग्रन्थसूची ॥

## प्राथमिकस्रोतांसि


- *अर्थसंग्रहः,* लौगाक्षिभास्करः, व्या. वाचस्पतिउपाध्यायः, चौखम्बा पब्लिशर्स, वाराणसी, २००५
- *जैमिनीयमीमांसाभाष्यम्* (प्रथम भागः), शबरस्वामी (व्याख्या), युधिष्ठरमीमांसकः, रामलालकपूरट्रस्टम्, सोनिपत (हरियाणा), १९८७
- *जैमिनीयन्यायमालाविस्तरम्,* माधवाचार्यः, (सम्पा) जीवानन्दविद्यासागरभट्टाचार्यः, कृष्णदासअकादमी, वाराणसी, १९८९.
- *मीमांसापरिभाषा,* कृष्णयज्वा, चौखम्बा ओरियन्टालिया, वाराणसी, १९८८.
- *मानमेयोदयः,* नारायणमिश्र, (व्याख्या) योगीन्द्रानन्द, षड्दर्शनसंस्कृतप्रतिष्ठान, वाराणसी, १९८७
- *मीमांसानयमञ्जरी,* सम्पा. चिन्नस्वामीशास्त्री एवं पट्टाभिरामशास्त्री, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, वाराणसी, १९८४
- *मीमांसानयविवेकः,* भवनाथमिश्रः, राष्ट्रियसंस्कृतसंस्थानम्,नई दिल्ली, १९९१.
- *मीमांसाश्लोकवार्तिकम्,* कुमारिलभट्टः , (अनु.) श्यामसुन्दरशर्मा, सम्पा. विजयशर्मा, भारतीयविद्यासांस्थानम्, वाराणसी, २००२
- *मीमांसाश्लोकवार्तिकम्,* कुमारिलभट्टः, (सुचरितमिश्रप्रणीतकाशिकटीका सहितम्) सम्पा. साम्बशिवशास्त्री, सी.बी.एच. पब्लिकेशन, मद्रासः, १९९२
- *मीमांसाश्लोकवार्तिकम्,* कुमारिलभट्टः, (व्याख्या) दुर्गाधरझा, सम्पा. नारायणमिश्रः, कामेश्वरसिंहदरभंगसंस्कृतविश्वविद्यालयः, १९७९
- *श्लोकवार्तिकव्याख्यातात्पर्यटीका,* उम्बेकभट्टः, सम्पा. रामनाथशास्त्री, मद्रास विश्वविद्यालयः, १९७१
- *श्लोकवार्तिकम्,* कुमारिलभट्टः ,पार्थसारथिमिश्रविरचिता न्यायरत्नाकरटीका सहितम्, सम्पा. द्वारिकदासशास्त्री, तारापब्लिकेशन्स, वाराणसी, १९८७
- *शास्त्रदीपिका,* पार्थसारथिमिश्रः, निर्णयसागरप्रेस,बम्बई, १९१५.
- *मीमांसान्यायप्रकाशविमर्शः,* आपदेवः, (व्या०)कपिलदेवपाण्डेयः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, २००१.

- *तन्त्रवार्तिकः,* कुमारिलभट्टः, सारसुधानिधिप्रकाशनम्, कलकत्ता, १८८२.
- *न्यायरत्नमाला,* पार्थसारथिमिश्रः चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, १९००.
- *प्रकरणपञ्जिका,* शालिकनाथमिश्रः, हिन्दूविश्वविद्यालयः वाराणसी, १९६१.
- *बालमीमांसाप्रकाशः,* शङ्करभट्टः, विद्याविलासप्रेसः, वाराणसी, १९०२.
- *सर्वदर्शनसंग्रहः,* माधवाचार्यः, (व्या०) उमाशंकरशर्मा, चौखम्बाविद्याभवनम्, वाराणसी, २००६.
- *मीमांसादर्शनम्,* तन्त्रवार्तिकयुक्तम्, जैमिनिः, आनन्दाश्रमः, पूना, १९७२.
- *वाक्यपदीयम्,* भर्तृहरिः, सं. पण्डितरघुनाथशर्मा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी
- *किरणावली,* उदयनाचार्यः, सं. विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत सीरीज सं-९, वाराणसी, १८९७
- *किरणावली प्र. "दीधिति",* रघुनाथशिरोमणिः, सं. बदरीनाथशास्त्री, सरस्वती भवनम् टेक्टस, सं ३८, वाराणसी, १९३२
- *तर्ककौमुदी,* लौगाक्षिभाष्करः, सं. वी. एल. एस. पनसीकरः, निर्णयसागरप्रेस, बम्बई, १९२८.
- *तर्कभाषा,* केशवमिश्रः, सं. बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, १९६८.
- *तत्त्वचिन्तामणिः,* गंगेशोपाध्यायः, सं. ए. ताताचार्यः, केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः, १९९३.
- तत्त्वार्थसूत्रम्, उमास्वामी, भारतीयज्ञानपीठः, दिल्ली, १९९५.
- न्यायकुसुमाञ्जलिः, उदयनाचार्यः, सं. महाप्रभुलालगोस्वामी, मिथिला विद्यापीठः ग्रन्थमाला सं. २८, १९७२.
- न्यायभाष्यम्, वात्स्यायनः, सं. नारायणमिश्रः, काशीसंस्कृतग्रन्थमाला, ४८, वाराणसी, १९७०.
- न्यायभूषणम्, भासर्वज्ञः, सं. स्वामीयोगीन्द्रानन्दः, षड्दर्शनप्रकाशनम् प्रतिष्ठानम्, सं. वाराणसी, १९६८.
- न्यायमञ्जरी, जयन्तभट्टः, सं. सूर्यनारायणशुक्लः, चौखम्बासंस्कृतसीरीज, वाराणसी, १९७१.
- न्यायरत्नाकरः, पार्थसारथिमिश्रः, सं. द्वारकादासशास्त्री, तारापब्लिकेशन्स, वाराणसी, १९७८

- न्यायवार्तिकतात्पर्यपरिशुद्धिः, उदयनाचार्यः, सं. विन्ध्येश्वरीप्रसादद्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता, १९२४.
- न्यायसूत्रम्, गौतमः, सं. नारायणमिश्रः, काशीसंस्कृतग्रन्थमाला, ४३, वाराणसी, १९७०.
- पदार्थतत्त्वनिरूपणम्, रघुनाथशिरोमणिः, सं. कार्लपाटरः, हार्वर्ड पेन्टिंग इन्स्टीट्यूट सं. १७, १९५७.
- पदार्थदीपिका, कौण्डभट्टः, सं. तात्याशास्त्रीपटवर्धनः, राजराजेश्वरीप्रेस, वाराणसी, १९००.
- पदार्थमण्डनम्, वेणीदत्तः, सं. गोपालशास्त्रीनेने, सरस्वतीभवनम्, स्टडीज- ३०, इलाहबाद, १९३०.
- प्रशस्तपादभाष्यम्, प्रशस्तपादः, सं. नारायणमिश्रः, काशीसंस्कृतग्रन्थमाला सं. १७३, वाराणसी, १९६६.
- योगसूत्रम्, पतञ्जलिः, सं. नारायणमिश्रः, भारतीयविद्याप्रकाशनम्, वाराणसी, १९७१.
- वैशेषिकसूत्रम्, कणादः, सं. नारायणमिश्रः, चौखम्बासंस्कृतसीरीज, वाराणसी, १९६६.
- संख्यकारिका, ईश्वरकृष्णः, सं. आद्याप्रसादमिश्रः, अक्षयवटप्रकाशनम्, इलाहबादः, २०२७, वि. संवत्.
- सप्तपदार्थी, शिवादित्यः, सं. छी. गुरुमूर्तिः, थियोसोफिकलसोसाइटी, आड्यार, मद्रासम्, १९३२.

## द्वितीयकस्रोतांसि

- *मीमांसा दर्शन का विवेचनात्मक इतिहास,* गजाननशास्त्रीमुसलगाँवकरः, चौखम्बाविद्याभवनम्, वाराणसी, प्रथमसंस्करणम् १९९२.
- *धर्मशास्त्र का इतिहास,* पाण्डुरङ्गवामनकाणे, उत्तरप्रदेशहिन्दीसंस्थानम्, लखनऊ, त्रीणि संस्करणानि, १९९६.
- उपाध्यायबलदेवः, *भारतीदर्शनम्,* शारदामन्दिरम्, वाराणसी, १९६६
- उपाध्यायः, वाचस्पतिः, *मीमांसादर्शनविमर्शः,* भारतीयविद्याप्रकाशनम्, वाराणसी, १९७९

- गैरोला, वाचस्पति, *भारतीयदर्शनम्,* लोकभारती प्रकाशनम् इलाहाबादः, १९६६
- द्विवेदी, कपिलदेव, *अर्थविज्ञान और व्याकरण दर्शन,* विश्वविद्यालय प्रकाशनम्, वाराणसी, २००८
- नेने ,सोमनाथ, *मीमांसा दर्शन विमर्श,* प्रतिभाप्रकाशनम्, दिल्ली,२००८
- मिश्र ,शोभाकान्त, *शब्दार्थ तत्त्व,* बिहारहिंदीग्रन्थ अकादमी, १९८६
- मिश्र,मण्डन, *मीमांसादर्शनम्,* श्रीलालबहादुरशास्त्रि – केन्द्रीयसंस्कृत –विद्यापीठम् , १९८३
- मुसलगांवकर, गजाननशास्त्री, *मीमांसा दर्शन का विवेचनात्मक इतिहास,* चौखम्बा विद्याभवनम् वाराणसी, १९९२
- मुसलगांवकर, गजानन शास्त्री, *मीमांसा परिभाषा,* कृष्णदासाकादमी, वाराणसी, १९९४
- वर्मा, शारदा, *भाट्टचिन्तामणि के तर्कपाद का अध्ययन,* निर्माणप्रकाशनम् शाहदरा, दिल्ली, १९८७
- शर्मा ,राममूर्त्ति, *भारतीय दर्शन की चिन्तन धारा,* मणिद्वीप, दिल्ली, २००१
- शास्त्री, गौरीनाथ, *शब्दार्थमीमांसा,* अनु. मिथिलेश चतुर्वेदी, सम्पूर्णानन्दसंसकृत विश्वविद्यालयः वाराणसी, १९९२
- सिन्हा, वानिता, *तन्त्रवार्तिक का स्मृतिपाद,* ईस्टर्न बुक लिंकर्स, दिल्ली,१९८९
- हिरियन्न, एन, *भारतीय दर्शन की रूपरेखा,* राजकमलप्रकाशनम् दिल्ली, १९६९

**कोशग्रन्थाः**

- *अमरकोशः,* श्रीमदमरसिंहविरचितः, सं.पंशिवदत्त दधिमथः पं. वासुदेवपाणी शीकरः, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, २०१३.

- *संस्कृत-हिन्दी शब्द कोश,* वामनशिवरामः आप्टे, कमल-प्रकाशनम्, नवदेहली, २०१५.
- *जैनेन्द्रसिद्धान्तकोश* (भाग-१), जिनेन्द्र वर्णी, सम्पा. हीरालाल जैन प्रकाशक. भारतीय ज्ञानपीठ प्रकाशन, वाराणसी – ५ १९७०
- *न्याय कोश,* भीमाचार्य झल्कीकर, भाण्डारकर ओरियण्टल रिसर्च इंस्टीटयूट, पूना, १९७८
- *भारतीय दर्शन परिभाषा कोश,* दीनानाथ शुक्ल, प्रतिभा प्रकाशन, दिल्ली, १९९३
- *भारतीय- दर्शन- बृहत्कोश* (भाग-४), बच्चूलाल अवस्थी, शारदा पब्लिशिंग हाउस, दिल्ली, २००४
- *मीमांसाकोश,* केवलानन्द सरस्वती, श्रीसत्गुरुपब्लिकेशन्स, दिल्ली, १९९२
- *मीमांसा खण्ड,* ( संस्कृतसुक्तिसमुच्च्य) , दिल्ली- संस्कृत अकादमी, सम्पा. श्री कृष्ण सेमवाल, अनु. धर्मानन्द शर्मा, अमर प्रींटिंग प्रेस, विजय नगर, दिल्ली, २०००
- *वाचस्पत्यम्* (१-६ भाग), चौखम्बा संस्कृत ग्रन्थमाला, ग्र.सं. ९४, वाराणसी, १९६९
- *शब्दकल्पद्रुम* (भाग-५), राधाकान्त देव, चौखम्बा संस्कृत ग्रन्थमाला, ग्र.सं-९४वाराणसी, १९६७
- *संस्कृत-हिन्दी-अंग्रेजी शब्दकोश,* उमा प्रसाद पाण्डेय, कमल प्रकाशन, २०११
- *संस्कृत- हिन्दी कोश,* वामन शिवराम आप्टे, न्यूभारतीय बुक कारपोरेशन, दिल्ली, २००६
- *संस्कृत शब्दार्थकौस्तुभ,* सम्पा. द्वारका प्रसाद शर्मा, तारिणीश, झा, रामनरायण लाल, बेनी प्रसाद, इलाहाबाद, १९७३
- *Encyclopedia of Indian Philosophies [(vol. 8-9 Buddhist Philosophy)],* Karl H. Potter, MLBD, Delhi,1999- 2003

**अन्तर्जालस्रोतांसि**

http://www.sanskrit.jnu.nic.in/
http://www.sanskrit-lexicon.uni-koeln.de/monier/
http://csl.du.ac.in/online/theses-dissertation.htm
http://sanskrit.uohyd.ac.in/scl/
http://shodhganga.inflibnet.ac.in/simple-search
http://www.academia.edu/documents/in/sanskrit